25595

25595

A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1922-23 TO 1924-25

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY


MAHĀMAHŌPĀDHYĀYA VIDYĀVĀCASPATI
PROFESSOR S. KUPPUSWAMI SASTRI, M.A., I.E.S.
CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS

Prepared under the orders of the Government of Madras

Volume V—Part 1—Sanskrit C



MADRAS
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS
1932


25595


THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY
CALCUTTA

A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1922-23 TO 1924-1925.

VOLUME V.

PART I—SANSKRIT—C.

R. No. **4416.**

Paper. 10¾ × 9¾ inches. Foll. 236. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of Śrīmān Magunirājaguru Mahāpātro, Kolasandhapuram, Aska, Ganjam district.

ज्योतिश्चन्द्रोदयः.

JYŌTIŚCANDRŌDAYAḤ.

Foll. 1, 235*a* –236*b* are left blank.

Same work as that described under R. No. 3199 ante, wherein see for the beginning. By Dhanañjaya.

Contains the Prakāśas 27—48 dealing with the following subjects :—

२७. अब्दानयनप्रकारः.
२८. उत्पातनिर्णयः.
२९. यात्रानिर्णयः.
३०. लग्नशुद्धिः.
३१. योगाध्यायः
३२. स्वरयात्रा.
३३. यात्रावत्सरगुह्यकपूजादि.
३४ प्रयाणविधिः.
३५. हस्तिलक्षणम्.
३६. नृपाचारः.
३७. प्रश्नज्ञानम्.
३८. चैत्रादिमासकृत्यम्.
३९. तिथिनिर्णयः.
४०. अशोकाष्टम्यादिदिननिर्णयः.
४१. वामनजन्मादि.
४२. दाननिर्णयः.
४३ ग्रहदानफलम्.
४४. श्राद्धनिर्णयः.
४५ अमाश्राद्धनिर्णयः.
४६. प्रेतश्राद्धनिर्णयः.
४७ मृतसूताशौचनिर्णयः.
४८. पुष्करशान्त्यादि.

End:

हयग्रीवस्तु विज्ञेयस्त्वङ्कुशप्रतिरूपकः ।
चक्रद्वयसमायुक्तो भक्तिमुक्तिसुखप्रदः ॥
कूर्मस्तू(स्य तू)न्नतः पृष्ठे वर्तुलावलिपूरितः ।
हरितं वर्णमाधत्ते कौस्तुभेन विराजितम् ॥
त्रिकोणा विषमा चैव छिद्रा भिद्रा(न्ना) तथैव च ।
अर्धचन्द्राकृतिर्या च पूजार्हा न च सा भवेत् ॥
फलं नोत्पद्यते तत्र पूजायां तु कदाचन ।
चक्रमन्त्रेण सा पूजा कृष्णमन्त्रेण मन्त्रिणाम् ॥

Colophon :

इति श्रीज्योतिश्चन्द्रोदये अष्टचत्वारिंशः प्रकाशः ॥

R. No. **4417.**

Paper. 10¼ × 9¼ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of the Sanskrit College Library, Tiruppanittura, Cochin State.

ध्वन्यालोकलोचनव्याख्या.

DHVANYĀLŌKALŌCANAVYĀKHYĀ.

Foll. 1*a*—53*b*. Fol. 54 is left blank.

Similar to the work described under R. No. 2680 ante.

Contains the first Uddyōta incomplete.

Beginning :

तारानन्दवर्धन इति प्रथिताभिधान इत्यत्र वक्ष्यति । इह बाहु . .
. . . . . संभावनाप्रत्ययबलेन प्रवर्तते । स च संभावनाप्रत्यय . . .
. . . . . य कवित्वविद्वत्त्वादिसमनुस्मरणेन भवतीति
यत्किञ्चिदनुरणन . . . . . .
. . . . रस्यापि ग्रन्थस्य स्फुटीकरणमात्मनो भट्टेन्दुराजशिक्षावशा . .

. . . . . करोमीत्यर्थः । तत्करोतीति णिच् । काव्यालोकं आलोकः प्रकाश . . . . . काव्यालोकशब्देन लक्षणग्रन्थ उपचारात्प्रतिपाद्यते

* * * *

व्याख्यातृश्रोतृणामिति । व्याख्यातुर्हि व्याख्यानमभीष्टं फलं, श्रोतुः श्रवणम् । व्याख्येत्यत्र आतश्चोपसर्गे इत्यङ् लक्षणशब्दोऽत्र स्वरूपवाची । संपत्तिशब्द इहोद्भवार्थः । समीचीनतार्थत्वेऽपि न दोषः । समुचितेति । आशिषः समुचितत्वं समनन्तरमेव त्राणं चाभीष्टफललाभं प्रतीत्यादिना ग्रन्थे दर्शयिष्यति ।

End:

अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति मूलविभागः । अत्रैवोद्द्योते प्रथमोद्द्योते । नन्विदमनाख्येयत्वं नासत्त्वात् नाप्यसाधुत्वात् । किन्त्वतिशयितत्वादिति चेत्युक्तमित्याह वृत्तिकारः—यदि पुनरिति । काव्यान्तरं गुणीभूतव्यङ्ग्यं चित्रं च । अत्रातिशयोक्त्येति पदं व्याचष्टे—अतिशयोक्ति.

R. No. **4418**.

Paper. 10¾ × 9¾ inches. Foll. 292. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of Maṅgāttammaṅgār, Vaḍakkutirumāḷigai, Alwartirunagari, Tinnevelly district.

Fol. 292 is left blank.

Bound in two volumes.

उपनिषन्मङ्गलाभरणम्.

UPANIṢANMAṄGALĀBHARAṆAM

A commentary on the following Upaniṣads :—

१. बृहदारण्यक.	५. मुण्डक.
२. सुबाल.	६. क्रन.
३. प्रतर्दन (कौषीतक).	७. परमहंस.
४. बाईद्रथ (मैत्रेय).	८. आरण्यक.

९. सन्यास.	१७. कालाग्निरुद्र.
१०. हंस.	१८. नारायण.
११. ईशावास्य.	१९. कौषीतक.
१२. अमृतबिन्दु.	२० परब्रह्म.
१३. अथर्वशिखा.	२१. शारीरक.
१४. माण्डूक्य.	२२. गर्भ.
१५. कैवल्य.	२३. नाद.
१६. अथर्वशिरस्.	२४. योगशिखा.

Beginning:

श्रीमन्तमुग्रतरवीर्यमुदारसिंहं
मृत्योः प्रमृत्युमिलया रमया च जुष्टम् ।
आचार्यराजमखिलोपनिषत्प्रकाश-
मन्तस्थितं निखिलहेतिधरं नमामि ॥

चोदितोऽनेन देवेन सर्वोपनिषदामिदम् ।
मङ्गलाभरणं कुर्वे सद्रत्नखचितं लघु ॥

ण्यन्तात्सदेः ह्युपनिष . . ब्रह्मोप . . . यसा ।
. . . त्यन्तावसादा याप्यतो यतिगतिः परा ॥

तावदन्वर्थनाम्नो बृहदारण्यकस्य तदिदं वाजसनेयिब्राह्मणे अष्टाध्यायी । तत्राद्यौ द्वावध्यायौ प्रवर्ग्योपसदौ । अष्टमेऽपि पञ्चाग्निविद्याः । अतः परं गृहिण्यां वृष्यस्त्रीवशनादिकम् । तत उषा वा अश्वस्येति तृतीयाध्यायाद्यापञ्चाग्निग्रन्थो विद्याभागः । स इह व्याचिकीर्षितोपनिषदात्मा । यथा तैत्तिरीयकं कर्म विद्याभोगोपेतमारण्यकम् । यथा वैतरेयकादि । एवमिहापि ।

* * * *

Colophon:

इति मङ्गलाभरणे षोडशकले प्रथमायां बृहदारण्यकलायां तृतीयोऽध्यायः ॥

* * * *

Colophon:

इति श्रीमदुपनिषन्मङ्गलाभरणे षोडशकले बृहदारण्यकलायां प्रथमाया मष्टमोऽध्यायः ॥

समाप्ता बृहदारण्यकला ॥

श्रीमदष्टाक्षरोल्लासबृहदारण्यैकखनम् ।
नृसिंहं चोपनिषदं देवं देवीं सदा स्तुमः ॥

End:

उपासनया सुप्रीतादादिगुरोरनुग्रहादपरोक्षं स्वतत्त्वतया भगवदनुभव इति जन्मान्तरसहस्रेषु अनेकपूर्वदेहेषु यया क्षीणं तु कल्मषम् । . . . . . त्यकर्मणेति शेषः । तदैव योगोन्मुखो योगेन निर्विघ्नप्रवृत्तेन संसारच्छेदनं संसारबन्धसाक्षात्प्रमोचकं महत् स्वतत्त्वभूतं श्रीमदादिगुरुपरब्रह्म पश्यति . . . . . या साक्षात्करोति । आवृत्तिरुपनिषत्समाप्तौ ॥

अक्षरस्थाल्युकारोच्चवर्ती तेजो मकारगाम् ।
शिखां नादात्मिकां ब्राह्मीं मूर्तिं विद्मः किमन्यकैः ॥

Colophon:

इति श्रीमदुपनिषन्मङ्गलाभरणे षोडशकले प्रकीर्णकलायां पञ्चदश्यां चतुर्दशी प्रकीर्णकला योगशिखा समाप्ता ॥

R. No. **4419.**

Paper. 10⅝ × 9½ inches. Foll. 78. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1924–25 from a MS. of Gōdavarma-Raja Avargal, Chalur-Kōvilagam, Chalur, Cochin State.

(*a*) शिल्परत्नम् (उत्तरभागः).

ŚILPARATNAM (LATTER PORTION).

Foll. 1*a*—51*b* and 63*b*—65*b*.

Same work as that described under R. No. 2742 ante, wherein see for the beginning and other particulars regarding the author, etc.

Contains the Adhyāyas 1—19 and 35 in the Uttarabhāga and deals with the following topics:—

१. बिम्बादिसाधनविधिः.
२. लिङ्गलक्षणम्.
३. लक्षणोद्धारविधिः.
४. प्रतिमोत्सेधविधिः.

५. उत्तमदशतालल्क्षणम्.	१३. षट्तालल्क्षणम्.
६ मध्यमदशतालल्क्षणन्.	१४. पञ्चतालल्क्षणम्.
७. अधमदशतालल्क्षणम्.	१५. चतुस्तालविधिः.
८. उत्तमनवतालल्क्षणम्.	१६. किरीटकटकादिलक्षणम्.
९. मध्यमनवतालल्क्षणम्.	१७. शूलस्थापनलक्षणम्.
१०. अधमनवतालल्क्षणम्.	१८. रज्जुबन्धलक्षणम्.
११. अष्टतालविधिः.	१९. मृल्लेपनविधिः.
१२. सप्ततालल्क्षणम्.	२९. शस्त्रलक्षणम्.

End:

त्रिफलोत्थक्काथजलैस्सम्यगालिप्य सर्वतः ।
शुष्के तु स्वर्णपिष्टेन लेपं कृत्वा पुनः क्रमात् ॥
चित्रोक्तमार्गमाश्रित्य वर्णलेपनमाचरेत् ।
मुक्ताफलस्य चूर्णस्य पिष्टः स्यात्पीतवर्णके ॥

Colophon:

इति शिल्परत्ने उत्तरभागे मृल्लेपनविधिर्नाम एकोनविंशोऽध्यायः ॥

* * * *

पुष्पवत्पुङ्खमादाय शत्रुवत्पीड्य तद्धनुः ।
मुष्टिना लक्ष्यमाच्छाद्य श्वासेन सह मोचयेत् ॥
अध्यायैरथ सप्तपञ्चकयुतैश्श्रीदेवनारायण-
प्रज्ञाकल्पितशिल्परत्नगतपश्चाङ्गागमन्तं गतम् ।
नानालक्षणमन्त्रलिङ्गमनुबिम्बाकारभूषायुध-
ब्रह्मात्मासनतत्प्रतिष्ठितिभवज्जीर्णोद्धराद्यन्वितम् ॥
करुणापूरसम्पन्नगुरूणां सुप्रसादतः ।
अहं सिन्दूरसोऽस्म्यज्ञः तत्पादेभ्यो नमो नमः ॥

Colophon:

इति शिल्परत्ने उत्तरभागे शस्त्रलक्षणविधानं नाम पञ्चत्रिंशोऽध्यायः॥
शिल्परत्नोत्तरभागस्समाप्तः ॥

Foll. 52*a*—63*b* contain the Padavinyāsa, Kṣētravinyāsa and Āyudha-lakṣaṇa in Malayalam language.

(*b*) वराहमिहिरसंहिता.

VARĀHAMIHIRASAṀHITĀ.

Foll. 66*a*—69*b*.

A treatise attributed to Varāhamihira dealing with warfare and polity.

Contains the Adhyāyas 50 (खड्गलक्षण) and 70 (शयनासनलक्षण) only.

Beginning:

वराहमिहिरेणोक्तं लिख्यते खड्गलक्षणम् ।
सम्यग्विचिन्त्य मनसा लक्षणानि वदेत्पुनः ॥
अङ्गुलशतार्धमुत्तममूनं स्यात्पञ्चविंशतिः खड्गः ।
अङ्गुलमानं ज्ञेयं समाङ्गुलरथोऽव्रणश्शुभदः ॥
श्रीवृक्षवर्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम् ।
सदृशो व्रणः प्रशस्तो ध्वजायुधस्वस्तिकानां च ॥
ककलासकाककङ्कक्रव्यादकबन्धवृश्चिकाकृतयः ।
खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश्च ॥

* * * *

Colophon:

इति वराहमिहिरसंहितायां खड्गलक्षणं नाम पञ्चाशोऽध्यायः ॥

End:

[प्र]पञ्चवनस्पतिरचिते पञ्चत्वं यत्र यश्शेते ।
षट्सप्ताष्टतरूणां काष्ठैर्घटिते कुलविनाशः ॥

Colophon:

इति वराहमिहिरसंहितायां शयनासनलक्षणं नाम सप्ततितमोऽध्यायः ॥

Foll. 70*a*—71*b* give the Dīpalakṣaṇa in Malayalam language. Fol. 72 contains the Dvāralakṣaṇa in Sanskrit. Foll. 72*b*—75*a* contain the Prāsādalakṣaṇa in Malayalam language. Foll. 75*b*—77*b* give the contents of Śilpaviṣaya. Fol. 78 is left blank.

R. No. **4420.**

Paper. 10⅝ × 9½ inches. Foll. 48. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Kudalur Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

Fol. 48 is left blank.

अजिताव्याख्या--विजया
AJITĀVYĀKHYĀ: VIJAYĀ.

Same work as that described under R. No. 3278 ante; but different colophons are given below. By Anantanārāyaṇa alias Ajitācārya. This forms the further portion of the work described under R. No. 3278 ante

Colophon:

इति श्रीवरदराजसूर्यदेवभट्टविरचिते अजिताद्योतने द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

* * * *

इति नारायणस्य कृतावजिताव्याख्याने द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

R. No. **4421.**

Paper. 10⅝ × 9½ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. K. Paramēśvara Nambūdiri, Quilandy, Malabar district.

Foll. 15*b*—16*b* are left blank.

क्रियासङ्ग्रहः.
KRIYĀSAṄGRAHAḤ.

A treatise on Dharmaśāstra dealing with the fixing of proper days for the performance of various ceremonies to be observed on the different days of different lunar months throughout the year.

Contains the first part complete and the second part incomplete.

Beginning:

श्रद्धापुरस्सरं नत्वा ग्रहानपि गणेश्वरम् ।
श्राद्धचन्द्रादिगणक्रियासङ्ग्रह उच्यते ॥

नीत्वा मध्यं विलिप्तावधिकमुरुघना(रा)द्यासहीने ध्रुवाद्ये
क्षिप्त्वास्मिन् देशभेदं रविभुजचरयोर्दिग्वशाद्योगभेदम् ।
हत्वा मध्यात्मभुक्त्या ननु तवरहृतं तत्तुलाजादितः स्या-
त्स्वर्णं मध्ये स्वतुङ्गं त्यजतु पुनरतः पूर्णदोर्ज्यां विभज्य ॥
शिष्टज्याविकला हतस्थितिसटा मासेश्वरो हारको
दोर्ज्यां नीतिहतामनेन विभजेल्लब्धं तु कोट्यास्त्यजेत् ।

तां नेत्रास्यहतां हरेत्फलयुता दोर्ज्या स्ववृत्ताहता
नन्दाप्ता खलु चाविता धनमृणं केन्द्रे तुलाजादितः ।

* * * *

Colophon:

इति क्रियासङ्ग्रहे पूर्वभागः ॥

काले यत्र रविस्त्रयोदशलवासन्नोऽहिकेत्वोस्तदा
पूर्णान्ते ग्रहणं विधोर्निशि दिने चिन्त्यं हिमान्ते रवेः ।
आसन्ने रजनेर्दिवापि शशिनः पूर्णावसानं यदि
स्यात्संसर्पमितैर्दिनैर्दिनपतेः पातद्वयस्यान्वयः ॥

End:

जीवो मासश्च तारा भमिति निगदितं साधनानां चतुष्कं
सङ्कल्पन्ति जन्ममासे कलिमपि च विधायाब्दमाभ्यां विहाय ।
जीवं ज्ञात्वात्र नीत्वा ध्रुवमपि च तथा वाक्यमाश्राय तारं
तस्मिन्नह्येव कुर्यात्कलिमपि विहगान् जातका . . निरेवम् ॥

R. No. **4422.**

Paper. 10⅝ × 9½ inches. **Foll.** 103. **Lines,** 20 in a page. **Grantha.** Good.

Transcribed in 1924–25 from a MS. belonging to the Naḍuvil-Maṭham Library, Naḍuvil-Maṭham, Trichur, Cochin State.

Foll. 102*b*—103*b* are left blank.

ज्ञानवासिष्ठम्, सव्याख्यानम्.

JÑĀNAVĀSIṢṬHAM WITH COMMENTARY.

Same work as that described under Nos. 1984 and 1985 of the D.C.S. MSS, Vol. IV, Part I. wherein see for the beginning. The portion contained in this MS. is in continuation of that described under No. 1985 of the D.C.S. MSS., Vol. IV, Part I.

Contains from the last portion of the XXXII Sarga to the end of the XLIV Sarga in the Nirvāṇaprakaraṇa.

End:

चिदम्बरात्प्रोदित एव पूर्णशास्त्रेन्दुना(रा)नन्दनिधिस्सुपात(द)ः ।
सान्द्रामृतं(तः) काव्यकृतोपशोभः स्फुरत्प्रकाशः क्षपितान्धकारः ॥

स्नातं तेन समस्ततीर्थनिचयं(सलिलैः) सर्वापि भक्ता(दत्ता)वनिः
यज्ञानां च कृतं सहस्र खिला (समस्तमिष्टमनघं) देवाश्च सम्पूजिताः ।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः वा(प्रा)प्नुयात् ॥

इह वैराग्यमुमुक्षुव्यवहारोत्पत्तिकस्थितयः ।
उपशमनिर्वाणाविति वासिष्ठे षट् प्रकरणानि ॥

Colophon:

इति तर्कवागीश्वरसाहित्याचार्यसंविवेकवाचस्पतिगौडमण्डलालङ्कारपण्डित-श्रीमदानन्दसमुद्धृते श्रीमद्वाल्मीकीये श्रीमद्वासिष्ठरामायणे मोक्षोपायसारे निर्वाणप्रकरणे चतुश्चत्वारिंशस्सर्गस्समाप्तः ॥

R. No. **4423.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 18. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Nārāyaṇa Śāstrigaḷ, Calicut, Malabar district.

Fol. 18 is left blank.

कादम्बरीनाटकच्छाया.

KĀDAMBARĪNĀṬAKACCHĀYĀ.

Gives the Sanskrit rendering of the Prākṛta passages contained in Narasimha's Kādambarīnāṭaka, which work has been described under R. No. 2484 ante.

Breaks off in the VI Act.

Beginning:

स्थाने खलु तस्मिंस्तस्मिन् समये चिरपरिचितः अवन्तिविषय एव स्मर्तव्यः । यत इदानीमहं दावाग्निदग्धान्तरशाखामृगयूथकुलभकोपहास्यानि मृगतृष्णिकानुसारवञ्चितविहस्तमध्याह्नपथिकसार्थदत्तपरिहासानि समावासभूतानि विन्ध्यायतनकाननानि न पारयामि विहर्तुम् ।

* * * *

Colophon:

इति कादम्बरीनाटकच्छायायां प्रथमोऽङ्कः ॥

End:

तदादिश मार्गमच्छोदस्य । यत्र कृतनियममज्जनया मयास्मिन् क्षण एव धारितव्यानि आर्यपुत्रधारितपूर्वाणि कल्पद्रुमवल्कलानि ॥

Colophon:

इति कादम्बरीनाटकच्छायायां पञ्चमोऽङ्कः ॥

हा धिक् हा धिक् चिरकालानुभूतवयस्यविजयसञ्चारस्य इदानीं प्रतिनिवृत्तो वयस्य इत्येतावतापि मे न निर्वृतिर्भवति । यतः पुरूरवा इवोर्वशीं दिव्यदेशगतां कादम्बरीं कामयमानो रात्रिन्दिवमपि मामभ्यवहारकार्येष्वपि निरवकाशमुपरुणत्सि ।

* * * *

अहं पुनरेवं तर्कयामि सत्यायते चक्रवर्तिनी चित्ररथनन्दिनी मदनाग्निसन्तापविदग्धात् ते हृदयकमलात् चित्रच्छलेन भुजनालाग्रतो निर्गतेति । तत्किमवशिष्टमतः परं लिखितव्यस्य ।

R. No. **4424.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 178. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Paliyattu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

Foll. 71*b*, 177*b*—178*b* are left blank.

विष्णुसंहिताव्याख्या—हारिणी.

VIṢṆUSAṀHITĀVYĀKHYĀ: HĀRIṆĪ.

A commentary on the Viṣṇusamhitā, which work has been described under No. 5365 of the D.C.S. MSS., Vol. XI: by Nārāyaṇa.

Breaks off in the X Paṭala.

Beginning:

स्थूलात्स्थूलतरस्सूक्ष्मादपि सूक्ष्मतमः प्रभुः ।
यः परस्मात्परतरः तस्मै श्रीविष्णवे नमः ॥
नमस्तस्मै सुमतये यो दिव्यां विष्णुसंहिताम् ।
आविश्चक्रे भुवश्चक्रे गङ्गामिव भगीरथः ॥
सुमतेस्संहितार्थो यस्सूर्यैर्नैव प्रकाशितः ।
मयायमुन्मुकेनेव प्रकाश्य इति हास्यताम् ॥

यन्नादर्थाच्छरत्नैर्महितसुमतिसद्माद्विराजावतीर्णा
गाढेनार्तैर्मयाप्तां हरिपदजलधिं संहिताताम्रपर्णीम् ।
तारं हारं वहन्ती चित(र)मतिसुमुखी चारुमध्या विदग्धैः
प्रेक्ष्या व्याख्यावधूटी जयतु शुभपदा हारिणीनामधेया ॥

अथ भगवानखिललोकानुग्रहगृहीतविग्रहः विश्वसम्भवे निश्वसितपदात्मनोपदनामभुजादुद्गतं (?) महान्तं विष्णुसंहिताख्यमागमसार्वभौममरुपधियामयमनन्ध्य(ध्येय) इति ध्यायन् सुमत्यौपमन्यववक्त्रश्रोत्रद्वारेण संक्षेपुकामः स्वयं स्वतन्त्रोऽपि

* * * *

श्रीशब्दसङ्कीर्तनलक्षणं मङ्गलमाचरन्मुखतश्शिष्याचार्यसम्प्रयोगं प्रतिपादयन्नर्थाद्विषयप्रयोजनसम्बन्धाधिकारिणोऽपि दर्शयति — श्रीशैलेत्यादिना । औपमन्यवः श्रीशैलशिखरे आसीनं सिद्धं प्रणम्य पृष्टवानित्यन्वयः ।

* * * *

Colophon:

इति नारायणविरचितायां विष्णुसंहिताव्याख्यायां हारिण्यां प्रथमः पटलः ॥

End:

इत्येवमुक्तप्रकारेण विष्णुसंहितायां विष्णुप्रोक्तायां संहितायां मण्डलार्चनं नाम नवमः पटलः अतीत इत्यर्थादिते ॥

Colophon:

इति नारायणविरचितायां हारिण्याख्यायां विष्णुसंहिताव्याख्यायां नवमः पटलः समाप्तः ॥

अथैवं मण्डलस्य लक्षणं स्वरूपं चाभिधाय तत्पूजापुरस्सराया(र्याः) दीक्षायाः प्रतिपादनं प्रतिजानीते — अथेति । अथशब्दश्शिष्यदीक्षायां प्रयोजकयोर्होमपूजयोस्साधनभूताग्निमण्डलसम्पादनानन्तरं दीक्षापटलप्राप्तिं सूचयात । सङ्क्षेपाद्वक्ष्यामि अवहितेन श्रूयतामिति शेषः ।

* * * *

तण्डुलान् न्यस्य समुपस्तीर्य समुपस्तीर्णान् तानालोड्य लोलयित्वा अवघट्य द्रदनपुलाका(?) अन्योन्यश्लिष्टाः कृत्वोपस्तीर्य चकाराद्विधोय(?) उदगुद्वास्यापः

R. No. 4425.

Paper. 10⅝ × 9½ inches. Foll. 170. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of the Naḍuvil-Maṭham, Trichur, Cochin State.

Fol. 170 is left blank.

तार्किकरक्षाविवृतिः.

TĀRKIKARAKṢĀVIVṚTIḤ.

Same work as that described under No. 4197 of the D.C.S. MSS., Vol. VIII, wherein see for the beginning. By Hariharadīkṣita of Bhāradvājagōtra.

Complete.

End :

अथ ग्रन्थकारः स्वकृते ग्रन्थे परीक्षकाणामादरातिशयोत्पादनार्थं वैशिष्ट्यं कथयन् स्वनामप्रख्यापनेन . . . तीं कीर्तिमाह—न्यायविद्याविदग्धस्येत्यादिना । पारदृश्वनेत्यत्र दृशेः क्वनिप् । किमेत्तिङव्ययेत्यादिना तरबन्तादाम्प्रत्यये विजयते तरामिति र(रूपम्) । न्यायवैदग्ध्यस्य सम्प्रदायसिद्धतया न केवलं पदार्थतत्त्वजिज्ञासूनामेवायं ग्रन्थ आदरणीयः, किं तु विजिगीषूणामपि श्लाघ्य इ(त्य)त आह—आलोच्येति(ड्येति) । . . . रपक्षिलभूषणकारादीनामित्यर्थ । साधु वावद्यन्त इति वावदूकाः । यजजपदशां य(ङः) इति सूत्रे . . वदेरनप्रवेग (?) . . . . . पदकारवाक्यावदूकप्रत्यय इति क्षीरस्वामी । य(ङ)न्तानां यजजपदंशवदमिति कालो(ला)पोक्ते . . . . क इति सर्वान्नदः ॥

इत्थं हरिहरार्येण भारद्वाजेन यज्वना ।
कृता वरदराजीयव्याख्या सद्भिः प्रतीक्ष्यताम् ॥

Colophon :

इति हरिदीक्षितीयं समाप्तम् ॥

R. No. 4426.

Paper. 10⅝ × 9½ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Ṇambūdiri alias Kṛṣṇa Nambūdiri Vaidikan, Tekkattu-mana, Kumaranallur, Malabar district.

वृकासुरवधप्रबन्धः.

VṚKĀSURAVADHAPRABANDHAḤ.

A short Campukāvya describing the story of the killing of Vṛkāsura by Śiva.

Complete.

Beginning:

कैलासाद्रितटीषु वन्यकलभैस्सार्धं विहृत्य श्रमा-
दायातः पितुरङ्कमस्य मुकुटीधुन्यामुदन्याकुलः ।
पीत्वाम्भः स्वकरं प्रसार्य भुजगश्रेणिं मृणालभ्रमा-
दाकर्षन्नयमर्भको गजमुखः श्वश्श्रेयसायास्तु वः ॥
लब्ध्वा मुग्धेन्दुचूडाद्वरमखिलजगद्वासिनां मूर्ध्नि हस्त-
न्यासान्नाशाय कर्तुं तदनु वरपरीक्षान्त(र्थ)मेवाद्यवन्तम् ।
वाचा माधुर्यभाजा दमयितुमनसा दानवं मानवन्तं
प्रौढं तत्कैटभारेर्भवतु वटुवपुर्भूयसे श्रेयसे वः ॥

* * * *

सतामनिष्टश्शकुनेरभीष्टो विचित्रवीर्यान्वयधन्यजन्मा ।
अभीरसौ भीमसमीक्लोभी बभार दुर्योधनवद्दुराशान् ॥

स खलु निखिलखलखलकृलकस्सकलभुवनभयानकानामनवरतकरतलकलितकृपाणबाणासमुसलप्रासप्रायेहतीनामहितवीरवारबाणपारणपवीणवारबाणशिरस्त्राणधारिणामात्मसैनिकानामाकस्मिकैरपि सञ्चलनैराकम्पितनिलिम्पहृदयः समुदयदतिमलीमसनिजवासनावशेन दनुजगुरुपरमोपदेशेन च परज्यानिमेव ज्यायसीं नीतिमाकलयन् नाकलयं कर्तुमुद्युक्तमनाः दिनानि बहूनि निनाय ।

End:

समुदयमानोत्कण्ठश्श्रीकण्ठालिङ्गनं स वैकुण्ठः ।
अनुभूयापि च भूयश्श्रीकण्ठालिङ्गनोत्सुकः प्रायात् ॥
अभिनन्दन्मुकुन्दस्य महिमानं दयानिधेः ।
अगमन्निगमस्तोमसुगमः सोमशेखरः ॥
कलधौतशैलकलशाम्बुधी सुधीपरितोषकारिचरितौ सुधासिते ।
भवने तदा शुभवने समीयतुस्तरसा रसेन हरसारसेक्षणौ ॥

Colophon:

वृकासुरवधो नाम प्रबन्धस्समाप्तः ॥

R. No. 4427.

Paper. 10⅝ × 9½ inches. Foll. 66. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of Gōdavarma-Raja of Chelur, Trichur, Cochin State.

Fol. 66*b* is left blank.

नामलिङ्गानुशासनव्याख्या—लघुभाषा.

NĀMALIṄGĀNUŚĀSANAVYĀKHYĀ: LAGHUBHĀṢĀ.

A commentary on Amarasimha's Nāmaliṅgānuśāsana, which work has been described under No. 1687 of the D.C.S. MSS., Vol. III. From the colophon given at the end of the MS. described under R. No. 4390, it is made out that the commentator was Ravivarmarāja.

Contains from the middle portion of Manuṣyavarga to the end of the third Kāṇḍa.

Beginning:

अपादाने स्त्रियामुपसङ्ख्यानात् घञोऽयं ङीष् स्यात् । आचार्या । अपि च स्वतः योपधत्वादङीष् । आचार्यानी तु पुंयोगे । इन्द्रवरुणेति ङीषानुकौ । आचार्यादणत्वं च । मन्त्रव्याख्याकृदाचार्यः । स्यादर्यी क्षत्रियी तथा । उपाध्यायान्युपाध्यायी ।

* * * *

Colophon:

इति शूद्रवर्गः ॥

कृतावमरसिंहस्य नामलिङ्गानुशासने ।
द्वितीयो भूमिकाण्डोऽयं साङ्गोपाङ्गस्समर्थितः ॥

End:

एवं विरोधेऽपि परत्वात् ङीबे । शेषं तु ज्ञेयं शिष्टप्रयोगतः । इह यन्नोक्तं तल्लक्ष्याद्द्रष्टव्यम् । वेदाः प्रमाणं स्मृतयः प्रमाणं विप्राशिषो भद्रमतीव लोके ॥

Colophon:

इति विशेष्यनिघ्नालिङ्गप्रकरणम् ॥

कृतावमरसिंहस्य नामलिङ्गानुशासने ।
सामान्यकाण्डस्तार्तीयः साङ्गोपाङ्गस्समर्थितः ॥

The scribe adds—

श्रीरविवर्मनृपालस्याज्ञावशगेन केनचित्सुमतेः ।
लघुभाषेयं लिखिता सततं नमता विमत्सरान् विबुधान् ॥
गोमता शमधनेन निजार्थं श्रीमती विलिखितामरव्याख्या(टीका) ।
सोमशेखरमुरासुरहन्त्रोर्नामकीर्तनपरेण सदैवम् ॥

R. No. **4428**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 74. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Nārāyaṇa-Nambūdiri alias Kṛṣṇa Nambūdiri, Tekkattu-mana, Kumaranallur post, Malabar district.

सोमबाहुच्यकारिकाः.

SŌMABĀHVRCYAKĀRIKĀḤ.

Kārikās relating to the performance of Sōma sacrifice, written in accordance with the school of Āsvalāyana.

Incomplete.

Beginning:

वाणीं गणाधिपं व्यासं शौनकं चाश्वलायनम् ।
गुरूनपि नमस्कृत्य सोमे बाहुच्यमुच्यते ॥
आसीनैरेव तत्कर्म कर्तव्यं सर्वकर्तृभिः ।
दक्षिणोत्तर्युपस्थत्वमासने च स्थितिः पुनः ॥
दक्षिणं प्रपदं न्यस्य वेद्यामास्तृतबार्हिषि ।
कर्तव्यं सामिधेन्यादौ विहिता यत्र यत्र सा ॥
* * * *
व्रतार्थं च विशेदेवमहरेतदुदाहृतम् ।
श्लोका दीक्षाहसम्बद्धाश्चत्वारोऽशीतिरप्यमी ॥
अथान्त्ययाम उत्थाय नेतृयष्ट्रादिभिस्सह ।
आचम्य त्रिस्तथा प्रैषे तथा विहरणादिषु ॥

End:

उपसत्सु द्वितीयेऽत्र याज्यादिस्स्यात्तथास्त्वथः ।
तन्त्रस्वरेऽनुमन्त्रादौ वौषडुच्चैस्तरां यतः ॥

सोमप्रवे(व)हणीयायां प्रायणीयास्वरस्त्वृचाम् ।
तस्मादासां चतुर्थेन यमेनोच्चारणं भवेत् ॥

R. No. **4429.**

Paper. 10⅝ × 9½ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. K. Paramēśvaran Nambiyar, Quilandy, Malabar district.

Foll. 33*b* and 34 are left blank.

क्रियासङ्ग्रहव्याख्या.

KRIYĀSAṄGRAHAVYĀKHYĀ.

A commentary on the Kriyāsaṅgraha, which work has been described under R. No. 4421 ante.

Contains the first part complete and the second part incomplete.

Beginning:

गुरुध्यानेन सम्बन्ध(द्ध)हृदयाम्बुरुहा मया ।
क्रियासङ्ग्रहसंप्रोक्तं क्रियामात्रं विलिख्यते ॥

श्राद्धापुरस्सरेति । श्राद्धदिवसनिर्णयार्थं तच्चन्द्रगणनं श्राद्धचन्द्रगणनम् । आदिशब्देन छायाचक्रार्धादिगणनमुक्तम् । नीत्वेति । मध्यं चन्द्रतुङ्गयो रवेश्चेति शेषः । तिथिनिर्णये रविमध्यमोऽपि कार्यः । उरुधराद्याप्तहीने पुनरपि बन्धशेषं विन्यस्योरुधराप्तफलं चन्द्रस्य लिप्ताभ्यश्शोधयेत् । पुनर्विकलामप्यानीय विकलाभ्यश्शोधयेत् ।

* * * *

Colophon:

इति क्रियासङ्ग्रहव्याख्याने पूर्वभागस्समाप्तः ॥

तत्कालेतिच्छायागणनम् । तत्कालायनसंस्कृतार्कभुजतः क्रान्तिं चरं चानयेत् । क्रान्त्यूनानवमान् महागणमपि । साधुज्या इति योजना । जननमुहूर्तादिकालस्तत्कालः ।

End:

सिंहे मासीति । श्रीकृष्णपूजादि या(वद)नन्त(व्रत)माहात्म्यं च यदहनि त्वहोरात्रमुक्तम् । न दिवामात्रमिदं रोहिण्या अष्टमीयुतं दिनं तद्योगः तयोरष्टमीरोहिण्योर्योगमुखं सूर्या.

R. No. **4430.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 28. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Kūtalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

Foll. 27 and 28 are left blank.

ध्वन्यालोकलोचनव्याख्या.

DHVANYĀLŌKALŌCANAVYĀKHYĀ.

Similar to the commentary described under R. No. 2680 ante.

Contains the third Uddyōta incomplete.

Beginning:

वाक्यप्रकाशगतपौर्वापर्यनिरूपणमनुपसंहृत्य तादृशप्रकाशे तन्निरूपणमसङ्गतमित्याशङ्क्य वृत्तानुवादपूर्वकमवतारयति— एवमिति । उपसंहारोऽर्थसिद्ध इति भावः । वाक्यप्रकाशमिति वृत्तौ साक्षादनिर्देशात् सुग्रहत्वार्थमुक्तम् । पदप्रकाशमिति शब्दशक्तिमूलमित्यनुषङ्गः ।

End:

वक्रिच्छानुमितो विषयः न वाच्यत्वेन प्रतीयते चेत् कथं तर्हि तत्प्रतीतिप्रश्न उत्तरमुक्तमुपाधित्वेनेति । तदुपाधिशब्दस्यार्थान्तरभ्रमं व्यावर्तयन् व्याचष्टे—वक्रिच्छेति । उपाधिशब्दो व्यवच्छेदकपर्याय इति भावः । आदिशब्दाल्लक्ष्यादिः । अतो न वाच्यद्वारा लिङ्गं व्यङ्ग्ये प्रसरेदित्युक्तमिति भावः ।

R. No. **4431.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of the Raja of Chirakkal, Malabar district.

तत्त्वार्थाधिगमकारिका.

TATTVĀRTHĀDHIGAMAKĀRIKĀ.

Foll. 1*a*—13*a*.

Kārikās based on the Tattvārthādhigamasūtras which elucidate the chief principles of Jainism.

Contains the Adhyāyas one to five and eight complete and a small portion in the tenth Adhyāya.

Beginning:

सन्तु गोविद्द(वलगोदेव्व)सिहामणिकिरणकळवारुणचरणणहकिरणम् ।
विमळच(अ)रणेमिचद्दं तिहुप(व)णचद्दंण्णमस्सामि ॥
(वल्गद्देवशिखामणिकिरणकलावा(पा)रुणचरणनखकिरणम् । ?
विमलकरनेमिचन्द्रं त्रिभुवनचन्द्रं नमस्यामि ॥)
अवगयणिवारणाट्ठं वयदस्स परूपणाणिमित्तंच्च ।
संसअविणासणट्ठं तच्चत्तवदारणट्ठं च ॥
(अप्रस्तुतनिवारणार्थं प्रस्तुतनिरूपणानिमित्तं च ।
संशयविनाशनार्थं तत्त्वार्थावधारणार्थं च ॥)

* * * *

Colophon:

इति प्रथमोऽध्यायः ॥

End:

घादिण्णि चमसादण्णी राज्ञ ऊणरयतिरि यदुगजा ।
विसट्ठाणसंहादिणद्दुपणपण गच्च वण्णच्च ॥

Colophon:

इति अष्टमोऽध्यायस्समाप्तः ॥

अपरब्बा साहिजम्मिच्छिण्णबन्धकारणं विसमम् ।
जं हुति एतु अब्धा तस्सोखदुंखमेव सद्दा ॥
जं च काम सुह लोए जोच्च तिब्बम्महासुहम् ।
वीयराअसुहद्दमणं दब्भागव्विणव्वदि ॥

Colophon:

इति दशमोऽध्यायस्समाप्तः(?) ॥

Foll. 13*a*—15*a* contain the Chāyā portion of the first two Adhyāyas. Foll. 15*b*—16*b* are left blank.

R. No. **4432.**

Paper. 10⅝ × 9½ inches. **Foll.** 86. **Lines,** 20 in a page. Dēvanāgarī. **Good.**

Transcribed in 1924–25 from a MS. of M.R.Ry. Paliyathu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

Foll. 85*b*—86*b* are left blank.

अनर्घराघवव्याख्या.

ANARGHARĀGHAVAVYĀKHYĀ.

Similar to the commentary described under No. 12442 of the D.C.S. MSS., Vol. XXI.

Contains from the middle portion of the III Act and a small portion in the beginning of the IV Act.

Beginning:

तत इति । परिषत्पतित्वाज्जनकस्य पुरः प्रवेशः । द्वन्द्वभावश्च विश्वामित्रशतानन्दयोः रामलक्ष्मणयोश्च सावर्ण्यानुरागप्रयुक्तः । हर्षातिशयप्रयुक्तं जनकस्य प्रथमवचनम् । स च परस्तात्स्पष्टीभविष्यति । भगवन्तोऽपरैर्वाच्या विद्वद्देवार्षिलिङ्गिनः । इत्युक्तत्वाद्भगवच्छब्देन सम्बोधनम् ।

* * * *

लुप्तपन्नित्यादि । दुहितृवात्सल्यादनुरूपजामात्रदर्शनदुःखितस्य जामातृभाविरामप्रत्यासत्त्या नष्टशुचः शुङ्नाशमपि मुनिबहुमत्या तद्वैभवकृतमेव साशङ्कं मन्वानस्य जनकस्योक्तिरियम् । अद्य बहोः कालादिति भावः । वर्तमानकालिकत्वं तु सुदिनायत इति लण्णिर्देशात्सिद्धम् । अयमिति ।

End:

ननु रघुवंशभवा विप्रे शस्त्रं न गृहीतवन्तः अत आह—नेति । चशब्दात्प्रपौत्रश्च । मम पितृपितामहप्रपितामहा न रघुकुलभवाः; किं तु अन्यवंशभवा एवेत्यर्थः । ननु धैर्याभावकृता दुष्कीर्तिरापतेत् अत आह—धीरमिति । जनः यः प्रकृत्या भिन्नरुचिः कलयतु; अतिसर्गे लोट् । गुरुपरिभवदुःखोत्तरणसुखितस्य मम लोककृता गर्हा प्रशंसा च समैवेति भावः.

R. No. **4433.**

Paper. 10⅝ × 9½ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of Gōdavarma-Raja Avargal, Chelur, Trichur, Cochin State.

Fol. 20*b* is left blank.

तत्त्वप्रकाशः, सव्याख्यः.

TATTVAPRAKĀŚAḤ WITH COMMENTARY.

Same work as that described under R. No. 3914 ante. By Aghōraśivācārya.

Complete.

R. No. **4434.**

Paper. 10⅝ × 9½ inches. Foll. 68. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of Gōdavarma-Raja Avargaḷ, Chelur, Trichur, Cochin State.

Fol. 68*b* is left blank.

स्कन्दसद्भावः.

SKANDASADBHĀVAḤ.

A treatise in 18 Paṭalas dealing with the procedure to be adopted in consecrating the image of Skanda or Subrahmaṇya and other details connected therewith.

Contains the Paṭalas 1—18 complete :

१. सङ्ग्रहवर्णनम्.	१०. प्रतिष्ठाविधिः.
२. स्कन्दसम्भवः.	११. प्रतिमालक्षणम्.
३. मन्त्रोद्धारः.	१२. स्नपनविधिः.
४. अर्चनाविधिः.	१३. उत्सवविधिः.
५. अग्निकार्यविधिः.	१४. बलिकर्मविधिः.
६. दीक्षालक्षणम्.	१५. प्रायश्चित्तविधिः.
७. समयाचारलक्षणम्.	१६. यात्रालक्षणम्.
८. प्रासादलक्षणम्.	१७. गृहप्रवेशविधिः.
९. अधिवासविधिः.	१८. समुदायविधिः.

Beginning :

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
सुखासीनं महेशानं नन्दीशः परिपृच्छति ॥
भगवन् ज्ञातुमिच्छामि स्कन्दसद्भावमुत्तमम् ।
पुरातनं महत्पुण्यं शास्त्रं लोकेषु दुर्लभम् ॥

महेश्वर उवाच—

शृणु लोकहितार्थं मे तन्त्रमेतदशेषतः ।
श्लोकैर्द्वादशसाहस्रैर्मुनीनां कथितं पुरा ॥

सङ्क्षेपात्तव वक्ष्यामि स्कन्दसद्भावमुत्तमम् ।
अध्यायाष्टादशोपेतं स्कन्दसद्भावसंयुतम् ॥
प्रक्रियाभिश्च सहितं तन्त्रं सर्वार्थसाधकम् ।
सङ्ग्रहः प्रथमाध्यायो द्वितीयस्सम्भवः स्मृतः ॥
मन्त्रोद्धारस्तृतीयस्तु चतुर्थोऽर्चनसंज्ञितः ।
पञ्चमस्त्वग्निकार्याख्यः षष्ठो दीक्षाविधिस्तथा ॥
सप्तमस्समयाचारः प्रासादविधिरष्टमः ।
नवमस्त्वधिवासाख्यः स्थापनाख्यस्ततः परम् ॥
तत्परं प्रतिमाध्यायो द्वादशस्त्रपनाह्वयः ।
त्रयोदशश्चोत्सवाख्यो बलिकर्म ततः परम् ॥
प्रायश्चित्तः पञ्चदशो यात्राख्यष्षोडशः स्मृतः ।
प्रवेशाख्यस्सप्तदशः समुदायस्ततः परम् ॥
इत्येष सङ्ग्रहः प्रोक्तस्तन्त्रस्यास्य तवाधुना ।

Colophon:

इति स्कन्दसद्भावे सङ्ग्रहाध्यायः प्रथमः ॥

End:

गुप्तिभिः स्थापयेत्सर्वमगुप्तं नाशयेन्नरम् ।
तस्मात्सर्वप्रयत्नेन गोप्यमेतत्सदा बुधैः ॥
यः पठेच्छृणुयाद्वापि श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तो मम लोके महीयते ॥

Colophon:

इति स्कन्दसद्भावे अष्टादशः पटलः ॥

R. No. **4435.**

Paper. 10⅝ × 9½ inches. Foll. 130. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. belonging to the Naḍuvil-Maṭham, Trichur, Cochin State.

Foll. 129*b* and 130 are left blank.

बृहदारण्यवृत्तिसम्बन्धोक्तिः.

BṚHADĀRAṆYAVṚTTISAMBANDHŌKTIḤ.

Same work as that described under R. No. 2755 ante, wherein see for the beginning. By Viśvānubhava, pupil of Pratyagbōdhapūjyapāda.

Contains from the middle portion of the fourth Brāhmaṇa of the third Adhyāya, to the end of the third Adhyāya and a small portion in the beginning of the fourth Adhyāya.

End:

तर्हि निरङ्कुशं भिन्नाभिन्नत्वमस्त्विति चेन् एवं त्वया किमिति परिकल्प्यते? तथा ज्ञात्वोपासनार्थमिति चेत् तन्न शक्यमित्याह—

न चापि सर्वसामान्यविशेषार्थावबुद्धये ।
कश्चिदप्यधिकार्यस्य कृत्स्नेऽपि जगतीदृशे ॥ इति ।

भिन्नाभिन्नपक्षदूषणमुपसंहरति—

न वेदार्थो न चापीदृक् तर्केणाभ्युपपद्यते ।
भिन्नाभिन्ने क्षणं सर्वं यथोक्तन्यायवर्त्मना ॥ इति ॥

Colophon:

इति श्रीमत्प्रत्यग्बोधपूज्यपादशिष्येण भगवता विश्वानुभवाख्येन विरचितायां सुरेश्वरवार्त्तिकसम्बन्धोक्तौ तृतीयोऽध्यायस्समाप्तः ॥

वृत्तं सङ्कीर्तयति सम्बन्धप्रतिपादनाय—

तद्धेह(द)मित्यविज्ञातप्रत्यक्तत्त्वादिदं जगत् ।
रज्ज्वास्सर्पादिवज्जातं नामरूपक्रियात्मकम् ॥

इति । एषोऽर्थः तद्धेदं तर्ह्यव्याकृतमासीदित्यत्राज्ञातात् प्रत्यगात्मनो रज्जुसर्पवज्जगज्जातमित्युक्तामिति । उक्तार्थ आप्तवाक्यमुदाहरति प्रमाणत्वेन—

अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता ।
सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः ॥ इति ।

अज्ञातप्रत्यगात्मविवर्तत्वेन जगतोऽनर्थत्वं किम्.

R. No. **4436.**

Paper. 10¾ × 9½ inches. Foll. 42. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Paliyathu Valiya Acchan, Chennamangalam, Parur post, Cochin State.

Fol. 42 is left blank.

महाभाष्यव्याख्या.

MAHĀBHĀṢYAVYĀKHYĀ.

A commentary on Patañjali's Mahābhāṣya, which work has been described under Nos. 1285—1291 of the D.C.S. MSS., Vol. III.

Contains the Paspaśāhnika portion incomplete.

Beginning:

येनात्मस्मृतये लभेत निखिलान् सर्वत्र वा(?) पुस्तका-
न्यैर्यानैरिव(मानैरव ?)गाह्यतेऽतिविषमो भाष्याम्बुधिस्तानिति ।
संक्षेपेण च कोमलैश्च वचनैरुद्धृत्य तस्मादिमान्
सिद्धान्तस्य लवांश्चिनोमि बहुषु स्थानेषु लब्धास्पदान् ॥
स्यादेतत्कृत इह सारसङ्ग्रहो वै
सत्यं स त्वनुहरते न भाष्यनीतिम् ।
आस्तां वा प्रतिपुरुषं रुचेः प्रभेदात्
सन्तोषो न खलु समेति तावता नः ॥

अथ शब्दानुशासनम्—

अथशब्दोऽयमधिकारद्योतनार्थः । शब्दानुशासनं नाम शास्त्रमधिकृतं प्रस्तुतमित्यर्थः । रूढिशब्दोऽप्ययं शब्दानुशासनशब्दोऽवयवार्थानुगतः सप्तपर्णादिवत् । तेन शब्दा अनुशिष्यन्ते येन यत्र वा तच्छास्त्रं व्याकरणमेव शब्दानुशासनमुच्यते ।

* * * *

गतमुक्ताश्शब्दे दर्शनभेदाः पदार्थविकल्पो, वाक्यार्थविकल्पो, वाक्यविकल्पश्चेति प्रातिपदिकसंज्ञायां प्रस्तावायान्वा(नुवा)को दर्शयितव्य इति इह नोक्तः ॥

Colophon:

इति शब्दाधिकारः ॥

किं पुनरस्यानुशासने फलम् ? इह हि लौकिकानां वैदिकानां चान्वाख्यानं प्रतिज्ञायते । तत्र वैदिकास्तावत्प्रतिनियतप्रातिशाख्या विशिष्टरूपास्तदध्यायिनामेवाविच्छिन्नपारम्पर्यादविपरीतस्वरूपाः सिद्धाः ।

End:

इदमेव मात्रग्रहणं कर्मणि द्वितीयेत्यादेर्मदुक्ताकारनियमत्वे मानम् मात्रग्रहणाच्च सूत्रकारस्य प्रत्ययनियमपक्ष एवाभिमत इति गम्यते । तद्-

करणलाघवेन तु कर्मणि द्वितीयैवेत्यर्थानियम उक्तो भाष्यादौ । स्पष्टं चेदं सर्वं भाष्य इति भाष्यप्रदीपोद्द्योते निरूपितमित्याहुः.

R. No. **4437.**

Paper. 10⅝ × 9½ inches. Foll. 18. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. D. Rāmakṛṣṇa-brahma Śāstri, Repalli, Guntur district.

Fol. 18*b* is left blank.

कृष्णरक्षोविजयः.

KṚṢṆARAKṢŌVIJAYAḤ.

Relates to the controversy between the Niyōgin and Vaidika sects of Brahmans of the Telugu country. One Kṛṣṇa, a leader of Niyōgins, defeated by the opposite party, is personified as a demon and so the work under notice is named "the conquest of demon Kṛṣṇa". By Lakṣmīnārāyaṇadīkṣita.

Contains the first Prakaraṇa complete.

Beginning:

नत्वा कृष्णं महादेवं व्यवहारप्रचोदकम् ।
हत्वैतन्नामकं रक्षो व्यवहारविघातुकम् ॥
वेदव्याकृतिधर्मार्थशास्त्राभिज्ञेन धीमता ।
लक्ष्मीनारायणाख्येन दीक्षितेनेशमन्त्रिणा ॥
नियोगिशिखरेणाद्य व्यवहारविदा मुदा ।
व्यवहारविचारोऽयं प्रश्नोत्तरविभागतः ॥
नियोगित्वस्य सिद्ध्यर्थं श्रद्धालुव्यवहारिणाम् ।
उपदेशाच्चासुराणां वाक्यसिद्धान्तशीलिनाम् ॥
* * * *
ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः ।
जातिमात्रोपजीवी यः स ब्राह्मण इतीरितः ॥
गर्भाधानादिसंस्कारैर्वेदोपनयनैर्युतः ।
नाध्यापयति साधीतस्स भवेत् ब्राह्मणब्रुवः ॥
नामधारकविप्रास्तु वेङ्कन्नाद्याः स्मृता अमी ।
पर(रे)वेङ्कटसाम्याद्या ब्राह्मणब्रुवसंज्ञिकाः ॥

लक्षणद्वयसद्भावात् कृष्णस्तत्परिपालकः ।
उपदेष्टुर्विश्वपतेर्विजयात् क्रोधमूर्छितः ॥

End:

अब्रवीत्केशवोऽप्येवं व्यवहारनिरूपणम् ।
कृतं विस्तरतस्सर्वं द्रष्टुं राज्ञः प्रवर्तनम् ॥
श्रोतुमिच्छामि सकलं धर्मशास्त्रप्रचोदितम् ।
इत्युक्ते तु द्वितीये हि(ऽहि) तद्वक्ष्यामि सविस्तरम् ॥
उक्ते पुनः पुनः कार्यं सयुक्तिकविमर्शनम् ।
वक्ष्यमाणस्य तात्पर्यमपि विज्ञायते स्फुटम् ॥

Colophon:

इति श्रीलक्ष्मीनारायणदीक्षितविरचिते कृष्णरक्षोविजये व्यवहारविचारो नाम प्रथमं प्रकरणम् ॥

R. No. **4438.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 6. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. D. Rāmakṛṣṇa-brahma Śāstri, Repalli, Guntur district.

Fol. 6*b* is left blank.

वात्स्यायनसंहिता.

VĀTSYĀYANASAṂHITĀ.

Gives the origin and other particulars regarding Ṣaṭsāhasrikas, also known as Āruvēlu sect of Brahmans, of the Telugu country.

Contains the Adhyāyas I and II only.

Beginning:

उन्नमय्य मदात्तुण्डं कर्णराट्(ष्ट्र)समीपतः ।
उन्नजानुचरं भूमौ भिन्ननागाननं भजे ॥
वात्स्यायनो मुनिश्रेष्ठस्सर्ववेदविदां वरः ।
द्वापरे वरयामास चातुर्वर्ण्यवराङ्गनाः ॥
उद्वाहयामास ततः शास्त्रोक्तविधिना मुनिः ।
ब्राह्मण्यां जनयामास शतपुत्रान् महामुनिः ॥

क्षात्रिया जनयामास तस्माद्विंशतिनन्दनान् ।
वैश्यस्त्री जनयामास तस्माद्विंशतिनन्दनान् ॥
शूद्रस्त्री जनयामास तस्माद्विंशतिनन्दनान् ।
ब्राह्मणीजातपुत्रांस्तान् वात्स्यायनमहामुनिः ॥
आहूयाथाब्रवीत् प्रेम्णा सर्वे यूयं ममाज्ञया ।

* * * *

एवमष्टविधास्संज्ञाः प्राप्य यूयं महीभृताम् ।
अतिप्रेमसमायुक्ता भविष्यन्ति(थ) न संशयः ॥

Colophon:

इति वात्स्यायनसंहितायां प्रथमोऽध्यायः ॥

End:

कञ्चुकोष्णीषवेषाश्च राजनामाङ्कितास्तथा ।
तत्तद्देशीयभाषाणां लेखका अभवंस्ततः ॥

मुनिशेखरः—

कस्माच्चित्कारणाद्विप्रा देशभाषाविशारदाः ।
षट्साहस्रिका यूयं भविष्यन्ति(थ) कलौ युगे ॥
तेल्ङाश्च पाकलाश्चेति नन्दाश्च वडुगास्तथा ।

Colophon:

इति वात्स्यायनसंहितायां द्वितीयोऽध्यायः ॥

R. No. **4439.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 10. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Kṛṣṇa Nambūdiri Vaidikan, Tekkattu-mana, Kumaranallur post, Malabar district.

Fol. 10 is left blank.

चयनप्रयोगः.

CAYANAPRAYŌGAḤ.

Similar to the work described under Nos. 1130 and 1131 of the D.C.S. MSS., Vol. II.

Incomplete.

Beginning:

अथेमे अग्निचयास्तेषां मूमेः परिमाणं विहारात्वा(न्व्या)ख्यास्यामोऽथाङ्गुलिप्रमाणं चतुर्दशाणवश्चतुस्त्रिंशतिस्ति(त्ति)लाः पृथुसंश्लिष्टा इत्यपरं दशाङ्गुलं क्षुद्रपदं द्वादशा(ङ्गुलं) प्रादेशप्रथमोत्तरे युगे त्रयोदशिके पदं

* * * *

पञ्चरत्निः पुरुषो व्यायामं चतुररत्निर्व्यायामश्चतुरश्रं चिकीर्षन् यावच्चिकीर्षेत्तावतीं रज्जुमुभयतः पाशां कृत्वा मध्ये लक्षणं करोति ।

End:

अथापरः पुरुषस्य षोडशीभिः विंशं शतं सारत्नि प्रादेशास्सप्तविधः सम्पद्यते । तासां पञ्च षोडशीरपोद्धृत्य शेषाः परिमण्डलं करोति । तदुत्तरेण द्रोणचिता व्याख्यातम् । य(I): पञ्चषोडशिन्यः । ताभिरवान्तरदिक्षु पटानुन्नयेत् । शिरसः पुरस्तात् तासां परिकर्षणं व्याख्यातम् । प्रथीनां सप्तविभागाः प्रथिमध्यमाः प्रक्रमास्सम्भवन्ति । (य)दतिरिक्तं सम्पद्यते । तच्चतुरश्राणां मध्यमादिभिः योयुज्येतापरस्मिन् प्रस्तारे पदानां शि.

R. No. **4440.**

Paper. 10⅝ × 9½ inches. Foll. 190. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. belonging to the Sanskrit College Library, Tiruppanittura, Cochin State.

Foll. 189*b*—190*b* are left blank.

अष्टाङ्गहृदयव्याख्या— हृदयबोधिका.

AṢṬĀṄGAHṚDAYAVYĀKHYĀ : HṚDAYABŌDHIKĀ.

Same work as that described under R. No. 2898 ante, wherein see for the beginning. By Śrīdāsapaṇḍita, pupil of Vāsudēva.

Contains the Adhyāyas XI—XXIX complete and Adhyāya XXX incomplete in the Sūtrasthāna.

End:

इतीदं व्रणमाश्रित्य दिङ्मात्रमुपदर्शितम् ।
उत्तरे विस्तरस्तस्य वक्ष्यते साधनं प्रति ॥ इति ॥

Colophon:

इति हृदयबोधिकायामेकोनविंशोऽध्यायः ॥

शास्त्रकर्मप्रसङ्गादाग्निविधिमाह । अयमपि शास्त्रकर्मविधिरेव । अथ वा शास्त्रसाध्येषु विधिमुक्त्वा शास्त्रदुष्करेषु आराग्न्योर्विधिमाहेति सम्बन्धः। हाटकोऽप्याह—यथैव भेषजविषयमतिक्रान्ते शास्त्रस्योपयोगस्तथानुशास्त्र-सामान्यादाराग्न्योरपि । अतस्तद्विज्ञानार्थमध्यायारम्भ इति ।

* * * *

अत्रेत्यादि । यस्मादत्रास्मिन् स्थाने अर्थास्सूत्रिताः । किम्भूताः सूक्ष्मास्तीक्ष्णतरमतिसमधिगम्याः । सर्वतस्सर्व(स्मि)न् तन्त्रे प्रतन्यन्ते विस्तार्यन्ते । तस्मादिदं स्थानं तन्त्रसम्बन्धना(सा)मान्य . . . सा नाना-रहस्यवदित्यक्तमिति वचनं हि इति तन्त्रस्य हृदयं सूत्रं समाप्तम् ॥

R. No. 4441.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 641. Lines, 20 in a page Grantha. Good.

Transcribed in 1921–25 from a MS. of M.R.Rv. K. Śrīnivāsayyaṅ-gār, Srirangam, Trichinopoly district.

Fol. 641 is left blank.

Bound in three volumes.

नानार्थकल्पवल्ली.

NĀNĀRTHAKALPAVALLĪ.

A treatise on Viśiṣṭādvaita Vēdānta: by Vēṅkaṭabhaṭṭar, eldest son of Aliśiṅgiri Bhaṭṭar of Parāśarabhaṭṭar family and Hāritagōtra.

Deals with the following subjects :—

१. जीवप्रकरणम्.	३. उपायप्रकरणम्.
२. ईश्वरप्रकरणम्.	४. फलप्रकरणम्.

Complete.

Beginning :

यन्नानाविधनामरूपतनुभाग्जीवाख्यसस्यावहं
नोप्तं कैर्न च सिक्तमम्बुभिरदः कालेन नो जीर्यते ।
नाप्यार्द्रीक्रियते जलेन न च वै सन्दह्यते वह्निना
तत्सर्वस्य निदानमन्तरहितं ब्रह्माख्यबीजं नुमः ॥

श्रीरङ्गेशयमिन्दिरेशमनघं सौशील्यसौलभ्यवा-
ज्ञानादिप्रमुखैर्गुणैश्चिश्रतमनेकाजाण्डकोट्याश्रयम् ।

जन्मादेर्जगतो निदानमपरं तोष्टूयमानं मुहु
र्वेदैर्देवशरण्यमार्तशरणं श्रीरङ्गनाथं भजे ॥

* * * *

विष्वक्सेनं प्रणौमि श्रितभरणधुरीणामरप्रख्यमीषद्-
ध्यानप्रध्वस्तविघ्नं दुरिततातिमः प्रौढभास्वत्प्रकाशम् ।
श्रीमत्यास्सूत्रवत्याः प्रणयसहचरं वेत्रहस्तं दिवौक-
स्सेनासंरक्षणैकव्रतममितगुणं श्रीपतेर्द्वारपालम् ॥

पूर्वाचार्यप्रवेशप्रथितमहिमवज्ज्ञानदीपप्रकाश-
प्रध्वस्ताज्ञानगन्धप्रमुखशठजितं नाथपद्माक्षरामान् ।
श्रीमद्योगि(प्रगीत)प्रवरगुणवद्या(गणान् या)मुनाचार्यमुख्य-
श्रीपूर्णार्य(प्रसाद)प्रथितयति(व)रान्मुख्यकान् नौमि चार्यान् ॥

ध्याये मामकपापसंहतितमः प्रागल्भ्यनिर्धूनन-
प्रौढोद्द्योतदिवाकराभममलं वादीभपञ्चाननम् ।
आचार्यं परमं पराशरकुलाकूपारचन्द्रायित-
श्रीमद्वेङ्कटभट्टराद्यतनयं श्रीशिङ्गभट्टारकम् ॥

नत्वार्यान् स्वपितृननन्तसुगुणस्फातिप्रभाभासुर-
श्रीमद्वेङ्कटभूधराख्यमनिशं सेवेऽद्य विद्यागुरुम् ॥

श्रीमद्भाष्यमुखप्रबन्धनिवहप्रायामृतप्रापण-
प्रेङ्खद्वार्षिकमेघमाश्रितजनत्राणैकदीक्षाधरम् ॥

आर्यानेतान् प्रणम्य प्रणिहितमनसा साधु साधूचितार्थान्
सङ्गृह्यातीव रम्यां सपदि विरचयत्यार्यहृद्यानवद्याम् ।
नानार्थाकल्पवल्लीं श्रितलषितददां वेङ्कटाचार्यधीमान्
पुष्णात्येनां प्रगल्भा उपचरत सुधासादरं सोदराभाः ॥
जीवेशोपायसाध्यैः प्रकरणसदृशैर्गुच्छरूपैश्चतुर्भि-
र्युक्ते सर्वैर्हितेऽस्मिन् स्मृतिशतविहिते कल्पवल्लीसमाख्ये ।
ग्रन्थे जीवस्य गुच्छे प्रथम इह पुनश्शास्त्रमानादिकार्थान् (:)
तन्यन्ते संसृतौ हि प्रचुरमतिजुषां ज्ञानलाभोदयाय ॥

अथैतद्ग्रन्थारम्भावश्यप्रयोजनमाह—

ननु नारायणो देवः पुरा वटदलेशयः ।
जगत्येकार्णवीभूते महति प्रलये सति ॥

* * * *

नानार्थकल्पवल्ली विषयैः पुष्पैस्तनोति विज्ञानाम् ।
गुच्छयुतैस्सुगुणयुतैस्सुमनोहद्यैर्विशेषतो मोदम् ॥
तेषां हि जीवगुच्छैर्विषयाणां शास्त्रमानतादीनाम् ।
मोदाय सर्वविदुषामनुक्रमः कथ्यते चात्र ॥

विषयानुक्रमः—

शास्त्रप्रामाण्यकथनं चेतनस्य निरूपणम् ।
अचेतनेष्वपि तथा जीवस्य प्रतिपादनम् ॥
जीवादीनां रथित्वादिरूपणं प्रकृतेः पुनः ।
सङ्गाज्जीवस्य दौर्गुण्यं भेदसंसरणक्रमौ ॥

* * *

शास्त्रप्रामाण्यजीवप्रकटनरथिताभेदसंसारगर्भ-
स्वप्रायान्ताद्यवस्थानरकनरजनुर्दुर्लभत्वादयश्च ।
पिण्डोत्पत्तिद्विजादिप्रहितबहुतराचारमुख्यास्तथैव
प्रायश्चित्तप्रधानाः कलिपुरुषगुणा जीवसंज्ञे हि गुच्छे ॥

* * * *

श्रीमद्वटपराशरान्वयपयःपाथोधिचन्द्रायित-
श्रीमच्छिङ्गरिभट्टरार्यतनुजज्येष्ठः सतां सेवकः ।
नाम्ना भट्टरुवेङ्कटाख्यविबुधो नानार्थवल्ल्याह्वय-
ग्रन्थे जीवगुलुच्छमादिममुं रम्यं समाजिग्रथत् ॥

Colophon :

इति श्रीहारीतकुलतिलकश्रीरङ्गराजदिव्याज्ञालब्धश्रीपराशरनामधेयश्रीपराशरभट्टारकवंशदुग्धपारावारशरद्राकाशशाङ्कायमानश्रीमदलशिङ्गरिभट्टारकाग्रतनयेन वेङ्कटभट्टराचार्यनाम्ना श्रीवैष्णवदासेन परिपोषितायां नानार्थकल्पवल्ल्यां जीवप्रकरणं नाम प्रथमो गुलुच्छः ॥

* * * *

श्रीमद्वट्टरुशिङ्गरार्यतनयश्रीवेङ्कटाभिख्यकः
श्रीमद्वैष्णवभक्त एष विषयान् नानार्थवल्ल्याह्वय ।
ग्रन्थे चेश्वरगुच्छके निरदिशत्सिद्धान्तघण्टापथ-
प्रेङ्खाजाङ्घिकवैष्णवेन्द्रविबुधा हृष्यध्वमेतेन हि ॥

Colophon:

इति श्रीहारीतकुलतिलक (. . .) श्रीमदलशिङ्गरिभट्टारकाग्रतनयेन वेङ्कटभट्टराचार्यनाम्ना श्रीवैष्णवदासेन परिपोषितायां नानार्थकल्पवल्ल्या-मीश्वरप्रकरणं नाम द्वितीयो गुलुच्छः ॥

लक्ष्मीलक्ष्मीशचरणद्वन्द्वं गुरुपुरस्सरम् ।
प्रणम्य वेङ्कटाख्येनोपायप्रकरणं त्विदम् ॥
ग्रथ्यते ह्यत्र विषया मोक्षोपायास्सतां मताः ।
पञ्चीकरणमाद्यं स्याद् द्वितीयं योगलक्षणम् ॥

* * * *

गुरुमन्त्रत्यागदोषः शिष्यलक्षणमेव च ।
तापः पुण्ड्रविधिश्चैव सपादं पुण्ड्रमेव च ॥
तिर्यगच्छिद्रपुण्ड्रस्य त्यागश्श्रीचूर्णधारणम् ।
नाम मन्त्रो याग इति संस्काराः पञ्च चोदिताः ॥

Colophon:

इति श्रीहारीतकुलतिलक(. . .)श्रीमदलशिङ्गरिभट्टारकाग्रतनयेन वेङ्कटभट्टराचार्यनाम्ना श्रीवैष्णवदासेन परिपोषितायां नानार्थकल्पवल्ल्यामुपाय-प्रकरणं नाम तृतीयो गुलुच्छः ॥

End:

भूगोलादिवि(वि)चारश्च श्रावैकुण्ठनिरूपणम् ।
वैकुण्ठनाथस्य पुनः स्वरूपव्यूहवर्णनम् ॥
स्वर्गामिनस्तदासेश्च कारणानि तथैव च ।
मुक्तानामर्चिरादिश्च गतिस्संप्रोदिता तथा ॥

फलप्रकरणे ह्यस्मिन् विषया गदिता अमी ।
ग्रन्थेऽस्मिन् सर्वविषयश्रवणादधिकारिणः ॥
ज्ञानं विरक्तिसहितमुदेत्यज्ञानमेव च ।
अपैति सहसा सूर्ये ह्युदिते तु यथा तमः ॥

* * * *

कामिनां काम्यफलदो निष्कामानां परं पदम् ।
ददाति सर्वदा विष्णुस्तुष्टोऽनेन श्रिया सह ॥
हारीतान्वयदुग्धवार्धिविलसच्छ्रीशिङ्गभट्टारका-
ज्जातो भट्टरुवेङ्कटः पुनरमुं ग्रन्थं समाजिग्रथत् ।
ज्ञानायाविदुषां सतामपि परीतोषाय दोषाय सं
सारे सर्वशरीरिणां भगवतो मोदाय भूयादयम् ॥
एषा नानार्थकल्पद्रुमसुमरचिता कल्पवल्ल्याह्वयेयं
माला भक्तेष्टबन्धोस्सुगुणमणिगणस्फातिसुक्षीरसिन्धोः ।
श्रीरङ्गेन्दोः . . . पदकिसलयद्वन्द्वविन्यासधन्या
लक्ष्मीयुक्तस्य तस्य प्रचुरतममुदे साम्प्रतं बोभवीतु ॥

Colophon :

इति श्रीहारीतकुलतिलकश्रीरङ्गराजदिव्याज्ञालब्धश्रीपराशरनामधेय श्रीमदलहशिङ्गिरिभट्टारकाग्रतनयेन वेङ्कटभट्टरार्याचार्यनाम्ना श्रीवैष्णवदासेन परिपोषितायां नानार्थकल्पवल्ल्यां फलप्रकरणं नाम चतुर्थो गुलुच्छः ॥

R. No. 4442.

Paper. 10⅝ × 9½ inches. Foll. 54. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of the Raja of Chirakkal, Baliapatam, Malabar district.

Fol. 54*b* is left blank.

मुहूर्ताभरणम्.

MUHŪRTĀBHARAṆAM.

Similar to the work described under R. No. 545 ante. By Dāmōdara, younger brother of Kēśava, who were the brother's sons of Dāmōdara and grandsons of Yajña Śarman of Bhāradvājagōtra and inhabitants of Chellur, a village in the Malabar district.

Contains the Adhyāyas one to nine complete.

Beginning:

दिनकरनयने समङ्गलेन्दौ सगुरुसितासितभोगिबद्धमौलौ ।
ग्रहभगणशिवे बुधाप्तमूर्तौ सकलफलै रमतां मनस्सदा मे ॥
यस्य प्रसादेन जयन्ति सर्वे निरामया निर्मलकीर्तिभाजः ।
तमादिभूतं परमार्थदेवं जगत्प्रकाशं प्रणतोऽस्मि सूर्यम् ॥
कालेन चन्द्रादिभिरुज्ज्वलेन विशुद्धदोषेण विधानरत्नैः ।
युक्तं मुहूर्ताभरणं करिष्ये मौहूर्तिकानां गलभूषणाय ॥
किञ्च स्वशास्त्राम्बुनिधौ भ्रमन्तस्सुदुस्तरेऽर्थे बहुलं निरीक्ष्य ।
एतत्लवं प्राप्य यथाप्रदेशं गत्वाप्तसाराश्शुभकर्म कुर्युः ॥

* * * *

इह खलु राश्यादीनामादौ तावत्प्रदर्श्यते संज्ञा ।
तत्तत्संज्ञा बुद्ध्वा शास्त्रार्थस्यैव बोधः स्यात् ॥
मेषाख्यः प्रथमः क्रियस्तदपरो राशिर्वृषस्तावुरु-
र्वीणाख्यो जुतुमो यमो नृमिथुनं वीणाधरश्चापरः ।
कर्की कर्कटकः कुलीर इति च स्यात्सिंहसंज्ञोऽपरो
लेयाख्यो युवतिश्च षष्ठभवनं पार्थोनमित्युच्यते ॥

* * * *

आचार्यकाव्यारशशाङ्कपुत्रा वेदाधिपाः स्युः क्रमशः प्रदिष्टाः ।
अत्रोक्तमेतन्मितमेव किञ्चित् मुहूर्तमात्रौपयिकं ग्रहादेः ॥

Colophon:

इति मुहूर्ताभरणशास्त्रे प्रथमोऽध्यायः ॥

End:

योगक्षेमं निखिलजगतां कर्तुमुच्चैर्महेशः
पूर्णैश्वर्यो विलसति यशस्स्वानुभावं प्रकाश्य ।
चेल्लराख्यो जयति स परं ग्रामवर्यः प्रसिद्धो
विप्रेन्द्राणां प्रथितयशया(सा)माश्रयः श्रीनिकेतः ॥
विष्णोः स्थानं जयति हि ततो दक्षिणस्यां दिशायां
श्वेतारण्याह्वयमिति यदा सर्वजीवोपकारी(रि) ।
यच्च प्राहुः कृतदशमुखध्वान्तविध्वंसधान्नः
त्रैलोक्याम्भोरुहरुचिकृतो भास्करस्योदयाद्रिम् ॥

तस्मात्प्राच्यां दिशि परिमिते योजनेऽस्ति द्विजानां
ग्रामो यस्मिन्वसति विमलज्ञानदायी रमेशः ।
विद्यां रक्षत्यपि मुनिवरो वाक्पतिस्सन्निधानात्
देवीं वाचः प्रथयितुमना यत्र विप्रोत्तमानाम् ॥

* * * *

तेषां विदुषां मध्ये भारद्वाजाख्यगोत्रजाता ये ।
अस्ति हि तेषां स्थानं ज्योतिर्मीमांसकेषु मुख्यानाम् ॥
दैवज्ञानामुत्तमस्तत्र जातो यज्ञाख्योऽभूद्विप्रवर्यो महात्मा ।
श्रीमान् पुत्रोऽभूच्च दामोदराख्यो लोके यस्माल्लब्धविद्याः प्रसिद्धाः ॥
तद्भ्रातृपुत्रो जगति प्रसिद्धो गुणैः स्वकीयस्य पितुस्समानः ।
जयत्यसौ केशवनामधेयः श्रुतिस्मृतिव्याकरणेष्वभिज्ञः ॥

आचार्यार्यभटीयसूत्रितमहागूढोक्तिमुक्तावली-
मालालङ्कृतयो जयन्ति विमला वाचो यदीयाः शुभाः ।
सूक्ष्मा यत्प्रतिभा च गूढगणितं निश्शेषकालक्रिया-
भूगोलं ग्रहचक्रवास्तवमिदं विश्वं स्फुटं पश्यति ॥

तस्यानुजस्शिष्यवरप्रसादमाश्रित्य दामोदरनामधेयः ।
मुहूर्तशास्त्राभरणं गुणाढ्यं विचित्रवृत्तं रुचिरं चकार ॥
संज्ञा च निर्दूषणकालशंसा दोषापवादोऽथ गुणप्रशंसा ।
बलाबलोक्तिश्च ततो निषेकाद्यावान्निषिद्धान्तमुहूर्तशंसा(?) ॥
कृषिक्रियागेहसुरप्रतिष्ठा राजाभिषेकोत्सवयानकालः ।
ततः प्रकीर्णाख्यविधिस्समस्तस्ततश्च कालोद्भवलक्षणानि ॥
इत्युक्तविधिविधानैरध्यायैर्नवभिरिव महारत्नैः ।
सुमुहूर्ताभरणमिदं सुदृशां कण्ठेषु भूषणं भूयात् ॥

Colophon :

इति मुहूर्ताभरणशास्त्रे नवमोऽध्यायः ॥

समाप्तं च मुहूर्ताभरणशास्त्रम् ॥

R. No. 4443.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 58. Lines, 20 in a page. Grantha, Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. K. C. Valiya Rājā of Kottakkal, Malabar district.

Fol. 58 is left blank.

चतुश्शती, ऋजुविमर्शिनीव्याख्यासहिता.

CATUŚŚATĪ WITH THE COMMENTARY ṚJUVIMARŚINĪ.

Same text and commentary as that described under Nos. 5616 and 5622 of the D.C.S. MSS., Vol. XII. By Śivānandayōgin. Contains a few additional stanzas at the end.

Contains the Paṭalas one to five complete.

End:

इति परमरहस्यं प्राप्तसत्सम्प्रदायं
स्फुटविवृतिविलासं श्रोमि(न्मि)षच्चक्रराजम् ।
निपुणमतिनिषेव्यं निर्गताशेषदोषं
नि(वि)वरणमकृतेदं श्रीशिवानन्दयोगी ॥

एकत्रिंशत्त्रिकद्वन्द्वतत्त्वात्मपरमेशितुः ।
पराग्रह . सृष्टचंशत्रितयं हृदयं नुमः ॥
अस्यामृजुविमर्शिन्यां नित्याषोडशिकोदधेः ।
शिवानन्दपरामृष्टं पञ्चमं पटलं गतम् ॥

इदं(यं)व्याख्या सप्तशतोत्तरा सुभगोदयसंयुक्ता श्रीमदृजुविमर्शिनी ॥

Colophon:

शिवानन्दमहाचार्येण संरचिता व्याख्या सम्पूर्णा ।

R. No. 4444.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 7. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. K. C. Valiya Rājā of Kottakkal, Malabar district.

Foll. 6*b* and 7 are left blank.

कुक्षिविद्याकल्पः.

KUKṢIVIDYĀKALPAḤ.

Deals with certain details in connexion with Kukkuṭēśvaramantra, the proper repetition of which is believed to have the power of enabling a person to bring other people under his control, etc.

Complete.

Beginning:

अथ वक्ष्ये सङ्गृहतः महतः कटकनामानमद्य मन्त्रवरणं गतादुपकारैः क्षपणकगुरुभिर्यथा पुरा—

प्रोक्तं षष्ठस्वरपरिणतं बिन्दुमत्कु(क्कु)टाख्यं
वीप्स्यै(प्सै)तद्वा पुनरपि पदं पूर्ववद्दीप्सितं तत् (?) ।
ज्ञातं भूतस्वरपरिणतं वेति मन्त्रोऽयमुक्तः
स्यादायुश्श्रीर्धनविभवसौभाग्यसम्पत्प्रदायी ॥
प्रोक्तं पञ्चदशार्णोऽयं मन्त्रः कुक्कुटदैवतः ।
समस्तदेवतातेजश्शक्तिबृंहितविग्रहः ॥

दुग्ध्वा(ग्धो)दधिमध्यगते द्वीपवरे क . भरणमयभूमौ ।
नवतरशीकरमुक्तामृदुपवनसुशीतले मनोरम्ये ॥

* * * *

ध्यात्वा कुक्कुटदेवं तं जपेद्भानुसहस्रकम् ।
तच्छतं तर्पयित्वा तु पुरश्चर्या कृता भवेत् ॥
शक्तीकृतौ टङ्कवेदौ पाशाङ्कुशधनुश्शरान् ।
एतानभ्यर्चयेन्मन्त्री पूजाकाले समाहितः ॥
पश्चा(वश्या)कर्षणविद्वेषस्तम्भोच्चाटादिकान्यथ ।
कर्माणि कुर्यादिष्टानि तन्त्रेणानेन मन्त्रवित् ॥
आलिख्य मन्त्रेण विदर्भितं तत्साध्याह्वयं तालवरस्य पत्रे ।
प्राणान्प्रतिष्ठाप्य शतं तथाष्टौ जप्त्वा धृतं चेत्स वशं प्रयाति ॥

End:

इति जपनिरतानां कुक्षिकाख्यं च लक्ष्यं
क्षपणकमनुराजः क्षिप्तभूतारिपक्षः ।
अखिलमभिहितोऽसावर्ति(र्थि)नां कल्पवृक्षः
सुरवरवरनारीरज्जुनाकृष्टिदक्षः ॥

दुरितनिवहकर्मक्षोषणे सर्वभक्षः
प्रणतसुजनरक्षाशिक्षितताम्रपक्षः ।
अवतु विभुरनेकोदि(द्रि)क्तदानैकदक्षः
स भवतु भुवि साक्षात् कुक्षिकाख्यासदक्षः ॥

Colophon :

इति कुक्षिविद्याकल्पस्समाप्तः ॥

R. No. **4445.**

Paper. $10\frac{5}{8} \times 8\frac{1}{2}$ inches. Foll. 15. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. K. C. Valiya Rājā of Kottakkal, Malabar district.

(*a*) **सुभगोदयवासना.**

SUBHAGŌDAYAVĀSANĀ.

Foll. 1*a*—10*a*.

A treatise in 70 Sūtras dealing with Śāktism : by Śivānanda Complete.

Beginning :

यस्मिन् सृष्टिस्थितिध्वंसविधाभा(ना)नुग्रहात्मकः(म्) ।
कृत्यं पञ्चविधं शश्वत् भासते तं स्तुमश्शिवम् ॥
प्रातश्शिरसि शुक्लेऽब्जे द्विनेत्रं द्विभुजं गुरुम् ।
वराभययुतं शान्तं स्मरेत्तद्धामपूर्वकम् ॥
मूलादिब्रह्मरन्ध्रान्तं मूलविद्यां विभावयेत् ।
उद्यद्दिनकरोद्द्योता यावच्छ्वासं दृढासनः ॥
अशेषाशुभशान्त्यर्थं समाहितमहा(ना)श्शिरम् ।
तत्प्रभापटलव्याप्तं शरीरं परिचिन्तयेत् ॥
स्नानकर्मणि सम्प्राप्ते मूर्ध्नि मन्त्री जलाञ्जलिम् ।
विद्ययाथ त्रिशः कुर्यात् तत्पूतास्त्रिरपः पिबेत् ॥

End :

इतीरितास्य क्रमवासना शुभा विरुद्धहीनक्रममार्गशोधिनी ।
हिताहितद्वैतपथप्रणाशिनी समस्तसंविन्मयपूर्णचित्पथा ॥

Colophon:

सूत्राणामपि सप्तत्या सुभगोदयवासना ।
शिवानन्देन रचिता विदुषां प्रहतांमहत् (तनुतां मुदम्) ॥

(*b*) **सुभगोदयप्रभा.**

SUBHAGŌDAYAPRABHĀ.

Foll. 10*a*—13*b*. Foll. 14*a*—15*b* are left blank.

A treatise in 70 stanzas dealing with Śāktism: by Śivānanda. At the end of the work it is stated that Śivānanda has also written another work called Śāmbhavōdaya.

Wants the beginning; otherwise complete.

Beginning:

एवं समाप्य विधिवन्नित्यपूजामनन्तरम् ।
नैमित्तिकविधिं वक्ष्ये भक्तानामनुकम्पया ॥

कथयामि(स)मासेन होमं कुण्डविधानतः ।
चतुरश्रे करायामे सयोनौ पूर्वनिर्मिते ॥

त्रिमेखले यथान्यायमुपलिप्ते मनोहरे ।
अर्चिते गन्धपुष्पाद्यै. कुर्याद्धोममुदङ्मुखः ॥

उत्पाद्य पावकं शुद्धं स्थापयेत् कुण्डमध्यतः ।
बैन्दवेन समीकृत्य शुचिना यो बहिश्शुचिः ॥

End:

सङ्क्षेपोक्तमनुक्तं वा यत्किञ्चित्सुभगोदये ।
द्रष्टव्यं तदशेषेण मदुक्ते शाम्भवोदये ॥

श्लोकानामपि सप्तत्या प्रोक्तो नैमित्तिको विधिः ।
सुभगोदयचन्द्रस्य प्रभेयं सहसोज्वला ॥

शाम्भवोदयसूर्योऽयं सुभगोदयचन्द्रमाः ।
द्वावेतौ यस्य हृदये स योगी शिव पावक(?) ॥

Colophon:

श्रीशिवानन्दविरचिता सुभगोदयप्रभा समाप्ता ॥

R. No. **4446.**

Paper. 10⅝ × 9½ inches. Foll. 18. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. K. C. Valiya Rājā of Kottakkal, Malabar district.

Foll. 17*b* and 18 are left blank.

निष्कलक्रमचर्चा.

NIṢKALAKRAMACARCĀ.

On the mode of worshipping Śrīcakra and drawing the diagram for the purpose thereto: by Śrīkaṇṭhānanda, son of Cidānanda who was the son of Śivānanda.

Incomplete.

Beginning:

श्रीशिवानन्दपौत्रेण श्रीचिदानन्दसूनुना ।
श्रीकण्ठानन्दमुनिना चर्च्यते निष्कलक्रमः ॥

प्रातरुत्थाय प्राङ्मुख उपविश्य ।दिं ग्लां दिं, दिं ग्लीं दिं, दिं ग्लूं ।दिं, दिं ग्लैं ।दिं, दिं ग्लः दिं इति कनिष्ठादि तलान्तं करन्यासमेतैर्बीजैर्हृदयाय नमः, आदियुक्तैर्हृदयाद्यङ्गषट्कन्यासं पश्चिमवक्त्राय नमः, उत्तरवक्त्राय नमः, दक्षिणवक्त्राय नमः, पूर्ववक्त्राय नमः, ऊर्ध्ववक्त्राय नमः, परवक्त्राय नमः, इत्येतत्षट्कयुक्तैर्वक्त्रन्यासं च कृत्वा सितो गजाननो मूष इत्याद्युक्तरूपं भगवन्तमात्मानं हेरम्बं ध्यात्वा

* * * *

स्वाममागे सवृत्तं चतुरश्रमण्डलं विरच्य मूलेनाभ्यर्च्य साधारं शङ्खं प्रतिष्ठाप्य शुद्धोदकेनापूर्य बिन्दुं निक्षिप्य षडङ्गमन्त्रैरभ्यर्च्य तेन जलेन पुरतः करायतं मण्डलं विरचय्य श्रीचक्रं वा श्रीविद्यागमं वा स्वाभिमुखं स्थापयित्वा ।

End:

मानं श्रीचक्रनिर्माणे सूत्रेषु नवसु क्रमात् ।
आद्यद्वितीयेऽष्टमके नवमे च यथाक्रमम् ॥
मार्जयेद्व्रणभागांश्च वृत्तान्तरुभयाग्रयोः ।
चतुर्थषष्ठयोः पार्श्वे तोयांशं परिमार्जयेत् ॥
पञ्चमः स्यात्सयांशं च मार्जयेच्चान्यपार्श्वयोः ।
रेखे तृतीयासप्तम्यौ वृत्तगेनैव लेपयेत् ॥

तृतीयान्ताद् द्वितीयान्ताच्चतुर्थ्यन्ताच्च पञ्चमात् ।
प्रथमान्तात्सूत्रयुग्ममोरखावधि पातयेत् ॥
सप्तमान्तादष्टमा(न्ता)त् षष्ठान्तान्नवमात्तथा ।

R. No. 4447.

Paper. 10⅝ × 9½ inches. Foll. 20. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1924–25 from a MS. of the Raja's Library, Khallikote, Ganjam district.

Fol. 20*b* is left blank.

हयदीपः.

HAYADĪPAḤ.

A treatise in Aśvaśāstra explaining how certain qualities of a horse are suggested by certain marks on its body: by Suhōtra who salutes Śālihōtra, the original writer of Asvaśāstra.

Contains the Pradēśādhyāya complete.

Beginning:

येन ज्ञानसहस्रभानुकिरणैः प्रध्वस्तमन्तर्महा-
मोहध्वान्तमकारि यस्य तपसा सन्तप्तमासीज्जगत् ।
योऽपश्यत्सततं करामलकवद्विश्वं च योगीश्वर-
स्सोऽयं सम्प्रति भूतले विजयते श्रीशालिहोत्रो मुनिः ॥
शालिहोत्रं नमस्कृत्य हयशास्त्रविशारदम् ।
हयदीपमहं कुर्वे सर्वेषां हितकाम्यया ॥
आवर्तानां ज्ञेयं शुभाशुभफलमावर्तकाध्याये(?) ।
तथा महादोषाणां फलं महादोषकाध्याये(?) ॥
अज्ञातेषु प्रदेशेषु सर्वमज्ञातमेव यत् ।
तस्मात्प्रदेशानश्वानां प्रथमं वच्मि कृत्स्नशः ॥
त्रिंशदङ्गुलिका जिह्वा दैर्घ्येण परिकल्पिता ।
विस्तारेण तु साश्वानां त्र्यङ्गुला समुदाहृता ॥
जिह्वामूलं च जिह्वाग्रं जिह्वामध्यं तथैव च ।
द्वे पार्श्वे चेति जिह्वानां प्रदेशाः पञ्च कीर्तिताः ॥

* * * *

अग्रिमकायस्सम्पूर्णः ॥

End :

षड्विंशतिप्रदेशाश्च चत्वारिंशच्च दोषकाः ।
चतुर्गुणाश्च कथिता हरेः पश्चिमगात्रतः ॥

पश्चिमकायस्सम्पूर्णः ॥

उक्ता मया प्रदेशा वाजिनां नवत्युत्तरं त्रिशतम् ।
शं चात्र सप्तशतं दोषास्सप्ताशीत्युत्तरं द्विशतम् ॥

Colophon :

इति श्रीसुहोत्रविरचिते हयदीपे प्रदेशाध्यायः ॥

वायुः प्रपाने च शिखी ललाटे दिवाकरेन्दू शिरसि स्थितौ च ।
वत्सेऽश्विनौ शक्रशिवौ च रन्ध्रे कुमारकृष्णावुपरन्ध्रयोश्च ॥
येषु प्रदेशेषु वसन्ति देवास्तस्माद्ध्रुवावर्तयुतो वरोऽश्वः ।

* * * *

सन्दिश्यानुक्रमेण त्रिशरदुपगता कालिका पीतशुक्ला
काचा माणिक्कशङ्खा उडुखलचलनं दन्तपातः क्रमेण ॥

R. No. **4448.**

Paper. 10⅝ × 9¼ inches. Foll. 18. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924-25 from a MS. of the Raja of Chirakkal, Baliapatam, Malabar district.

Fol. 18 is left blank.

सद्रत्नमाला.

SADRATNAMĀLĀ.

A treatise on astronomy : by Śaṅkaravarman, who wrote this work at the instance of Rāmavarman, brother of Udayavarman, King of Kerala country.

Contains the Prakaraṇas one to five complete.

Beginning :

श्रीपार्वत्याश्च लोकावनिधरमहितागारसान्निध्यवत्याः
पादाम्भोजं गुरूणामपि सततमनुस्मृत्य नत्वारुणादीन् ।

ज्योतिश्शास्त्राब्धिकीर्णां विशदगणितसारोक्तिसद्रत्नमालां
सङ्गृह्णीनां लिखामः पिपठिषुजनसन्धारणास्वल्पयत्नाम् ॥
श्रीपोरलातिरिवंशमौक्तिकमणेः श्रीकेरलालङ्कृते-
रार्यस्योदयवर्मणः शुभमतेः श्रीभैमिभूमीपतेः ।
श्रीमत्सोदररामवर्मयुवराजार्याज्ञया तन्यते
तन्त्रं शङ्करवर्मणेदमखिलज्योतिर्विदां प्रीतये ॥
केदमतिनिगूढार्थं ज्योतिश्शास्त्रं क्व चाहमलसमतिः ।
श्रीगुरुचरणाम्बुरुहस्मरणं किं किं न साधयति ॥
श्रीमद्वराहमिहिरार्यभटाद्यभीष्ट-
शब्दार्थरीतिविरहश्शुभदोऽत्र नूनम् ।
श्रीकालिदाससुकुमारकवि(वी)स्वकाव्य-
माङ्गल्यतः परिणतिं महिमां गतौ हि ॥
एकं दश शतं चाथ सहस्रमयुतं क्रमात् ।
नियुतं प्रयुतं कोटिरर्बुदं वृन्दमप्यथ ॥
खर्वो निखर्वश्च महापद्मः शङ्कु(ङ्खु)श्च वारिधिः ।
अन्त्यं मध्यं परार्धं च सङ्ख्या दशगुणोत्तराः ॥
नञा वचश्च शून्यानि सङ्ख्या कटपयादयः ।
मिश्रे तूपान्त्यहल्सङ्ख्या न च चिन्त्यो हलस्स्वरः ॥
सङ्ख्यानां युतिवियती गुणनं हरणं च वर्गमूले च ।
घनघनमूले चैतत्साध्यतमं गणितमाहुराचार्याः ॥

* * * *

Colophon:

इति सद्रत्नमालायां प्रथमप्रकरणम् ॥

End:

ध(त)रणिविधुबुधाच्छार्का(ङ्गा)रजीवार्किभानां
दिशति चरितबोधो भुक्तिमुक्ती नृणां यत् ।
करणकुशलभावप्राप्तये प्रार्थयन्त्या-
मिह भवतु बुधानां मत्कृतौ कौतुकश्रीः ॥

लोकाद्यारामवासे त्रिदशमुनिसुसङ्घातपद्मोच्चभाव्या
लोकाक्षिप्रीतिदा स्वर्णमयगुणयुता त्वत्पदालङ्कृतेयम् ।
लोकैस्सद्रत्नमाला घनसुपरिमला धार्यते यैस्तु कण्ठे
लोकाम्बे(म्बा)सिद्धसेव्ये कलय सततमेतेषु सन्मङ्गलानि ॥

Colophon :

इति सद्रत्नमालायां पञ्चमप्रकरणम् ॥

R. No. **4449.**

Paper. $10\frac{1}{8} \times 9\frac{1}{2}$ inches. Foll. 112. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of the Raja of Chirakkal, Baliapatam, Malabar district.

Foll. 110*b*—112*b* are left blank.

आशौचदीपिका, आशौचचन्द्रिकाव्याख्यासहिता.

ĀŚAUCADĪPIKĀ WITH THE COMMENTARY ĀŚAUCA-CANDRIKĀ.

Text is the same as that and similar to the commentary described under R. No. 2976 ante.

Incomplete.

Beginning :

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यस्सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥
योगीश्वरं च मन्वादीन् प्रणिपत्य सुरेश्वरम् ।
आशौचदीपिकाव्याख्यां करोम्याशौचचन्द्रिकाम् ॥

तत्र तावदाचार्यः प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यादिप्रयोजनसिद्धयऽनुबन्धचतुष्टयगर्भमङ्गलाचरणं करोति—

यतो वा जन्मास्य स्फुरति च यतो वा तदितरद्
द्वयेनाप्येतेन प्रकटितनिदानाघमखिलम् ।
व्यतीयास्ते शुद्धो निरघ इह यस्थावगमना-
दुपासे तत्तत्त्वं प्रशमितविकल्पं विदमिदम् ॥

* * * *

अथाशौचकालस्यारम्भकालमवसानकालं चाह—

आशौचार्तवसम्भवेऽन्तिमनिशाऋंशः परापि(ह)रसमं
चण्डांशावुदिते विशुद्धिरुदिता स्वाशुद्ध्यहोभ्यः परम् ।

पुष्पोद्भेददिनात्तृतीयकनिशायास्त्वन्त्यवेदांशके ऽ-
प्याष्ठावं वितनोतु वा कुसुमितेत्याहुर्बुधाः केचन ॥

End:

उदकं पिण्डदानं च सायंप्रातस्तु पुत्रकः ।
कुर्यादाशौचकाले तु नचेत्कृत्वाशुचिर्भवेत् ॥

इति यदि नाशौचकाले कृतं, तर्ह्याशौचे गतेऽपि कृत्वैव नवश्राद्धादिकं कुर्यादित्यर्थः ।

* * * *

नक्षत्रज्योतिरारभ्य आसूर्योदयदर्शनात् ।
प्रातस्सन्ध्येति तां प्राहुः श्रुतयो मुनिसत्तमाः ॥

R. No. 4450.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of the Raja of Chirakkal, Baliapatam, Malabar district.

Fol. 22 is left blank.

मुहूर्तपदवी.

MUHŪRTAPADAVĪ.

Similar to the work described under R. No. 4442 ante.
Breaks off in the seventh Adhyāya.

Beginning:

प्रत्यूहप्रतिहन्तृ किञ्चन महस्साश्चिन्त्य भासां निधिं
भानुं च क्रियते मुहूर्तपदवी सङ्क्षिप्तशास्त्रान्तरा ।
वर्ज्यावर्ज्यविवेचनीकृतसदाचारानुसारा मया
सन्तुष्यन्तुतरां चिराय सुधियो देवाः प्रसीदन्तु नः ॥
नत्वा सर्वजनाश्रयं ग्रहपतिं त्रैलोक्यदीपं विभुं
विघ्नेशं च सरस्वतीं गुरुजनं व्यासं च नन्दात्मजम् ।
सर्वेषां शुभकर्मणां लघुधियां ज्ञानाय कालक्रमा-
द्वक्ष्ये बोधमयां(यीं) मुहूर्तपदवीं हृद्यैस्सुपद्यैरहम् ॥

30408 KRISHNA MISSION INST.

दोषलक्षणबलाबलादिकं ग्रन्थविस्तरभयादुपेक्ष्यताम् ।
कालबोधपदवीमथारभे सर्वकर्मसु विवेकसिद्धये ॥
उल्कायां भूमिकम्पे त्रिदिनमथ परित्याज्यमिन्दोर्ग्रहे च
दृष्टे ह्यर्कोपरागे शरदिनमपि वा केतुदृष्टं दिनं च ।
उष्णो यस्यान्त्यसंस्थो यदि विषगुलिकौ तं न गृह्णाति राशिं
दन्तादूनाढ्यमृक्षं परिहरति तथा वैधृतोद्युं(द्युं)सलाटम् ॥

* * * *

Colophon:

इति मुहूर्तपदवीशास्त्रे प्रथमोऽध्यायः ॥

End:

ऋतुस्नाता भवेन्नारी साकाङ्क्षा मुखमीक्षते ।
तदाकृतिर्भवेद्गर्भं(र्भः) तत्पत्नी स्वामिनो मुखम् ॥

Colophon:

इति षष्ठोऽध्यायः ॥

यायान्नैरृतिभुक्तिभे स्थिरनृयुक्चित्राम्बुगेन्दुं(न्दूं)स्त्यजे-
दर्कारार्यबुधाच्छमन्दशशिनो वारांस्तथैन्द्र्यादिषु ।
प्राच्यादिष्वथ दिक्षु विश्वहरिभे बुध्न्यश्वती(श्विनी)रोहिणी-
पुष्यौ भानुभगौ च जन्मभमसच्चन्द्रोऽस्तु षष्ठान्त्ययोः ॥

* * * *

सप्तशलाकाचक्रे न्यसेत्ताराणि पूर्वमध्यादि ।
आग्नेयादीन्यत्रे(र्के)न्द्वोर्नवकं तिमिरं त्रयं कपालं च ॥
त्रितयं गदा च तस्मात् सप्त च वज्रं त्रयं पाशम् ।

R. No. **4451.**

Paper. 10⅝ × 9½ inches. Foll. 74. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. K. C. Valiya Rājā of Kottakkal, Malabar district.

परमतखण्डनम्.

PARAMATAKHAṆḌANAM.

A grammatical treatise refuting the views of Prakriyākaumudi-prakāśakāra and others. The author, whose name is not given, was a pupil of Vīrēśvara.

Breaks off in the Tṛtīyāvibhaktyarthavicāra.

Beginning:

विरोधिनां तिरोभावभव्यो यद्भारतीभरः ।
वीरेश्वरगुरुं शेषवंशोत्तंसं भजामि तम् ॥
दारितरिपुप(व)क्षोभ्रंस(श)चक्रपाणिं नरहरिं नत्वा ।
विद्वन्मण्डलहृद्यं तत् परमतखण्डनं तनुते ॥

हयवरट्। हद्वयोपदेशः अटिणोः शलूवलोश्च हकारग्रहणार्थः । यत्तु हयवरट्सूत्रे हकारोपदेशप्रयोजनमडादौ तद्ग्रहणमित्युक्त्वा हलूसूत्रमुपादायै-तत्सूत्रप्रयोजनं शलादौ हग्रहणं तेनाधुक्षदित्यादि सिध्यतीत्युक्तम् । तत्र प्रथमं हकारोपदेशप्रयोजनमुत्तरसूत्रप्रयोजनमिति भेदेन ग्रहणे किं बीजम्?

* * * *

यत्तु प्रकाशकृद्भिः न मु न इत्यत्र नेति योगविभागेन चुत्वे चर्त्वं नासिद्ध-मित्युक्तम् । तत्र तैरेव इत्याचार्या मन्यन्त इत्युक्त्यागतिकगतिकस्येहाप्या-श्रयणे प्रमाणाभाव इत्यस्वरसः प्रकाशित इति न कश्चित् क्षुद्रोपद्रवः ।

End:

कर्तृकरणयोस्तृतीया । अनभिहिताधिकारान्नेह—कृतविश्वः । यत्त्वत्र विश्वकर्मककृत्याश्रय इत्यर्थः ; अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरस्वीकारात् यथा चैतत्तथा वक्ष्यत इति । तद्व्याहतम्—व्युत्पत्त्यन्तरमिष्यैवैकार्थीभावस्य वक्ष्यमाणत्वात् । प्रातिपदिकार्थसूत्र उक्तत्वाच्च.

Foll. 70*b*—73*a* give a portion of the Saṁjñāprakaraṇa. Foll. 73*b*—74*b* are left blank.

R. No. **4452.**

Paper. 10⅝ × 9½ inches. Foll. 128. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Śaṅkaran Nambū-dirippād, Avanapparampa-mana, Vadakancheri post, Cochin State.

Fol. 128*b* is left blank.

योगरत्नसमुच्चयः

YŌGARATNASAMUCCAYAḤ.

Same work as that described under R. No. 3182 ante, wherein see for the end.

Contains the Adhikāras one to nine complete dealing with the following subjects:—

१. दोषाधिकारः.
२. पञ्चकर्माधिकारः.
३. धूमगण्डूषकवलमूर्धतैलाधिकारः.
४. रक्तमोक्षाधिकारः.
५. क्षाराग्निकर्माधिकारः.
६. भोजनविधानविरुद्धान्नाधिकारः.
७. विषाधिकारः.
८. अन्नवातद्रव्याधिकारः.
९. द्रव्यगुणाधिकारः.

Beginning:

स्वस्ति श्रीरमणस्य मे . . . . दनतामव . . . . ।
. . . . . तठाभागानुभोगोचित . . . . . ॥
भूषाविधायी विदुषां क्रियामार्गप्रकार(श)कः ।
क्रियतेऽयं यशोदायी योगरत्नसमुच्चयः ॥
वायुः पित्तं कफश्चेति त्रयो दोषास्समासतः ।
विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति च ॥
तत्र रूक्षो लघुश्शीतः खरस्सूक्ष्मश्चरोऽनिलः ।
पित्तं सस्नेहतीक्ष्णोष्णं लघु विस्रंसरन्द्रवम् ॥
स्निग्धश्शीतो गुरुर्मन्दश्श्लक्ष्णो मृत्स्नस्स्थिरः कफः ।

* * * *

Colophon:

इति योगरत्नसमुच्चये दोषाधिकारः प्रथमः ॥

R. No. **4453.**

Paper. $10\frac{1}{8} \times 9\frac{1}{2}$ inches. Foll. 194. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Puliyanur-mana, Tiruppanattura post, Cochin State.

Foll. 73*b* and 194 are left blank.

प्रपञ्चसारविवरणव्याख्या—प्रयोगक्रमदीपिका.

PRAPAÑCASĀRAVIVARAṆAVYĀKHYĀ: PRAYŌGA-KRAMADĪPIKĀ.

A commentary on the Prapañcasāravivaraṇa, which work has been described under No. 7939 of the D.C.S. MSS., Vol. XV.

Contains the commentary on Paṭalas one to nine complete and breaks off in the course of the tenth Paṭala.

Beginning :

देवतायै नमो वृत्तिं बृहद्विवरणस्य तु ।
कुर्मः प्रपञ्चसारस्य प्रयोगक्रमदीपिकाम् ॥

विवरणारम्भे मङ्गलाचरणं विवरणकृत् करोति—अवर्णविग्रहमिति । देवं नमामि, स्तौमि, संश्रय इत्यर्थः । देवशब्देन वक्ष्यमाणसर्वमन्त्रदेवतात्मिकैका सती परदेवतोच्यते । अवर्णविग्रहमिति—तस्यास्सकलरूपेण विशेषणम् । अ इत्येतद्वर्णो विग्रहश्च यस्येति समासः । अ इति सामान्यवैखरी गृह्यते ।

* * * *

रवस्तु तस्या मनोबुद्ध्यादिवदवस्थान्तरामिति सा यतेत । स्वस्य प्रविजृम्भितमिति भेदाभिधानं वैखरीपर्यन्त इति पञ्चाशद्वर्णपर्यन्तत्वमुक्तम् ॥

Colophon :

इति प्रयोगक्रमदीपिकायां प्रथमः पटलः ॥

End :

तस्यैवम्भूतेन्दिरा भवेदिति च योजनीयम् । तत्र(त)यशःपूरेति । व्याप्तयशस्समूहेत्यर्थः । सर्वमुनिभिस्सम्प्रार्थनीयं पदमिति त्रैपुरं चिदानन्दपूर्णस्वरूपमुक्तम् ॥

Colophon :

इति प्रयोगक्रमदीपिकायां नवमः पटलः ॥

. . . . . गं त्रिपुरसिद्धा(न्त)विषये नवयोनिमध्यवृत्ते विधाय परितो वृत्ते षट्कोणं तद्बहिश्चतुष्षड्दशद्वादशद्विषोडशदलानि प्रत्येकं वृत्तावच्छिन्नानि विधाय तद्बहिरष्टदलं राशिचक्रादि च रचयेत् ।

* * * *

पुनरङ्गानि मातृलोकपालादयश्चेति । मातरोऽष्टदले चतुरश्रे लोकपाला इति ।

हेमाभदेहवसनाभरणा त्रिनेत्रा
रत्नाभिषेकशशिलेशलसत्कपर्दा ।
सम्पत्करी जयति विद्रुमजाक्षमाला
सत्पुस्तकद्रविणपात्रवराग्रहस्ता ॥

R. No. **4454.**

Paper. 10⅝ × 9½ inches. Foll. 30. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Kṛṣṇa Śāstriyār, Chinnamanur, Periyakulam taluk, Madura district.

Fol. 30*b* is left blank.

हरिकेश्वरपुरीमाहात्म्यम्.

HARIKĒŚVARAPURĪMĀHĀTMYAM.

A treatise on the greatness and religious sanctity of a Śaiva shrine at Arikēśanallūr, also called Harikēśvarapurī, on the bank of the river Tāmraparṇī, in Tinnevelly district.

Contains chapters one to four; as found in the Sanatkumārasaṁhitā of the Skāndapurāṇa.

Beginning:

शुक्लाम्बर (. . .) शान्तये ॥
समस्तजगदाह्लादकारकं शङ्करात्मजम् ।
नतवाञ्छितदातारं तं वन्दे कुञ्जराननम् ॥
* * *

श्रीसूतः—

साधु साधु महाभागास्सर्वविज्ञानकोविदाः ।
युष्माभिरीरितं क्षेत्रं तिष्ठत्येव न संशयः ॥
वक्ष्यामि ऋषिशार्दूलाश्शृण्वतामेकचिन्त(त्त)तः ।
इति सञ्चिन्त्य मनसा शङ्करं लोकशङ्करम् ॥
* * *
ईश्वरं पूजयित्वा तु हरिस्तिष्ठति यत्र वै ।
तत्रासीत् किञ्चन पुरं हरिकेश्वरनामकम् ॥
एतस्मिन् समये भूयस्सूक्ष्मरूपी सदाशिवः ।
वृक्षस्य पीलुसंज्ञस्य मूलेऽतिष्ठद्यथासुखम् ॥
युगे च द्वापरे चैतद्वृत्तान्तमिति चाब्रुवन् ।
भूयस्सूतः पाण्ड्यराजवृत्तान्तं वक्तुमारभत् ॥

Colophon:

इति श्रीमत्स्कान्दे पुराणे सनत्कुमारसंहितायां सनत्कुमारं प्रति नन्दिकेश्वरेणोक्तं स्थलविशेषनिरूपणं नाम प्रथमोऽध्यायः ॥

End:

शमदमगुणधुर्यास्साधवो विप्रवर्या
नवदिव(न)मणिभासो नैमिशारण्यवासाः ।
श्रुतिपुटमधुरं तं श्रोतुमानन्दवन्तः
पुनरपि भगवन्तं स्तोतुकामा भवन्ते ॥

Colophon:

इति श्रीमत्स्कान्दे महापुराणे सनत्कुमारसंहितायां भगवता सनत्कुमारेण व्यासं प्रत्युदिते हरिकेश्वरनामनगरस्थलविशेषमाहात्म्ये मुक्तिप्रदनिरूपणं नाम चतुर्थोऽध्यायः ॥

इदं पुराणं शिवसन्निधौ वा सुदेवताब्रह्मसमाजके वा ।
नद्याश्च तीरेषु च पर्वकाले पठन्ति प(पा)ठ्यन्ति ददन्ति ये नराः ॥
* * * *
ददाति साम्बश्शरदां शतायुः सनातनाद्यैः परिषेव्यमाणः ।
श्रीराजसिंहेश्वरनामदेवः सदा मुदं दास्यति सज्जनानाम् ॥

Colophon:

समाप्तश्चायं ग्रन्थः ॥

R. No. **4455.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 32. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Puliyanur-mana, Tiruppanattura post, Cochin State.

(*a*) सपर्यासप्तकव्याख्या—नौका.

SAPARYĀSAPTAKAVYĀKHYĀ: NAUKĀ.

Foll. 1*a*—7*a*.

A commentary on Śaṅkarācārya's Saparyāsaptaka, described under subdivision (*b*) of this number: by Ravinārāyaṇa.

Complete.

Beginning:

स्थूलानलोङ्कारवपुस्सपर्यासप्तकात्मनः ।
मुनिवागम्बुधेर्लब्धीं टीकानौकां करोम्यहम् ॥
तत्र तोयगतं देवसाध्यमन्त्रानुसारतः ।
सकलीकृत्य च गुरुरुपचारान् प्रयोजयेत् ॥

इत्युक्तयोस्तु सम्बन्धो द्रव्यदेवतयोर्मिथः ।
आथर्वणश्रुतौ सिद्धस्सूत्रकारेण सूत्र्यते ॥

मलधातुरसाभिधानमिति । एतदुपहारविधानं मलधातुरसाभिधानम् । अत्र देवे रस एवाश्चतीत्यन्वयः । बाह्यदेहेन्द्रियमनःप्राणज्ञानेषु षडहङ्काराः । तैर्जलगन्धपुष्पधूपदीपनि(नै)वेद्यात्मकैः स्थूलमीशं यजेत् ।

* * * *

उपहारविधानम् उपहरणमुपहारस्सपर्या विधीयतेऽनेनेति विधानमुपहारस्य विधानमुपहारविधानं माययेदन्तया प्रतीयमानमुपहारक्रियासाधनं वस्तु जलगन्धादिकं तत्प्रत्येकं मलधातुरसाभिधानम् । न त्वहं मनुरित्यादिश्रुतेस्साक्षिबोद्धृस्वभावेनाहन्तया प्रकाशमानं जलगन्धादिकमित्यर्थः । तत्र यत् स्थविष्ठं रूपं तन्मलं भवति, यत्सूक्ष्मं स धातुः, यत्सूक्ष्मतरं स रस इति गुरुपरम्परानुयाताथर्वणश्रुतिरस्मिन् संज्ञात्रैविध्यादौ प्रमाणम् ।

End:

अहं मनुरहं सूर्य इति ज्ञातैव तात्त्विकी ।
पूजा तत्साधनीभूते परे द्वे चित्तशुद्धिदे ॥
इति निष्क्रियं मनसा तस्माद्देशिकसत्तमैः ।
जलादिभिस्तथा भक्त्या ज्ञानेनाप्यर्च्य ईश्वरः ॥
सपर्यासप्तकस्यास्य भगवत्पादजन्मनः ।
रविनारायणेनेयं लब्ध्वी टीका विनिर्मिता ॥
मृतसञ्जीविनीमेनां श्रोत्रैरापीय सादरम् ।
शुद्धैर्मनोभिरासाद्य सन्तस्सन्तु सुनिर्मलाः ॥
निखिलनिगमवेद्यं तत् प्रमाणैरवेद्यं
निरवधि[क]गुणसेव्यं निर्गुणं चाद्वितीयम् ।
अखिलजनमसङ्गज्योतिरात्मस्वरूपं
मुनिजनमहनीयं मानसे नश्चकास्तु ॥

(*b*) सपर्यासप्तकम्, सव्याख्यानम्.

SAPARYĀSAPTAKAM WITH COMMENTARY.

Foll. 7*b*—17*a*.

A controversial treatise by Śaṅkarācārya dealing with the sevenfold worship of images. The work is followed by a commentary.

Incomplete.

Beginning:

(सृष्टि)संहाररक्षासु दृष्टि(पृथ्वी)वह्निजलात्मकम् ।
एकं त्रिजगतो बीजं चिद्रसं समुपास्महे ॥
शाङ्कराचार्यवाक्सिन्धोः सपर्यासप्तकात्मनां(नः) ।
भावयेदर्थसर्वस्वमस्मद्व्याख्यानमन्दरः ॥

इह तावज्जडचेतनात्मकतया द्विविधेऽपि जगत्त्रये क्रोडीकृतच . . . . देवरूप इति विश्वस्य तत्तत्त्वेनावसनमेव पूजावसरपर्यायास्सपर्या ।

* * * *

तद्विधानं च पृथ्या(थ्व्या)दिजडभेदसमर्पणरूपमिति तत्समर्पणप्रकारमाह—

मलधातुरसाभिधानमेतत् पृथिवीवह्निजलात्मकं जलाद्य(दि) ।
उपहारविधानमत्र देवे रस एवाश्नति पञ्चभूतसूक्ष्मः ॥

एतज्जलाद्युपहारविधानं पृथिवीवह्निजलात्मकं मलधातुरसाभिधानमत्र देवे रस एवाश्नतीत्यन्वयः । एतदिति शैवशाक्तेयवैष्णवाद्यागमप्रसिद्धप्रक्रियया तत्तत्साधकैः तत्र तत्रोपादीयमानत्वेनानुभूयमानम् ।

End:

कलात्वेन विश्वस्य विशुद्धपरमाणुमात्रतापादनमेव । विशुद्धत्वं च विभागवह्निशिखावली . . . . . काशोऽपि संवित्स्वभावत्वेनात्मरूप इत्यात्मीकरणमेव भस्मीकरणम् । तदुक्तं ज्ञातृ-ज्ञानज्ञेयात्मक.

Colophon:

समाप्तोऽयं ग्रन्थः ॥

(c) उपहारप्रकाशिकाव्याख्या.
UPAHĀRAPRAKĀŚIKĀVYĀKHYĀ.

Foll. 17*a*—26*b*.

Similar to the commentary described under subdivision (*a*) of this number.

Wants the beginning and the end.

Beginning:

उपहारप्रकाशिकां कर्तुकामस्तदविघ्न . . . . . देवता-प्रणतिं कुर्वन्नर्थाद्देवतासपर्यास्वरूपं दर्शयति—स्नेहविश्वासेत्य . . . . . त्रे के आहुः । मानसपूजासाधनान्यत्राभिधीयन्त इति । तत्रायमर्थः—जलादित्वेन सङ्कल्प्यन्ते । ततश्च जलादितया सङ्कल्पितेन स्नेहादिना

* * * *

ननु अस्तु नामैवं धात्वंशानामुपयोगः; कथमिदं रस एव देवमश्नतीति घटत इति भवितव्यमत्र सावधानतया । यथा हि ब्राह्मणेभ्योऽन्नं दद्या-दित्यत्र देही देहो वा प्राधान्येनाभिधीयत इति वक्तव्यम् । किमन्नेन देहस्य प्राधान्येनोपकारः, तन्मुखेन देहिनः, किं वा साक्षादेव देहिन उपकार इति निरूपणीयमिति यावत् ।

End:

पञ्चतन्मात्राभिरारब्धस्य समष्टिव्यष्ट्यात्मकशरीरस्यामन्दानन्दरूपाभि-रस्मत्परिकल्पिताभिरुपचयसम्पादनरसादिविनिधानं तदनुभवनं च भगवतो भोगो नाम नापर इति.

Foll. 26*b*—31*a* contain the Pūjāviśēṣakrama (Āntara and Bāhya). Foll. 31*b*—32*b* are left blank.

R. No. 4456.

Paper. 10⅝ × 9½ inches. Foll. 12. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Śrī-Kumāran Nambūdiri, Kathil-mana, Shoranur, Malabar district.

Foll. 11 and 12 are left blank.

मीमांसान्यायसङ्ग्रहः.

MĪMĀṂSĀNYĀYASAṄGRAHAḤ.

A short metrical treatise epitomising the contents of the Mīmāṁsā-sūtras of Jaimini.

Breaks off in the third Pāda of the third Adhyāya.

Beginning:

मन्त्रादिप्रौढकर्मण्युदितगतिरतीतेऽपि वेदोक्ततत्त्वो
विध्यर्हस्वाङ्गयोग्यं [स]विधिभिरभिहितं द्वारमाक्षिप्य साङ्गम् ।
सिध्येत्तत्स्थो नृभेदप्रियनिजविषयप्रेरणार्हात्मसिद्ध्यै
विध्यर्थो ह्यन्तरङ्गं विषयफलमुपैत्यग्रधीस्थं न जातम् ॥

इष्टोपायं कृतिवशमनुस्मृत्य लोकप्रवृत्ता-
वुद्देश्यत्वं नियतमनतिव्याप्ति हेतुस्तदेव ।
व्युत्पत्तिश्च व्यवहृतिवशादर्थभेदे नृवाक्यं
लिङ्गं योग्यस्वविषयमतेर्वेदमेयं तु कार्यम् ॥

* * *

यद्रूपं येन युक्तः स्फुरति गुणतया देशकालानपेक्षं
तद्धीस्तत्तद्विहीनं कथमिव सहते कल्पितापेक्षमेव ।
शङ्का दृष्टानुसारिण्यनुगतनिगमं प्रेक्ष्य वोत्प्रेक्ष्य वा स्या-
त्तर्केणापोह्य सिध्येदनुमितिरतदालोकनेऽपि क्रियादौ ॥
सम्यङ्न्यायविनिर्णीतवचनव्यक्तिसंस्कृतात् ।
वाक्याम्नानान्तराज्ञातविज्ञानं शास्त्रमुच्यते ॥

* * * *

Colophon:

इति प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ॥

* * * *

Colophon:

इति . . . रविरचिते मीमांसान्यायसङ्ग्रहे द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

द्वितीयाध्यायश्च समाप्तः ॥

End:

मन्त्रस्त्वनैन्द्रभक्षेऽपि सवनार्थं समासतः ।
भक्षः स्यादिन्द्रपीतत्वाद्बहुव्रीहेरिहादरात् ॥

Colophon:

इति तृतीयस्य द्वितीयः पादः ॥

तृतीयतृतीयः एषः ।

सृष्टिस्तुत्यवसाय्युपक्रमवतो वाक्यादृगादिश्रुते-
र्नोच्चैष्ट्वादि न मन्त्रभागविहिता ह्यत्रापि वेदश्रुतिः ।
द्राग्धीस्थे त्वनपेक्षवेदनकृतिस्तुत्ये विधेयान्विते
तत्तन्मिश्रतदर्थमात्रविषया सा ग्राहकानादरात् ॥

* * * *

नाहर्गणे धृत्युचितेऽपि दीर्घे सन्तर्दनं न प्रकृतौ जघन्यात् ।
समासतस्तादृशि साधिकांशुदीर्घोर्ध्वसंस्थप्रकृतकृतौ स्यात् ॥

R. No. **4457.**

Paper. 10⅝ × 9½ inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Pūmalli-mana, Chalasseri post, Malabar district.

ऐतरेयब्राह्मणवृत्तिः.

AITARĒYABRĀHMAṆAVṚTTIḤ.

A short commentary on the Aitarēyabrāhmaṇa, which work has been described under No. 32 of the D.C.S. MSS., Vol. I, Part I: by Ṣaḍgurusiṣya.

Contains the commentary on the Adhyāyas 11 and 12 only.

Beginning:

ग्रहोक्थं वा एतद्यत्प्रउगं नव प्रातर्ग्रहा गृह्यन्ते नवभिर्बहिष्पवमाने स्तुवते स्तुते स्तोमे दशमं गृह्णाति हिङ्कार इतरासां दशमस्सो सा संमा इति । वर्णितं दशमे त्वाज्यमथ प्रउगमुच्यते । ग्रहोक्थं वा एतद्यत्प्रउगम्—उक्थं शस्त्रं कर्मणि क्थन् । वचेर्वै संप्रसारणम् । कथं? नव प्रातर्गृहा गृह्यन्ते—ऐन्द्रवायवादयः । नवभिर्बहिष्पवमाने स्तुवते । उपास्मै दधि . . . . . पवस्वेति ऋचे स्त्रिभिः ।

निरभ्यासैस्स्तुवन्त्याद्ये पवमानेऽत्र सामगाः ॥

* * * *

Colophon:

इति षड्गुरुशिष्येण विरचितायां(मैतरेय)ब्राह्मणवृत्तौ एकादशोऽध्याय-स्समाप्तः ॥

End:

प्रतिष्ठिततमा वाक् स्यादुत्तमस्वरसंयुता ।

तस्माद्यद्यपि इर इव पशून् लभते गृहानेवैनानाजिगमिषति । तस्मात् प्रतिष्ठारूपत्वादेव इव एव एनान् पशून् णीजर्थो गमिः । आनिनीषति ।

स्पष्टयति—गृहा हि पशूनां प्रतिष्ठा प्रतिष्ठा ।

प्रवृत्तिभूमिः प्रतिष्ठा द्विरुक्त्यर्थस्समापनम् ॥

Colophon:

इति षड्गुरुशिष्येण विरचितायामैतरेयब्राह्मणवृत्तौ द्वादशोऽध्याय-स्समाप्तः ॥

R. No. **4458.**

Paper. 10⅝ × 9½ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of Maṅgāttammaṅgār, Vaḍakkutirumāḷigai, Alwartirunagari, Tinnevelly district.

Fol. 56*b* is left blank.

मीमांसानयकौमुदी.

MĪMĀṂSĀNAYAKAUMUDĪ.

A treatise annotating the Mīmāṁsāsūtras of Jaimini: by Vijayīndrabhikṣu.

Wants the beginning of the first Pāda and end in the second Pāda of the first Adhyāya.

Beginning:

यो हेतुर्धर्मो जिज्ञासितव्य इति प्रतिज्ञोपपन्नैव । तत एव प्रतिज्ञातार्थनिरूपणमुपपद्यते । तदर्थं तत्र को धर्मः किंप्रमाणक इति प्रतिज्ञातार्थद्वयं श्रुत्यर्थाभ्यामुपपादयितुमेतत्सूत्रप्रवृत्तिरिति किमनुपपन्नम् । अत्र चोदना विधिप्रत्ययसहितं प्रवर्तकं वाक्यमुच्यते । लक्षणशब्दः प्रमाणपरः । तथा चोदनाप्रमाणको धर्मस्स चार्थरूप इत्येतत्सूत्रार्थः । तत्र यो धर्मोऽलौकिकश्रेयस्साधनरूपोऽग्निहोत्रादिस्स चोदनालक्षण इति श्रौती वचनव्यक्तिः, यश्चोदनालक्षणस्स धर्म इत्यार्थी लक्षणशब्दितस्वरूपवचनव्यक्तिरिति विवेकः ।

* * * *

Colophon:

इति विजयीन्द्रभिक्षुकृतायां मीमांसानयकौमुद्यां प्रथमाध्यायस्य प्रथमः पादः ॥

End:

विधौ च वाक्यभेदः स्यात् । नन्वेतावता भवतीति वर्तमानापदेशोऽनुपलब्धिविरोधेनोर्ज इत्यस्य फलसमर्पकत्वायोगात् । विधित्वे चोत्पत्तिमात्रे व्यापारात्फलानाकाङ्क्षणात् विनियोगसिद्धत्वेऽपि

* * * *

इदमुक्तम्—स्तुत्या विधिविभक्तिमुत्पाद्य पुनस्तयैव फलकल्पनावाक्यभेदः प्रसज्येतेति । तस्माद्विधिवन्निगदानामप्यर्थवादानां स्तुतिरेव प्रयोजनमिति सिद्धम् ।

R. No. **4459.**

Paper. 10⅝ × 9½ inches. Foll. 92. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of the Manager, Sabhāmaṭham, Kunnankulam post, Cochin State.

Foll. 91*b* and 92 are left blank.

न्यायरत्नदीपावलीव्याख्या.

NYĀYARATNADĪPĀVALĪVYĀKHYĀ.

Same work as that described under R. No. 3604 ante. By Ānandajñāna, pupil of Śuddhānandapūjyapāda.

This commentary is called Vēdāntavivēka.

Contains the Adhyāyas III and IV but wants some portion in the beginning of the III Adhyāya.

Beginning:

यच्चैतन्यमनन्यमोहमहिमप्रत्युद्यदाधिद्वयं
मात्रादिश्च यदन्वयेन वपुषा . . . . . ।
. . . . . प्लुष्टावशिष्टं महः
तन्मे सन्ततमाविरस्तु हृदये स्वेनैव वस्त्वात्मना ॥
नमस्त्र्यन्तसन्दोहसरसीरुहभानवे ।
. . . परपक्षौघध्वान्तध्वंसपटीयसे ॥

प्रारिप्सितप्रकरणाविघ्नपारिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय विशिष्टेष्टदेवतानुस्मरणपूर्वकं तन्नमस्काररूपं मङ्गलाचरणं मुखतः सम्पादयन्नर्थाद्विषयादि व्याचक्षाणश्चिकीर्षितं प्रतिजानीते—हरिमित्यादिना । तत्र तत्त्वम्पदार्थयोरेकत्वं शास्त्रीयं विषयमभिधित्समानस्तत्पदार्थं कथयति—हरिमिति । वाक्यार्थबुद्धिवृत्त्यभिव्यक्तश्चिदात्मा सनिदानं संसारं हरतीति हरिः । तं परमात्मानम् ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकशुद्धानन्दपूज्यपादशिष्येण भगवदानन्दज्ञानेन कृते न्यायरत्नदीपावलीव्याख्याने वेदान्तविवेके तृतीयोऽध्यायस्समाप्तः ।

End:

संप्रति स्वकृतिं विदोषतया स्तोतुकामस्सङ्क्षेपविस्ताराभ्यामुक्तां तां परामृशति—सेयमिति । तस्यास्सम्प्रदायागतत्वेन कर्तृद्वारा दोषराहित्यं

दर्शयति—आचार्येति । स्वरूपतो निर्दोषत्वं निर्दिशति—सन्यायेति । विषयतो निर्दोषतामाभाषते—उद्घोषयतीति । तस्या निरतिशयपुरुषार्थ-हेतुभूतसम्यग्ज्ञानजनकतया तत्र श्रोतृणां प्रवृत्तिं प्रार्थयते—दीपावलीति ॥

शुद्धानन्दमुनीश्वरं सुविशदज्ञानामृताम्भोनिधिं
संसेव्यप्रतिलब्धबुद्धिविभवः सद्बुद्धिसंवर्धनम् ।
वेदान्तार्थविवेकमर्थगमनं स्वार्थप्रवाहावहं
चक्रे वक्रविलक्षणेन सुपथेनानन्दपूर्वो गिरिः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्येण भगवदानन्दज्ञानेन विरचिते न्यायरत्नदीपावलीव्याख्याने वेदान्तविवेके चतुर्थोऽध्यायः ॥

R. No. **4460.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 32. Lines, 20 in a page. Dēvanāgarī and Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Tampu Śaṭhakōpayyaṅgār, Vaḍakkutirumāḷigai, Alwartirunagari, Tinnevelly district.

(*a*) अघमर्षणसूक्तभाष्यम्.

AGHAMARṢAṆASŪKTABHĀṢYAM.

Foll. 1*a*—2*a*.

Same work as that described under R. No. 3559(*b*) ante, wherein see for the beginning.

Complete.

End :

अथानन्तरमन्यानपि लोकानतलवितलादीन् लोकान् तद्वर्तनि(र्तीनि) देवमनुष्यतिर्यगादीनि भूतानि सर्वाणि स धाता कल्पयामास । तथा च मनुः—

ताभ्यां स च कलाभ्यां तु दिवं भूमिं च निर्ममे ।
मध्ये व्योम दिशश्चाष्टावपां स्थानं च शाश्वतम् ॥
* * * *
विश्वस्य सृष्टिरुद्दिष्टा सङ्क्षेपेणाघमर्षणे ।
सूक्ते तु पौरुषे सैषा सृष्टिः स्पष्टं निगद्यते ॥

Colophon:

इत्यघमर्षणसूक्तभाष्यं समाप्तम् ॥

(*b*) पुरुषसूक्तभाष्यम्.

PURUṢASŪKTABHĀṢYAM.

Foll. 2*a*—26*b*.

Similar to the work described under R. No. 2299(*a*) ante. By Varadarāja.

Complete.

Beginning:

सूक्ते तु पौरुषे सैषा सृष्टिः स्पष्टं निगद्यते ।

तच्चेदं युज्यते—

जपार्चनादौ तस्मात्तदिदानीमनुसन्दधे ।
स्नानोपस्थानयोः पूजाजपयोश्चात्र वक्ष्यते ॥
विधिः पूरुषसूक्तस्य तस्मात्स्मार्तश्च शोभनः ।
सर्ववेदेष्विदं सूक्तं पौरुषं परिपठ्यते ॥
ऋग्वेदाध्यायिनस्तत्र षोडशर्चं प्रचक्षते ।
यजुर्वेदे तैत्तिरीये व्यधिकं तदभिधीयते ॥

* * * *

सहस्रशीर्षा पुरुषः । सहस्रशब्दोऽनन्तवचनः । सहस्राणि शिरांसि, सहस्राणि अक्षीणि सहस्राणि पादाः यस्य सः सहस्रशीर्षा सहस्राक्षः सहस्रपाद(त्) ।

* * * *

श्रुतिभिरभिहितार्थं सेतिहासैः पुराणैः
स्मृतिपरिकरयन्तो(त्तो) व्याकृतार्थं यथावत् ।
इति हि वरदराजो व्याकृताख्यातकीर्तिः
गुरुमुखकथितार्थं पौरुषं सूक्त(मेतत्) ॥

Colophon:

इति पुरुषसूक्तार्थो यथामति निरूपितः ॥
सम्प्रत्यन्येषु मन्त्रेषु वाच्यं व्यापारयामहे ।

एवं परमात्मसूक्तमात्मानमेतत्सूक्तशेषतया अब्धस्सम्भूत इत्युत्तरनारायणाख्यानुवाको हिरण्यगर्भ.

End:

परमे सर्वोत्कृष्टे मधुवद्भोग्यतमे विष्णोः पदे उत्सः उत्सुक इति । त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः । उच्छिष्टभोजिनो दासाः तव मायान्तरे महिम्न्युक्तरीत्या परमपदे उत्सुको वर्तत इत्यर्थः ॥

Colophon:

श्रीपुरुषसूक्तव्याख्यानं सम्पूर्णम् ॥

Foll. 27*a*—29*a* contain the Jayantīśrāddhanirṇaya by Rāghavācārya of Vādhūlagōtra. Foll. 29*b*—32*b* are left blank.

R. No. **4461.**

Paper. 10⅝ × 9½ inches. Foll. 74. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Kṛṣṇa Śāstrigaḷ, Śriṅgēri-maṭham, Chinnamanur, Periyakulam taluk, Madura district.

Foll. 51*b* and 74*b* are left blank.

शुकसंवादमञ्जरी.

ŚUKASAṀVĀDAMAÑJARĪ.

On the discussion of the two parrots at the Varadarāja temple at Conjeeveram, while Rāmabhadradīkṣita, Pārthasārathimiśra and others entered the temple on their way to Rameśvaram: by Viśvanātha.

Breaks off in the third Āśvāsa.

Beginning:

कारणं पुरुषार्थानां तारणं पापकर्मणाम् ।
दारणं विघ्नशैलानां पुराणं वारणं भजे ॥
दद्यात्पाण्डवसारथिः परचमूरङ्गाङ्गने नाटयन्
घोटानिर्जितवासवार्वगमनान् सन्त्रासयन् कौरवान् ।
मोदं पाण्डवपक्षपातिनिखिलक्षोणीभुजां पश्यतां
कुर्वन्नाश्रितरक्षणैकरसिकः श्रेयांसि भूयांसि नः ॥
वेदान्तिशुकसंवादसन्तानकुसुमैर्नवैः ।
तन्यते विश्वनाथेन मञ्जरी विदुषां मुदे ॥
सर्ववेदान्तसिद्धान्तसन्तानकुसुमैः कृता ।
मञ्जरी बुधगीर्वाणवाणिवेणीमनोरमा ॥

एकदा नारदः—

सत्यलोके समासीनं सर्वलोकपितामहम् ।
उपगम्य नमश्चक्रे पितुश्चरणपङ्कजम् ॥

नारदोऽहमभिवादयामीति । ब्रह्मा—कथं नारदः? आयुष्मान् भव सौम्येति प्रत्यभिवादनमकरोत् ।

* * * *

Colophon:

इति शुकसंवादमञ्जर्यां प्रथमपरिच्छेदः ॥

अथ पार्थसारथिमिश्रः राममद्रमखिना सकुटुम्बेन चन्द्रशेखरेण च सह रामसेतुं गन्तुकामस्सन् कामाक्षीसहितैकाम्रेश्वरं वासोभिर्भूषणैः महारुद्रातिरुद्राति(दि)विधानेन शतरुद्रीयादिजपाभिषेकैरभिषिच्य ।

* * * *

Colophon:

इति हरिकेशपुराधीशराजसिंहेश्वरकृपाकटाक्षप्राप्तब्रह्मविद्यासम्प्रदायपरिशीलनधुरीणविश्वनाथविरचितवेदान्तशुकसंवादमञ्जर्यां तृ(द्वि)तीयाश्वासः ॥

End:

पण्डितपाण्ड्यपाण्डरशुकं समालोक्य काञ्चीनगरवासिनः नरनारीजनास्ससंभ्रमालोकनकुतुकनयनारविन्दनिस्सरदानन्दबाष्पपङ्किलभूप्रदेशाः पदात्पदमनुगन्तुमशक्नुवाना बभूवुः.

R. No. **4462.**

Paper. 10⅝ × 9½ inches. Foll. 54. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūtalūr-mana, Nareri, Tritala, Malabar district.

Fol. 54 is left blank.

शब्दकौमुदीव्याख्यानम्.

ŚABDAKAUMUDĪVYĀKHYĀNAM.

A commentary on Śokkanātha's Śabdakaumudī, which work has been described under R. No. 3316 ante: by Vaidyanātha, son of Ratnagiridīkṣita.

Begins from the middle portion of Ajantapumliṅga and breaks off in the course of Halantaprakaraṇa.

Beginning:

क्रमप्राप्तमिकारान्तशब्दं व्युत्पादयति—हरिरिति । अच (इः) इति व्युत्पत्तिपक्षे कृदन्तत्वेन प्रातिपदिकत्वम् । अव्युत्पत्तिपक्षे अर्थवदिति । रुत्वविसर्गौ । हरी इति । हरी(रि) औ इति स्थिते पूर्वसवर्णदीर्घ ईकारः । हरि जस् इति स्थिते आह—जसि चेति । अत्र ह्रस्वस्य गुण इति पूर्वसूत्रादनुवर्तते । अङ्गस्येति चाधिकारात् ह्रस्वेनाङ्गविशेषणात्तदन्तविधावलोऽन्त्यपरिभाषया च ह्रस्वान्तस्याङ्गस्यान्त्यस्य गुणः स्यादिति सूत्रानिर्दिष्टस्थानिकतया इक्परिभाषोपस्थानात् इगन्तस्याङ्गस्य गुणविधानात् ।

* * * *

तथा च रूपमालादौ पुंवद्भाव उदाहृतः । तस्मादेद(ज)न्तेषु स्त्रीबे पुंवद्भावो माधवमते नास्ति, मतान्तरे त्वस्ति, अतः प्रद्यावा, प्रराया, सुनावेत्यादि प्राचोदाहृतमपि नातीव दुष्यतीत्याहुः ॥

Colophon:

इति श्रीमद्रत्नगिरिदीक्षितपुत्रस्य वैद्यनाथशास्त्रिणः कृतिषु शब्दकौमुदीव्याख्याने अजन्तनपुंसकलिङ्गाः ॥

End:

रोः—सुप्प्रत्याहारग्रहणशङ्कां निराकरोति—सप्तमीबहुवचनस्येति । ननु प्रत्याहारग्रहणं न्याय्यम्; भिसादावप्राप्तविधिसम्भवात् । विधिनियमसम्भवे विधेरेव ज्यायस्त्वादिति अत आह—प(ख)रीत्यनुवृत्तेरिति । स्वरितत्वप्रतिज्ञावशादनुवृत्तस्य भिसादिव्यावृत्तिरेव प्रयोजनमिति प्रत्याहारग्रहणेऽपि सप्तमीबहुवचनस्यैव ग्रहणं पर्यवस्यति इति भावः ॥

R. No. 4463.

Paper. 10⅝ × 9½ inches. Foll. 98. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūtalūr-mana, Nareri, Tritala, Malabar district.

भागवतविवरणम्.

BHĀGAVATAVIVARAṆAM.

A commentary on the Śrībhāgavata, which work has been described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I.

Contains the commentary on the X Skandha complete but wants the Adhyāyas IV—VII in the middle.

Beginning :

पायाद्वो बलिमल्लकंसनरकादित्यारिकेतूभ(द)यः
प्रह्लादध्रुवरुक्मभूषणसुतक्ष्मारूर्ध्व(रुद्व)सन्तोदयः ।
व्यासव्यासजना . . पमुनिहृत्पद्मालिभानूदयः
त्रैलोकाख्यकुमुद्वतीमदकरः श्रीकृष्णचन्द्रोदयः ॥

उभयवंश्यानां सोमसूर्ययोर्वंशे भवानां यदोश्च वंशः कथित इति सिद्धानुवादोऽन्यत्पृष्टं तदाह—तत्रेति । कृतवान् यानि कर्माणीति शेषः । ननु विष्णोर्वीर्याणि मया बहुशो वर्णितानि । किं नाद्यापि तेष्वलंबुद्धिरिति चेत्तत्राह—निवृत्ततर्षैरिति ।

* * * *

Colophon :

इति श्रीभागवते दशमस्कन्धे प्रथमोऽध्यायः ॥

End :

देवस्य विभूतिं पुनस्सङ्क्षेपेण दर्शयति—सुखं स्वपुर्यामिति । किन्न- . . . . . प्रसूनानि यासां तास्तथाजातेन स्मरेण उत्स्मयस्तेन लसन्ति वदनानि यासां त . . . . . स्तथा यानि वचांसि न शेषे सन . . . . . त्यक्तया समेधितया मुकुन्दश्रीमत्कथाश्रवण . . . . . क्षितिभुजो ग्रामाद्वनं ययुः । ननु कथाश्रवणादिमात्रेण तद्धामप्राप्तिरित्येतच्चित्रमिति चेत्तत्राह—चित्रमि(ति) । . . . . षां तेषामुक्तिरूपमेतन्न चित्रं यस्याः स्त्रीणामपि गोपिकादीनामसुदुस्य(स्त्यज) . . . . शेषः ॥

Colophon :

इति भागवतविवरण(णे)[यामेकोन] नवति(तमोऽ)ध्यायः ॥
दशमः स्कन्धस्समाप्तः ॥
(रचि)ता श्रीभागवते विमला तत्त्वप्रदीपिका यतिना ।
यो गोवर्धनमूधरं करधृतं लीलाम्बुजन्मायितं
कुर्वन् स च . . . . . ॥

R. No. **4464.**

Paper. 10⅝ × 9½ inches. Foll. 24. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924-25 from a MS. of the Raja of Chirakkal, Malabar district.

हरिदिनप्रकाशः.

HARIDINAPRAKĀŚAḤ.

Similar to the work described under R. No. 4213(*b*) ante. By Pūrṇaparamabhaṭṭāraka.

Contains the Paricchēdas one and two complete, but wants the beginning.

Beginning:

तथान्यत्र—

रटन्ति ह पुराणादि(नि) भूयो भूयोऽपरार्थिनः ।
न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे ॥
* * * *
सुरापानात्सुरश्रेष्ठ पाने(तै)व नरकं व्रजेत् ।
एकादश्यन्नभोक्ता तु पितृभिस्सह मज्जति ॥

इत्यादि । तथा कात्यायनोऽपि—

यानि कानि च पापानि ब्रह्महत्यासमानि तु ।
अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे ॥ इति ।
* * * *
तस्मिन्नुपोष्य विधिवत्समाराध्य हरिं ततः ।
प्राप्नोति परमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥ इति ॥

Colophon:

इति श्रीमत्पूर्णपरमभट्टारकविरचिते हरिदिनप्रकाशे प्रथमः परिच्छेदः॥

End:

प्रत्यक्षानुमितवेदमूलत्वस्य समानत्वेन प्रामाण्यमपि समानमेव । तदिदिरूपार्थवादप्रक्रिया यावद्धर्मप्रतिपादकत्वं न वेद काप्यस्तीति न दौर्बल्यकारणमिति सर्वमनवद्यम् ॥

स्मृतिं पुराणानि विलोक्य यत्नात् प्राप्तो विवेको हरिवासरस्य ।
व्रताय नित्याय समस्तपुंसां विष्णोस्समाराधनमेतदस्तु ॥

Colophon:

इति श्रीमत्परमपूर्णभट्टारकविरचिते हरिदिनप्रकाशे द्वितीयः परिच्छेदः ॥

समाप्तोऽयं हरिदिनप्रकाशः ।

Fol. 1*a* gives the Mātṛkānyāsaviṣaya. Fol. 21 contains the Vaiṣṇavōtsavabaliprakāra.

R. No. **4465.**

Paper. 10⅝ × 9½ inches. Foll. 254. Lines, 20 in a page Grantha. Good.

Transcribed in 1924–25 from a MS. of the Raja of Chirakkal, Malabar district.

(*a*) मुहूर्तरत्नम्.

MUHŪRTARATNAM.

Foll. 1*a*—218*a*.

Same work as that described under R. No. 3295 ante. By Gōvinda Complete.

(*b*) सुबोधप्रायश्चित्तप्रकरणम्.

SUBŌDHAPRĀYAŚCITTAPRAKARAṆAM.

Foll. 218*b*—247*a*.

Similar to the work described under R. No. 741 ante.

Complete, but wants the beginning.

Beginning :

यत्र गत्यां (यद्गत्या च नृणां) शुभाशुभमिहामुत्रापि संलक्ष्यते
यच्चारसे(रोऽय)मभिव्यनक्ति सकलं भूतं तथानागतम् ।
येषां चारत एव जन्ममरणे सम्पाद्यपत्प्राणिनां
तानेतान् शिरसा नमामि (सततं) सूर्यादिसर्वग्रहान् ॥
श्रौतस्मार्तोक्तकर्म त्वभिहित(ति)थयो राशयश्चापि वान्ता
रारा(तारा)ज्योतिर्गणानां स्थितिरपि विविधास्सौम्यरौद्राख्यकाणाम् ।
तत्सर्वं सर्वशास्त्रैर्दुरधिगमतरं विस्तृतं सञ्चयित्वा
वक्ष्ये निर्धारणार्थं सकलहितकरं मन्दबुद्ध्या मदादे ॥ (?)
अस्रं योनिगतं तदार्तवमिति ख्यातं यदा दृश्यते
तत्कालादृतुनामषोडश निशा योज्याः प्रजोत्पादने ।
तत्राद्यास्तु चतस्र एव च निशा गम्येतरा वर्जिता-
श्शेषास्त्वोजनिशास्स्त्रियश्च जनने युग्माश्च पुंसोद्भवे ॥

End :

देवब्राह्मणवन्दनाद्गुरुवचस्सम्पादनात्प्रत्यहं
साधूनामभिभाषणाच्छ्रुतिरवश्रेयस्तथाकर्णनात् ।
होमादध्वरदर्शनाच्छुचिमनोभावाज्जपाद्दानतो
नो कुर्वन्ति कदाचिदेव पुरुषस्यैवं ग्रहाः पीडनम् ॥

Colophon :

इति सुबोधप्रायश्चित्तप्रकरणं समाप्तम् ॥

(c) ग्रहचारनिबन्धनम्.

GRAHACĀRANIBANDHANAM.

Foll. 247*a*—254*b*.

An astronomical treatise, for calculating certain details relating to Tithi, Vāra, Nakṣatra, etc

Incomplete.

Beginning :

हरिनाभिसमुत्पन्नपद्मकिञ्जल्कवर्तिने ।
प्रणम्य ब्रह्मणे कुर्यो ग्रहचारनिबन्धनम् ॥
समा मासीकृता युक्ता यातमासैर्दिनीकृता ।
अतीततिथिसंयुक्ता याता कार्या यथास्मृति ॥
त्रिशरीरीकृते राशावायस्ताभ्युद्धवर्धितान् (?) ।
आनूनज्ञानतुङ्गाप्तमध्याङ्कलगुणाद्दणम् (?) ॥
तं हत्वा हेमरत्नाङ्गैरपि मासात्फलं वृथा ।
शेषेशं गुणिते तेषामधिकामैर्विभाजिते ॥

End :

लिप्तीकृत्य स्फुटं चन्द्रं विभजेदष्टभिश्शतैः ।
अश्विन्यादीनि यातानि नक्षत्राणि फलं विदुः ॥
शेषोऽनन्तरनक्षत्रशतांशः परिकीर्तितः ।
भागहारं गतं हित्वा गन्तव्यांशोऽवशिष्यते ॥
मकरकेसक(रि)मेषयुवत्यौ तुलधरमीनकुलीरघटौ च ।
ऋषभधनुर्धरकोर्विनयुग्मौ षष्ठरन्ध्रभवने सुरशोभा यः ॥ ?

R. No. 4466.

Paper. 10⅝ × 9½ inches. Foll. 52. Lines, 20 in a page. Grantha. Good

Transcribed in 1924–25 from a MS. of the Raja of Chirakkal, Malabar district.

प्रपञ्चसारवृत्तिः.

PRAPAÑCASĀRAVṚTTIḤ.

A commentary on Śaṅkarācārya's Prapañcasāra (printed in the Śrī Vāṇīvilāsa Press, Srirangam), which is a treatise dealing with Mantras, Yantras, Prayōgas, etc., occurring in the various Āgamas: by Vijñānātman (Paramānandamaskarin?), disciple of Jñānōttama.

Contains the commentary on Paṭalas 1—14 and 28—32 only.

This commentary is also called Prapañcasāravivaraṇa.

Beginning:

नमामि दक्षिणामूर्तिं चतुर्वर्गफलप्रदम् ।
चतुष्षष्टिकलेशानं सर्वज्ञं विश्वतः स्थितम् ॥
नमो निखिलसंसारसागर(रोत्तार)सेतवे ।
ज्ञानोत्तमाय मुनये महामहिमशालिने ॥
श्रियः पतिं श्रियं वाण्याः पतिं वाणीं शिवं शिवाम् ।
नत्वा प्रपञ्चसारस्य वृत्तिरारभ्यते मया ॥
अकचटतपायैर्स्सप्तभिर्वर्णवर्गै-
र्विरचितमुखबाहा पादमध्याख्यहृत्का ।
सकलजगदधीशा शाश्वता(नी) विश्वयोनि-
र्वितरतु परिशुद्धिं चेतसश्शारदा वः ॥

अनेन श्लोकेन मनश्शुद्धिं विधातुं वाग्देवतेत्यधिकारसिद्ध्यर्थं प्रथमाचार्येण मनश्शुद्धिराशास्यते । शुद्धसत्त्वस्यैव परमपुरुषार्थाधिकारावतारः । अकचटतपायैर्वर्णवर्गैरिति । एतैः पञ्चाशद्भूतैः तत्परिणामभूतमन्त्रजालैरन्यैरपि लौकिकैर्वैदिकैश्शब्दैस्तत्प्रतिपाद्यार्थजातैश्च ।

* * * *

Colophon:

इति परमहंसपरिव्राजकश्रीमज्ज्ञानोत्तमपूज्यपादशिष्यस्य विज्ञानात्मभगवतः कृतौ प्रपञ्चसारविवरणे प्रथमः पटलः ॥

End:

असति प्रयोजने आवर्जनकृत् वशीकर्तो आसन्नाङ्गः दृढकनो(तमा)ङ्गः प्रत्यग्रः व्याकुलितः ॥

द्वात्रिंशः पटलः ॥

भक्त्या प्रपञ्चसारस्य श्रद्धया सम्प्रदायतः ।
व(च)क्रे वक्रपदव्यक्तिं परमानन्दमस्करी ॥

यतीन्दम(न्द्रैर)युतैस्तत्त्वज्ञानपुष्परसेप्सया ।
सेवितं भगवत्पाद(पाद)पद्मं नमाम्यहम् ॥

Colophon :

श्रीप्रपञ्चसारविवरणं समाप्तम् ॥

R. No. **4467.**

Paper. 10⅝ × 9½ inches. Foll. 38. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R Ry. Subrahmaṇya Dīkṣitar, Kolunjavadi, Dharapuram, Coimbatore district.

Foll. 1*a*—10*b* contain the Agnimukhakārikās and Navagrahamantra-ṛṣicchandōdēvatāvākyas.

(*a*) **आश्वलायनप्रयोगमञ्जरी.**

ĀŚVALĀYANAPRAYŌGAMAÑJARĪ

Foll. 10*b*—32*b*.

Similar to the work described under R. No. 3162(*e*) ante. By Rāghavāryamahāgnicit.

Contains the first Adhyāya complete, but wants the beginning.

Beginning :

कन्यां बुद्धिमते दद्यात्तां तु बुद्धिमतीमपि ।
उपयच्छेद(त)रूपाद्यैर्लक्षणैरभिसंयुताम् ॥
परीक्ष्य कुलमग्रे तु लक्षणानि परीक्षयेत् ।
शुक्लपक्षे शुभे वारे तथा कल्याणतारके ॥
श्राद्धमभ्युदयं कृत्वा पूर्वेद्युस्तद्य एव वा ।
दिवा वा यदि वा रात्रौ कृतप्रतिसरो वरः ॥

End :

उत्सर्जने तु पक्षे तु छागमेव निवेदयेत् ।
स्वगृह्योक्तेन मार्गेण सर्वेषां तु प्रतिग्रहः ॥

Colophon :

राघवाचार्यमहाग्नि(चित्)विरचिताश्वलायनप्रयोगमञ्जर्यां प्रथमोऽध्यायः ॥

(*b*) **अनाहिताग्निसंस्कारकारिका.**

ANĀHITĀGNISAṀSKĀRAKĀRIKA.

Foll. 32*b*—38*a*. Fol. 38*b* is left blank.

Similar to the work described under R. No 3162(*d*) ante.
Incomplete.

Beginning :

अनाहिताग्नेः प्रेतस्य संस्कारविधिरुच्यते ।
स्नातः पवित्रपाणिस्सन्नुपलिप्य यथाविधि ॥
प्राणानायम्य संस्कर्ता प्राचीनावीत्यनन्तरम् ।
प्रेताधानं च सङ्कल्प्य स्थापयेत् स्थण्डिलेऽनलम् ॥

End :

अभ्यर्च्य विश्वे देवास्तु प्रीयन्तामिति दैविकम् ।
ताभ्यामस्तु स्वधेत्युक्त्वा तं सृजेत् पितृपूर्वकम् ॥
पात्रोत्सर्गो द्वादशस्य एकाहाय तृणं भवेत् ।
द्विजोच्छिष्टं चाष्ट(स्त)मयान्नोद्धरेत्पितृतृप्तये ॥

R. No. **4468.**

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 10. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippad, Kūtalūr-mana, Nareri, Tritala, Malabar district.

Foll. 9*b* and 10 are left blank.

आशौचपद्धतिः.

ĀŚAUCAPADDHATIḤ.

Similar to the work described under R. No. 672(*e*) ante.
Complete.

Beginning :

शङ्खार्यब्जगदापरश्वधमृगाभीष्टाभयप्रस्फुर-
द्बाहू . . . . . ।
. . चन्द्रकचन्द्रबिम्बधवलच्छायाभिरामाकृती
वन्द्याप(व)ञ्जलिशेखरेण शिरसा वन्दे मुकुन्देश्वरौ ॥
मीमांसाख्यपयःपयोधिमथने मन्थायमानाशयो
यो धर्मागमवारिराशितरणे यश्चाञ्जनेयायते ।
अन्तेवासिजनान्तरार्धी(र्नि)तिमिरप्रध्वंससूर्यश्च यः
पाप्मा भीततरो यतश्च गुरवे तस्मै नमः श्रेयसे ॥

वाणीं विघ्नेश्वरं व्यासं योगीश्वरस्म(सु)रेश्वरौ ।
मनुमाद्यं च नत्वाहं वक्ष्याम्याशौचपद्धतिम् ॥
सपिण्डस्सोदको बन्धुराशौचग्राहिणो मताः ।
तातस्तातपिता तस्य पिता तज्जनकोऽस्य तु ॥
पिता तज्जनकस्तेषां भ्रातरस्तत्सुता अपि ।
पुत्राः पौत्राः प्रपौत्राश्च तत्पुत्रास्तत्सुता अपि ॥
(तद)पत्यानि ते सर्वे सपिण्डास्स्युस्सहात्मना ।
एत(क)त्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके ॥

End:

नोपनीतेरधः पुंसो न पाणिग्रहणे स्त्रियः ।
आशौचं बान्धवानां स्यान्नातिकालजमूतके ॥
अग्न्यम्भोविषशस्त्रभृग्वनशनैरुद्बन्धनाद्वा धिया
चण्डालक्षितिपालडिम्भभुजगैर्विप्राशनेभ्यामपि ।
व्याघ्रग्राहविहीनदंष्ट्रिपशुभिर्मृत्यौ न दाहोदके
स्यातां तत्करणे विशुद्धिरुदिता तप्तेन कृच्छ्रेण च ॥
बालव्युत्पादनायैव रचिताशौचपद्धतिः ।
पुनर्वचनदोषोऽतश्शङ्कनीयो न सूरिभिः ॥
मनीषादोषनिष्पन्ने मदुक्तानुक्तदूषणे ।
सद्भिः परीक्षकैस्त्याज्ये भूयस्तेभ्यो नमो नमः ॥

Colophon:

इति आशौचपद्धतिस्समाप्ता ॥

R. No. **4469.**

Paper. 10⅛ × 9½ inches. Foll. 276. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Śaṅkarasubba Śāstrigaḷ, Tiruchendur, Tinnevelly district.

Fol. 276*b* is left blank.

Bound in two volumes.

कालविधानपद्धतिः, सव्याख्या.

KĀLAVIDHĀNAPADDHATIḤ WITH COMMENTARY.

Similar to the work described under R. No. 1418 ante. By Trivikrama, son of Gangādhara. The commentary is called Śrīdhara.

Wants the beginning; otherwise complete.

Beginning:

अब्दपूर्तिप्रकरणमाह

अथैकेन श्लोकेनाब्दपूर्तिमाह—

वर्षान्त[मास]जन्मदिवसे रविमा(स)सिद्धे
संस्नाप्य शान्तिकरकर्म चिराय कृत्वा ।
आबध्य हेमकटिसूत्रमथानुकूले
लग्ने शिशोर्नवतराम्बरयोगमाहुः ॥

सौरवर्षान्तजन्मदिवसे शिशुं नद्यादिषु संस्नाप्यायुर्वृद्धिकरं कर्म मन्त्रभृतं कृत्वा हेममयं कटिसूत्रमाबध्य नवाम्बरधारणमाहुः । तथोक्तं विधिरत्ने—

अब्देन सौरेण शिशोस्समान्ते बालं तु संस्नाप्य च जन्मधिष्ण्ये ।
कृत्वायुषो वृद्धिकरं च कर्म तद्धारयेत्कटि(तटे) च सुवस्त्र(र्ण)सूत्रम् ॥

End:

लग्नगते गुरौ रवौ दशास्थिते चन्द्रजन्मचतुर्थे सप्तमे वा स्थिते सति भुवनानन्दाख्यो योगः । अत्र धनधान्यादगृहीतं चेद्यर्थं भवति । यत्कृतं प्राप्यते कार्यं च सिध्यति । तथोक्तमर्णवे—

गुरूदये रवौ स्वस्थे चन्द्रे तोयेऽभ्य(न्त)रेऽथ वा ।
द्रव्यसङ्ग्रहणं श्रेष्ठं प्रारम्भमहि सिध्यति ॥

सनमाह—

अनि(रि)न्दमग्रामनिवासकुण्डनप्रसिद्धगङ्गाधरपादनन्दनः ।
त्रिविक्रमः कालविधानपद्धतिं चकार सांवत्सरिकप्रसादतः ॥
वसिष्ठगर्गादिमताम्बुराशेस्समुद्धृतां कालविधानपद्धतिः(म्) ।
विलोक्य शास्त्रार्थमुशन्ति ये बुधाः चिराय तेभ्यश्रिरमस्तु भूतले ॥

Colophon:

इति श्रीधराख्ये कालविधानपद्धतिव्याख्याने तिथिवारनक्षत्रयोगस्तमाप्तः ॥

R. No. **4470.**

Paper. 10⅝ × 8½ inches. Foll. 92. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. obtained through M.R.Ry. S. Gōpālāchār, Villiyambakkam, Chingleput district.

हरिवंशपुराणम्.
HARIVAṀŚAPURĀṆAM.

Same work as that described under R. No. 3372 ante, wherein see for the beginning. By Brahmacārijinadāsa, pupil of Sakalakīrti.

Contains the Paricchēdas 21—30 complete and Paricchēda 31 incomplete in the Uttarabhāga. The MS. described under R. No. 3372 ante and the MS. described in this number make one complete copy of this work.

Deals with the following subjects :—

२१. पाण्डवद्वारवतीप्रवेशसुभद्रादिकन्यालाभः.
२२. पाण्डववनवासविराटपुरप्रवेशकीचकवधादिः.
२३. प्रद्युम्नकुमारयौवराज्यलाभवर्णनम्.
२४. प्रद्युम्नकुमारकौरवसेनाजयादि कृष्णयुद्धवर्णनम्.
२५. शम्भुकुमारोत्पत्तिद्वर्गावर्णनम्.
२६. जरासन्धवधकृष्णविजयप्राप्तिः.
२७. द्रौपदीहरणादिः.
२८. नेमिनाथदीक्षाग्रहणम्.
२९ समवसरणवर्णनम्.
३०. तत्त्वोपदेशवर्णनम्.
३१. रत्नत्रयवर्णनम्.

End :

इत्येवं निखिलां सभां प्रति जिनाधीशस्सुतत्त्वं महत्
भव्यानां भवनाशनं सुखकरं प्रोक्तः प्रवृत्तः प्रभुः ।
एवं यो हृदये दधाति सुकृती सम्भाव्यतेऽहर्निशं
स स्याच्छ्रीजिनराजपादकमलद्वन्द्वस्य दासस्सुखी ॥

Colophon :

इति श्रीहरिवंशपुराणे भट्टारकश्रीसकलकीर्तिशिष्यब्रह्मचारिश्रीजिनदासविरचिते तत्त्वोपदेशवर्णनं नाम त्रिंशः परिच्छेदः ।

धर्मोपदेशदातारं त्रिजगद्भव्यबोधकम् ।
दिव्यध्वनिसुधापानैः प्रणमामि जगद्गुरुम् ॥
अथ पूर्वोक्ततत्त्वानि पुण्यपापद्वयेन हि ।
समं नव पदार्थाः स्युर्दृग्ज्ञानशुद्धिकारकाः ॥

* * * *

व्रतशीलदयाहीना दानपूजापराङ्मुखाः ।
मिथ्यात्ववासिता मूढास्समस्तेन्द्रियलम्पटाः ॥

दुराचारा व्रतातीताः पापध्यानपराश्च ये ।
तेऽघपाकेन जायन्ते दीना भोगविवर्जिताः ॥

R. No. **4471.**

Paper. 10⅝ × 9½ inches Foll. 12. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Īśāna Nambūdirippāḍ, Valattedatta-tharananallūr-mana, Perungottukara post, Cochin State.

Foll. 11*b*—12*b* are left blank.

प्रायश्चित्तसङ्ग्रहः.

PRĀYAŚCITTASAṄGRAHAH.

Similar to the work described under R. No. 24(*b*) ante.

Contains the first Adhyāya complete.

Beginning:

विश्वेशं दक्षिणामूर्तिं भारतीं मद्गुरूनपि ।
प्रणम्य श्रौतविषयप्रायश्चितान्(त्त) विचिन्त्यते ॥
स्वबुद्धये (प्र)यत्न(श्र) क्रियते स तु कुत्रचित् ।
प्रयोगसौकर्याय(ा)पि स्याच्च येद(योऽ)त्यर्थमर्थवान् ॥
यत्तद्वाधूलकमतं व्याजौ(?) गुरुभिः कृतम् ।
सर्वशाखोपकारार्थं चित्तसारनिबन्धनम् ॥
यद्यद्बोधायनमते चोपकारि भवेदिह ।
तत्तद्विविच्य बालानामुपकाराय लिख्यते ॥
विविच्य वचने तत्राप्यावापोद्धार(द्वाप)सम्भवात् ।
क्रियतेऽत्र यथायोगं यत्नस्तद्विषयो मया ॥
विनाशः प्राय इत्युक्तं चित्तं सन्धानमुच्यते ।
विनष्टस्य तु सन्धानं प्रायश्चित्तपदेरितम् ॥
विध्यपराधे कुर्यात्प्रायश्चित्तं विधिस्तु कर्मैव ।

End:

स्कन्नानुमन्त्रणं कृत्वा शेषं न कुरुते क्रियाम् ॥
दुष्टेन हविषा दुष्टं कर्तुं (च) कृतकर्मणः ।
आवृत्तिः स्यात्तथा चोक्तं भास्करार्येण धीमता ॥
दुष्टेन निर्वृत्तमदुष्टबुद्ध्या कुर्यात्पुनर्दोषविवर्जितौ(?) ।
यागात्परं दुष्टमपः प्रवेश्य स्थाल्या इध्माः स्विष्टकृतो वुपायाः॥(?)

एवं मन्त्रगंना(गणा)म्नातप्रायश्चित्तानि विस्तरात् ।
प्रोक्तानि तानि नित्यानीत्याह बोधायनो मुनिः ॥
सौतवोक्तनिमित्तेषु प्रायश्चित्तानि कानि हि(चित्) ।
कार्याणीत्याह शालि(ला)किः कल्पकृन्मुनिपुङ्गवः ॥

Colophon:

इति प्रायश्चित्तसङ्ग्रहे प्रथमोऽध्यायः ॥

R. No. **4472.**

Paper. 10⅝ × 9½ inches. Foll. 72. Lines, 20 in a page. Grantha Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. S. Gōpālācāryar, Villiyambākkam, Chingleput district.

मन्त्ररामायणव्याख्या.

MANTRARĀMĀYAṆAVYĀKHYĀ.

A treatise forcedly interpreting certain hymns contained in the Ṛgvēda, by reading into them the ideas of the Rāmāyaṇa.

Contains the Vēdic Sūktas 1—125 only.

Beginning:

रामायणद्रुमं नौमि रामरक्षानवाङ्कुरम् ।
गायत्रीबीजमाम्नायमूलं मोक्षमहाफलम् ॥

अत्र रामरक्षायाः रामायणद्रुमाङ्कुरत्वं स्पष्टमवगम्यते । तत्स्थानां राघवादिपदानां क्रमेण रामायणार्थसूचकत्वात् । तस्या गायत्रीबीजत्वं वदमूलत्वं चोपपादनीयम् ।

* * * *

व्युत्पन्नग्राह्यत्वात्सिद्धं रामायणस्य श्रुतिमूलत्वम् । अतस्तन्मूलमन्त्रेष्वपि रामायण एव कथांशः सुप्रत्यक्षवृत्त्या लभ्यते । अध्यात्मांशः परोक्षवृत्त्येति भाष्यकारीयव्याख्यानेन सहैकैकस्य मन्त्रस्य त्रेधा व्याख्यानं क्रियते । तत्र कं नश्चित्रमिषण्यसीत्यादयः षट्, इषुर्न धन्वन्नित्यादयस्सप्तचत्वारिंशत्, तां सुते कीर्तिमित्यादय एकविंशतिः

* * * *

वाल्मीकिरभवद्ब्रह्मा वाणी वाक् तस्य रूपिणी ।
चकार रामचरितं पावनं चरितव्रतः ॥ इति ।

तेन कं न इति सूक्तस्य रामायणस्य चैकार्षेयत्वं सिद्धम् । देवता तु तयोरिन्द्ररामशब्दाभ्यां निर्दिष्टः परमेश्वर एक एव । यथा च

रामायणीये प्रथमेऽध्याये प्रश्नपूर्विका सङ्क्षिप्ता रामकथास्ति; तथास्मिन्नपि पञ्चचैं इत्यनयोर्मूलमूलिभावसिद्धो व्याख्याय प्रदर्श्यते । तत्रेयमाद्या ऋक्--कं न इति । अत्र वम्रः स्वस्य गुरुं कल्पयित्वा तं पृच्छन् तस्योत्तरमुखेन ईश्वरं स्तौति । भो गुरो त्वं चिकित्वान् स्तुत्यं पुरुषं जानन् किं चित्रादिगुणवन्तं वस्तुतयै(धय्यै) वर्धयितुं पराक्रमादिभिः स्तोतुं नः अस्मान् इषण्यसि प्रेरयसि चित्रं रमणीयम् ।

End:

अश्मन्वतीति---

अश्मन्वती रि(री)यते सं रभध्वमुत्तिष्ठत प्र च(त)रता सखायः ।
अत्रा जहामि(म ये) असन्नशेवाः शिवान् वयमुत्तरेमाभि वाजान्॥ १२९॥

R. No. **4473.**

Paper. 10§ × 9½ inches. Foll. 110. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Subrahmanya Dīkṣitar, Kolinjuvadi, Dharapuram post, Coimbatore district.

Fol. 110*b* is left blank.

आश्वलायनप्रयोगसारव्याख्या.

ĀŚVALĀYANAPRAYŌGASĀRAVYĀKHYĀ.

A commentary on Aśvalāyanaprayōgasāra dealing with the Gṛhya ceremonies.

Wants the beginning; otherwise complete.

Beginning:

तथा च वृत्तिकारः—येनैव द्रव्येण सायं जुहोति, तेनैव प्रातः प्रतिनिधिवर्जमिति । अत्र भगवान् शौनकः—

प्रोषिते तु यदा पत्नी यदि ग्रामान्तरं व्रजेत् ।
होमकाले यथा प्राप्ता न सा दोषेण युज्यते ॥

कात्यायनः—

विहायाग्नीन् सभार्यश्चेत् सीमामुल्लङ्घ्य गच्छति ।
होमकालात्यये तस्य पुनराधानमिष्यते ॥ इति ।

शौनकः—

यावज्जीवं परिचरेदेवमौपासनं गृही । इति ।

Colophon:

इति प्रयोगसारे औपासनविधिस्समाप्तः ॥

End :

तत्राष्टम्यां माघवर्षाभिधानं श्राद्धं कर्तव्यम् । तच्चे(चै)तेनाष्टकाकर्मणा व्याख्यातमिति । अत्रापि सप्तम्याद्यासु तिसृषु तिथिषु कार्यम् ।

अत्र भगवान्—

एतेनैव प्रकारेण माघवर्षाभिधानकम् ।
श्राद्धं प्रौष्ठपदे मासि कृष्णपक्षे समाचरेत् ॥ इति ।

नवावरान् भोजयेदयुजो वेत्यादिकं सर्वमत्राप्युपतिष्ठत एव ॥

Colophon :

इति माघवर्षाभिधं श्राद्धं समाप्तम् ॥

इति श्रीप्रयोगसारव्याख्या समाप्ता ॥

R. No. **4474.**

Paper. 10⅝ × 9½ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippād, Kūtalūr-mana, Nareri, Tritala, Malabar district.

Fol. 27*a* gives the owner's name of the original MS. Foll. 27*b*—28*b* are left blank.

आशौचाष्टकविवरणम्.

ĀŚAUCĀṢṬAKAVIVARAṆAM.

A commentary on Vararuci's Āśaucāṣṭaka dealing with the pollution to be observed in different cases of birth and death.

Complete.

Beginning :

वेदान्तसूर्यस्फुरितं योगिचित्तालिसेवितम् ।
मोक्षमध्वालयं वन्दे शम्भोः पदपयोरुहम् ॥
आशौचवाक्यतात्पर्यमुदितं येन शास्त्रतः ।
अष्टभिः पद्यकैर्जीयादसौ वररुचिः कविः ॥
श्रुतेरर्थः स्मृतेश्चापि कथितो येन तत्त्वतः ।
सुरेशं तं समभ्यर्च्य विवृणोमि त्वघाष्टकम् ॥

यथा च स्मृतिशास्त्रस्य भाष्यकारेण विश्वरूपाचार्येण विषयप्रयोजनसम्बन्धा उक्ताः तथैवात्रापि प्रपञ्चनीया धर्मशास्त्रमूलत्वादेव । तद्यथा

समासतो धर्माधर्मौ विषयः, प्रयोजनं चार्थकामापवर्गाणामनर्थदुःखबन्धानां च प्रयोजनत्वमेवेति पूर्वपक्षतयाभिधाय सिद्धान्ततयोक्तम् । अर्थादयोऽपि शास्त्रस्य विषयतां प्रतिपद्यैव प्रयोजनीभवती(न्ती)ति । अयमष्टवर्गोऽभ्युदयात्मकस्मृतिशास्त्रादेवावगम्यत इति नियमस्सम्बन्ध इति ।

* * * *

नाम्नः प्राग्दन्तजातेरुपनयनविधेरप्लवोऽहास्त्रिरात्रं
ज्ञातेरूर्ध्वं दशैतत्सहभुवि तु कृते नाम्नि पित्रोस्सदैव ।
स्त्रीषूक्तौ(षु क्षौ)राष्टमाब्दादुपयमनविधेः पूर्ववत्सन्निधौ स्यात्
मातुस्तन्मासससङ्ख्यास्समदिनमुभयोरुद्भवे गर्भनाशे ॥

अनेन ह्येकविषयतावभासेनान्योन्यविरोधिनां वाक्यानां विषयव्यवस्था क्रियते । सपिण्डादेशेनैव हि चत्वारः कल्पा आश्रीयन्ते ।

End :

पित्रोस्तु न पूर्वाशौचशेषाच्छुद्धिः । किं तर्हीति । अन्यद्दशाहेन शुद्धिरित्यर्थः । तथा चोक्तमेव सूतके सुतस्य चेति ·

Colophon :

इति आशौचाष्टके अष्टमः श्लोकः ॥
आशौचाष्टकविवरणं समाप्तम् ॥

आलोकयति(न्ति) विद्वांसो व्याख्यानमिदमादृताः ।

R. No. 4475.

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches. Foll. 50. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Divākaran Nambūdirippād, Puliyanūr-mana, Tripanattura post, Cochin State.

(a) सौभाग्यमञ्जरी.

SAUBHĀGYAMAÑJARĪ.

Foll. 1*a*—10*b*.

Similar to the work described under No. 5729 of the D.C.S. MSS., Vol. XII. By Nārāyaṇanātha, son of Viṣṇuvāsudēvanātha and pupil of Dēvarājagiripūjyapāda.

Breaks off in the fourth Unmēṣa.

Beginning:

आनन्दाचिच्छक्तिरिव ग्रस्ताशेषद्वयीपथम् ।
रक्तशुक्लात्मकं नौमि श्रीगुरोश्चरणद्वयम् ॥
श्रीविष्णुवासुदेवाख्यावाचार्यौ पितरौ च मे ।
नानाविद्याधुनीवारिपारावारौ सदा भजे ॥
विघ्नशान्तिप्रदं विघ्नं क्षेत्रेशं क्षेत्ररक्षकम् ।
वन्दे स्वतन्त्रं च वटुं योगिनीर्योगशालिनीः ॥
शान्त्यादिपञ्चकोदञ्चद्वरादिपदमन्थरा ।
जिह्वाग्रे नृत्यतां नित्यं मम नित्या सरस्वती ॥
कामराजक्रमायातसम्प्रदायमधुद्रवा ।
मया विरच्यते सम्यक् श्रीमत्सौभाग्यमञ्जरी ॥

अथ ब्राह्मे समये समुत्थाय विहितशौचाचमनो मृद्वासनयोन्या समासीनः

* * * *

कीर्तनाच्चाशुभानि व्यपोह्यार्थसिद्धिं दिशत्युत्तमामिति मङ्गलाष्टशतं पठित्वा बहिर्निर्गत्य कृतमङ्गलविसर्जनो यथा वा कृतशौचाचमनदन्तधावनमुखक्षालनादि स्नानं कुर्यात् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यकवितार्किकचक्रवर्ति श्रीदेवराजगिरिपूज्यपादशिष्यस्य श्रीविष्णुवासुदेवनाथपुत्रस्य श्रीनारायणनाथस्य कृतौ श्रीसौभाग्यमञ्जर्यां प्रथम उन्मेषः ॥

End:

ततः स्वहृदये मूलमन्त्रद्वयेन किञ्चित्कुसुमाञ्जलिं विधाय स्वगुरुमनुना शिरस्यभ्यर्च्यान्तरामृतैरात्मानमाप्लाव्य लब्धसुखो यागमण्डपान्तः प्रविशेत् ॥

Colophon:

इति श्रीमत्सौभाग्यमञ्जर्यां तृतीयोन्मेषः ॥

. . . . . गं ऐं क्लीं सौः क ए ई ल ह्रीं ह क ई लं ह्रीं हसकए ईलह्रीं नमस्त्रिपुरसुन्दरि सुभगे सुप्रसन्ने सुलभे सोमवदने

* * * *

कहए ईलह्रीं हकए ईलह्रीं सकए ईलह्रीं श्रीमहात्रिपुरसुन्दर्यै नमः.

(*b*) सौभाग्यविंशतिः.
SAUBHĀGYAVIṂŚATIḤ.

Foll. 10*b*—12*b*.

20 stanzas in praise of goddess Pārvatī.

Complete.

Beginning :

शेखरत्यविरतं विनतानां मौलिषु त्रिदशदैत्यगणा(ना)म् ।
यन्महात्रिपुरसुन्दरि नित्यं तद्भजामि चरणं शरणं ते ॥
देवि तावकपदस्मृतिभाजो वैभवस्य हि भवन्ति निदानम् ।
किं न पुष्यति विवस्वति लक्ष्मीं स्वैरमुद्यति सरोरुहपङ्क्तिः ॥

End :

सौभाग्यविंशतिरियं रचितेति भक्त्या
यस्तां पठेदनुदिनं परिपूज्य देवीम् ।
ऐश्वर्यमष्टगुणमाप्य यथाभिलाष-
मत्रापरत्र च पदं परमं प्रयाति ॥

Colophon:

सौभाग्यविंशतिस्समाप्ता ॥

Foll. 13*a*—16*b* contain the Parabrahmastuti with commentary.

(*c*) परमार्थसारः.
PARAMĀRTHASĀRAḤ.

Foll. 17*a*—21*b*.

Same text as that described under R. Nos. 832 and 3619(*a*) ante. By Śēṣa.

Complete.

The scribe adds—

नारायणेन लिखितम् ॥

(*d*) परमार्थसारशतकम्.
PARAMĀRTHASĀRAŚATAKAM.

Foll. 22*a*—27*a*.

One hundred stanzas in Āryā metre, giving the gist of Kashmirian Śaivism : by Abhinavagupta.

Complete.

Beginning :

परं परस्थं गगनादनादिमेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं तमेव शम्भुं शरणं प्रपद्ये ॥

गर्भाधिवासपूर्वकमरणान्तिकदुःखचक्रविभ्रान्तः ।
आधारं भगवन्तं शिष्यः पप्रच्छ परमार्थम् ॥
आधारकारिकाभिस्तं गुरुरभिभाषते स्म तत्सारम् ।
कथयत्यभिनवगुप्तश्शिवशासनदृष्टियोगेन ॥
निजशक्तिवैभवभरादण्डचतुष्टयमिदं विभागेन ।
शक्तिर्माया प्रकृतिः पृथिवी चेति प्रभावितं प्रभुणा ॥
तत्रान्तर्विश्वमिदं विचित्रतनुकरणभुवनसन्तानम् ।
भोक्ता च तत्र देही शिव एव गृहीतपशुभावः ॥
नानाविधवर्णानां वर्णं धत्ते यथामलस्फटिकैः ।
सुरमानुषपशुपादपरूपत्वं तद्वदीशोऽपि ॥

End :

तस्माच्छिवमार्गे (वा) निरतो यः कश्चिदेति स शिवत्वम् ।
इति मत्वा परमार्थे यथा तथा विप्रयतनीयम् ॥
इदमभिनवगुप्तोदितसङ्क्षेपं ध्यायतः परं ब्रह्म ।
अचिरादेव शिवत्वं निजहृदय(।)वेशमभ्येति ॥
आर्याशतेन तदिदं सङ्क्षिप्तं शास्त्रसारमतिगूढम् ।
अभिनवगुप्तेन मया शिवचरणस्मरणदीप्तेन ॥

Colophon :

इति परमार्थसारशतकं सम्पूर्णम् ॥

Foll. 27*b* and 28*a* contain a portion of the Śivastuti Foll. 28*b*—34*a* give the Nāḍiyōgaviṣayavacanas. Fol. 34*b* is left blank. Foll. 35*a*—42*a* contain a portion of Tāntrikapūjāvidhiviṣaya Fol. 42*b* is left blank.

(*e*) ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Foll. 43*a*—50*a*. Fol. 50*b* is left blank.

Similar to the work described under No. 13419 of the D.C.S. MSS., Vol. XXIV.

Contains the Khaṇḍas one to nine, but wants the beginning.

Beginning :

यतश्च मासा[न्] दिवसाश्च नाड्यः स्वाभीष्टकालावधिकाः क्रमेण ।
भवन्ति राश्यंशकलाश्च भानोः योग्यादिवाक्यं च कलासु कुर्यात् ॥

नीयेत तत्तद्दिवसाष्टकोक्तयोग्यादिवाक्यात् दिनभक्तलिप्ताः ।
कुर्यात्तदार्कस्फुटभुक्तिरेषा स्याद्यज्ञरत्नाद्रिवशार्धनर्णम् (?) ॥
अभीष्टपूर्वापरवाक्यभेदसार्धं गतिः स्यादुदये हिमांशोः ।
अभीष्टवाक्यान्निजपूर्ववाक्यत्यर्केन्दुशिष्टं गतिरर्ककाले ॥
वाक्यध्रुवैक्यं ह्युदय स्फुटेन्दुस्स एष शत्यर्थविवर्जितोऽस्ते ।

* * * *

Colophon :

इति प्रथमः खण्डस्समाप्तः ॥

End :

मन्दोच्चं दुष्करं भानोस्सुनखो भूमिज्ञ(ज)स्य तु ॥
बुधस्य नाकात्वि(?) गुरोः खरां मानपरं भृगोः ।
शनेरानन्द इत्येते भा(न्वा)द्यास्सर्वे ईरिताः ॥

Colophon :

इति नवमः खण्डः ॥

R. No. **4476.**

Paper. 10⅝ × 9½ inches. Foll. 20. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūtalūr-mana, Nareri, Tritala post, Malabar district.

शब्दकौमुदीव्याख्या—शाब्दिकरक्षा.

ŚABDAKAUMUDĪVYĀKHYĀ: ŚĀBDIKARAKṢĀ.

Similar to the commentary described under R. No. 4462 ante. By Cokkanāthādhvarīndu, son of Dvādaśāhayājin of Kauśikagōtra.

Contains from the beginning of the Śyanvikaraṇi to the end of the Yaṅlugantaprakriyā.

Beginning :

दिवु—आदिना विजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतयो गृह्यन्ते । सु एव(?) प्रकृतिप्रत्ययौ स्पष्टाविति उत्सर्गकीर्तनेन कर्तरि सार्वधातुक इति निमित्तं दर्शयति—शाब्विषय इति । दीव्यतीति । श्यनः

श्नाविती । तस्य सार्वधातुकमपिदिति ङित्त्वान्न गुणः । दीव्येत् . दीव्यतु, अदीव्यत्, अदेवीत् ।

* * * *

Colophon:

इति चोक्कनाथाध्वरीन्दुविरचितायां शब्दकौमुदीव्याख्यायां श्यन्विकरणा दिवादयस्समाप्ताः ॥

End:

सिजभ्यस्तेति जुसि जुसि चेति गुणस्त्विगन्तस्येतीह न । सिपीत्यादि । गुणे रपरे हल्ङ्यादिलोपे षषि जश्त्वे च अजर्धद् इति स्थिते रुत्वलोपदीर्घाः(अजर्घाः) । रुत्वस्य विकल्पितत्वात्पक्षे प्राग्वदजर्धदत (र्त्) इत्यपि रूपं सिद्धम् ।

च(ज)गच्चर्कर्ति बर्भर्ति सज्जहर्ति च योऽव्ययः ।
भवं मृडं हरं शम्भुं तं त्यागेश्वरमाश्रये ॥

Colophon:

इति कौशिककुलतिलकसञ्चारिभाष्यश्रीमद्द्वादशाहयाजिपौत्रेण शब्दतन्त्रस्वतन्त्रश्रीचोक्कनाथाध्वरीन्दु(ना)विरचितायां शब्दकौमुदीव्याख्यायां शाब्दिकरक्षाख्यायां यङ्लुगन्तप्रक्रिया ॥

फणिग्रामणिवाग्गुम्भप्राणनाड(य)यदुक्तये ।
कलये शब्दकौमुद्याः कवये गुरवे नमः ॥

R. No. **4477.**

Paper. 10⅝ × 9½ inches. Foll. 56. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūtalūr-mana, Nareri, Tritala post, Malabar district.

Fol. 56 is left blank.

उपहारप्रकाशिका, सविमर्शा.

UPAHĀRAPRAKĀŚIKĀ WITH VIMARŚA.

A commentary on Upahāraprakāśikā, which work has been described under R. No. 4455(*c*) ante.

Complete.

Beginning:

देवतायै नमस्तस्यास्सपर्यातत्त्वसिद्धये ।
सम्यग्विमृश्यतेऽस्माभिरुपहारप्रकाशिका ॥

ग्रन्थारम्भे तावदाचारतस्तदविघ्नपरिसमाप्त्याभि(दि)सिद्धये समुचितदेवता सपर्यां प्रथमतः करोति—

स्नेहविश्वाससम्मानभक्तिज्ञानं जलादिना ।
मनसा महनीयाय नमो नरकवैरिणे ॥

नरकवैरिणे नम इति (इ)यमिहानातिलक्षणा सपर्या । नरकस्य वैरी नरकवैरी । नरको नाम कश्चिदसुरः । वैरी शत्रुर्निग्राहकः । स च विष्णुर्देवतानां प्रवरः । नरकनिग्रहादीनां तदीयासाधारणकार्यत्वात् ।

* * * *

अथ यदर्थमेतन्मङ्गलमाचरितं, तच्चिकीर्षितं वस्त्वाचष्टे—

सपर्याहृदयाख्यस्य सप्तकस्य पुनर्या(मया) ।
व्याख्या प्रणीयते पद्यैरुपहारप्रकाशिका ॥

सपर्याहृदयव्याख्या(यभिधाख्या) · यस्य तत् सपर्याहृदयाख्यं सपर्या पूजा सा चावाहनाद्युद्वासनान्तावान्तरांशशालिनी तस्या हृदयं जलाद्युपहार-समर्पणं सारत्वात् ।

End:

मूर्तेर्भेदमुक्त्वा विशेषणार्थं दर्शयति—तत्करेति । तस्य करेणाकलिते गृहीते कुम्भे सम्यक् तिष्ठतीति तथोक्तं दोरमिति कुम्भविशेषणम् । विकरणस्वभावतानेनोक्ता । फलारम्भे[ने]न(ण) दर्शितफलोत्पत्तिमाह—तेनेति । साध्यस्य बहिष्ठस्यापि हन्मूर्तिसन्निधौ भावनामात्रमेतत् ॥

Colophon:

सपर्यासप्तकव्याख्या सम्पूर्णा ॥

The scribe adds—

सपर्यासप्तकव्याख्या लिखिता कृष्णसंज्ञिना
अक्षरैर्लेखपाशेन कायस्थ[पणे]कपटात्मना ॥

R. No. 4478.

Paper. 10⅝ × 9½ inches. Foll. 84. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of Maṅgāttammaṅgār, Vaḍakkutirumāḷigai, Alwartirunagari, Tinnevelly district.

Fol. 84*b* is left blank.

उचितोपायनिर्णयः.

UCITŌPĀYANIRṆAYAḤ.

A treatise dealing with the proper means of salvation according to the Teṅgalai sect of Śrī-Vaiṣṇavas. The authorities herein relied upon have been taken from various sources, such as Kaṭhavallī, Mahōpaniṣad, Viṣṇutattvasaṁhitā, etc.

Complete.

Beginning:

महाचार्य(स्य) तनयं महनीयगुणान्वितम् ।
वाधूलवंशतिलकं श्रीनिवासगुरुं भजे ॥
व(र)ङ्गभर्तृपुरोभागे रत्नस्तम्भमुपाश्रितम् ।
मन्त्ररत्नं प्रयच्छन्तं वन्दे वरवरं मुनिम् ॥
सौम्यजामातृयोगीन्द्रचरणाम्बुजषट्पदम् ।
देवकादि(राज)गुरुं वन्दे दिव्यज्ञानप्रदं शुभम् ॥

* * * *

रङ्गमङ्गलधुर्याय रम्यजामातृयोगिने ।
उज्जिजीविषतां पुंसामुचितोपायनिश्चयः ॥
श्रुतिस्मृतिपुराणादीन् शोधयित्वा विधीयते ।
श्रुतार्थमननायैव सोऽयं मम समुद्यमः ॥

* * * *

प्रामाण्यमादौ शास्त्राणां पश्चादात्मनिरूपणम् ।
ततस्संसृतिहेतुश्च ततस्संसरणक्रमः ॥
मनुजत्वस्य दौर्लभ्यमस्थैर्यं कर्मवश्यता ।
सङ्गस्य दुःखहेतुत्वं मुक्तस्साध्यत्वमेव च ॥
श्रीशस्य तदुपायत्वं तत्स्वरूपनिरूपणम् ।

* * * *

श्रीविष्णुतत्त्वे—

चक्रादिधारणं पुंसा परसम्बन्धवेदनम् ।
पतिव्रतानिमित्तं हि वलयादिविभूषणम् ॥

महोपनिषदि —

दक्षिणे तु (भुजे) विप्रो बिभृयाद्वै सुदर्शनम् ।
सव्ये तु शङ्खं बिभृयादिति ब्रह्मविदो विदुः ॥

यजुषि कठवल्लीशाखायाम्—

धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण पदा हृदि स्थितं परात्परं यन्महतो महान्तम् ॥

End:

दुष्कृतैर्दोषबहुलैरस्वस्वरूपविरोधिभिः ।
कर्मज्ञानादिभिर्योगैः काङ्क्षन्ति परमं पदम् ॥
लब्ध्वा तदीयशेषत्वं लक्ष्मशर्यपयापरे? ।
तमेव शरणं यान्ति तर्तुं संसारसागरम् ॥
कश्चिदेव महाभाग कल्याणगुणशालिनः ।
देशिकेन्द्रस्य दृष्ट्यैव निर्भरो निर्भयो भवेत् ॥
तदेव तत्त्वविज्ञानं तदेव हितमुत्तमम् ।
स एव प्राप्यनिष्कर्षः सदाचार्यैः(र्यैकटाक्षतः) ॥

R. No. **4479.**

Paper. $10\frac{5}{8} \times 9\frac{1}{8}$ inches. Foll. 54. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Pūmalli-mana, Chalasseri post, Malabar district.

भक्तिचिन्तामणिः.

BHAKTICINTĀMAṆIḤ.

A treatise on the importance of devotion and means of cultivating it. Deals with the following subjects:—

१. भक्तिस्वरूपनिरूपणम्.
२. मूलमन्त्रतर्पणविधिः.
३. मन्त्रन्यासविधिः.
४. मन्त्रप्रकारशिक्षा.
५. पूजाविधिः.
६. आत्माराधनम्.
७. उपहारपञ्चकम्.
८. पुरश्चरणहोमविधिः.
९. पुरश्चरणतर्पणम्.
१०. पीठपूजाविधिः.
११. महावाक्यार्थविचारः.

Incomplete.

Beginning:

श्रीकृष्णाख्यं परं ब्रह्म स्मृत्वा नत्वा मुहुर्मुहुः ।
भक्तिचिन्तामणिं नाम कुर्वे तत्सेवनक्रमम् ॥

गोविन्दमङ्गलकृपाश्चितसिन्धुशायी
सूरीन्द्रसारतरमूलयुतोपदेशः ।
गोप्योऽपि कालभवमूलवचःप्रमोष-
प्राप्त . . स्मृतिभयेन विलिख्यतेऽसौ ॥

सानत्कुमारं क्रमदीपिकां च समुच्चयस्त(यं त)द्विवृती च मूलम् ।
तें . . . मूलग्रहणं त्विह स्यादन्येष्वनुक्तेर्मतभेदतो वा ॥

इह तावन्निर्विवादतया सर्वेषां दुःखनिवृत्तिपूर्वकसुखावाप्तिरूपश्रेयोलाभलोभित्वात्तदुपायेष्वेव विवादात् तत्र श्रुतिस्मृतिपुराणगणभणितोपायानां स्वर्गधनपुत्रादिमात्रफलत्वस्य

* * * *

श्रीभगवद्गीताभागवतपुराणसङ्ग्रहादिभिश्च भक्तिरूपमेवोपासनामिति पटहोद्घुष्टम् । स्नेहबहुमानार्थविश्वासयुक्तचित्तार्द्रतानुमिलितं प्रसादमात्रतत्परं भजनमेव च । भक्तिर्नाम तस्याश्च, श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं ध्यानं सख्यमात्मनिवेदनम् ॥ इति नवविधरूपत्वेऽपि स्मरणमेव प्रसाधनमुपासनाशब्दवाच्यम् ।

End:

अथ जलमवतीर्य गोपालगायत्र्या त्रिरर्घ्यं प्राणायामव्यापकाङ्गन्यादि कृत्वा तर्पणदशा(शांशं) जपेत् । यावत्तर्पणं वा जपः कार्यः इत्येतच्चिन्त्यमिति ॥

Colophon:

इति भक्तिचिन्तामणौ पुरश्चरणतर्पणविधिः ॥

अथैषा पूजा नित्यमशक्यत्वात् षट्पीठपूजाप्युच्यते--- आभिवाद्य प्राणायामादि कृत्वा मूलं त्रिवारं जपित्वा पुनः ऋष्यादिमात्रं कृत्वा कमण्डलुजले गन्धपुष्पादिकं निधाय स्पृष्ट्वा मूलमिमा आप इति च जपेत् ।

* * * *

ईड्यो भवति सर्वेषां गन्तव्यश्च मुमुक्षुभिः ।
एतानर्थानभिप्रेत्य देवस्येत्यभिधीयते ॥

यो नोऽस्माकं धियो बुद्धिश्चो(द्धिं चो)दयात्प्रेरयेत्सदा ।
तद्धीमहि सदा गृह्य चिन्तयेमहि मुक्तये ॥

R. No. **4480.**

Paper. 10⅝ × 9½ inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of the Raja of Chirakkal, Malabar district.

Foll. 55 and 56 are left blank.

कृष्णविलासः.
KṚṢṆAVILĀSAḤ.

Same work as that described under R. Nos. 85(*e*) and 3439 ante, wherein see for the beginning. By Sukumārakavi.

Contains the Sargas 8—12 complete.

End:

श्यामश्शरत्पङ्कजचारुनेत्रः कौशेयवासास्सकिरीटहारः ।
भुजोपधाने भुजगेन्द्रतल्पे शेते किलास्मिन् पुरुषः पुराणः ॥
प्रान्तेन पूगद्रुमवाटिकानां निवार्यमाणार्कमहःप्रवेशान् ।
पारश्रितः पश्चिमवारिराशेः पश्चा प्रिये कोङ्कणभूमिभागान् ॥

Colophon:

इति सुकुमारकृते कृष्णविलासे द्वादशस्सर्गः ॥

R. No. **4481.**

Paper. 10⅝ × 9½ inches. Foll. 66. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Subrahmaṇya Dīkṣitar, Kolanjuvadi, Dharapuram post, Coimbatore district.

Fol. 66 is left blank.

कारिकारत्नम्.
KĀRIKĀRATNAM.

Kārikās dealing with the procedure to be adopted in the Gṛhya ceremonies to be performed by the followers of Āśvalāyana: by Nārāyaṇasūri, son of Dēvarāja of Bhāradvājavaṁśa.

Contains the Pūrvakriyā complete.

Beginning:

. . . . रङ्ग . . . ताङ्गं लक्ष्म्याङ्गस्य क्षिप्तमिन्द्राश्मलक्ष्म्या ।
लक्ष्मीमिष्टां कर्मकुञ्चयो ददा(नं) लक्ष्मीनाथं क्षीरदं नौमि लक्ष्म्या ॥

नन्दीशा(नाख्या)ग्निचित्सूरिसू(नुं) . . . . (भा)सयन्तं महोभिः ।
यत्पादश्रीसेविनां चित्तसंज्ञं पद्मं धत्ते साधु नित्यं प्रबोधम् ॥
यः कर्मरत्ननिचय(यं) श्रुतिवारिराशे-
(रु)द्धृत्य चान्द्रदृढसूत्रगतं वि(धत्ते) ।
(लब्धवर्णवर)कर्णविभूषणं तं
नौम्याश्वलायनमशेषगुरुं मुनीन्द्रम् ॥
तद्वृद्धाणां कारिकारत्नसंज्ञां टीकां याव(द्बु)द्धि नारायणोऽहम् ।
भा(रद्वाजाग्नि)ख्यवंश(शाम्बुराशौ) जातो वक्ष्ये देवराजार्यसूनुः ॥

* * *

अग्निं समूह्य पर्युक्ष्य दद्याद्विप्राय दक्षिणाम् ।
यथोक्तदक्षिणालाभे हिरण्यं (च स)शक्तितः ॥
यद्यस्ति हुतशिष्टं तु दद्याद्विप्राय तद्विदे ।
सम्यक् प्रक्षाल्य पात्राणि गृह्णीयाद् द्वन्द्वशः क्रमात् ॥

Colophon:

अग्निमुखं समाप्तम् ॥

End:

कृत्वाग्निमुखपर्यन्तं महाव्याहृतिभिर्घृतम् ।
पाहि नो अग्न इत्याद्यैश्चतुर्मन्त्रैश्च याजुषैः ॥
जुहुयात्पाहि नो अग्न एकया इत्यृचैकया ।
पुनर्महाव्याहृतिभिर्हुत्वा शेषं समाप्य च ॥
अतीते विहितं कर्म विदधीत ततः परम् ।
स्नातकस्य व्रते लुप्ते प्रायश्चित्तमभोजनम् ॥

Colophon:

इति श्रीनारायणसूरिविरचिते कारिकारत्ने पूर्वक्रिया समाप्ता ॥

R. No. 482.

Paper. 10⅝ × 9½ inches. Foll. 78 Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1924-25 from a MS. of M.R Ry. Nārāyaṇa Nambūdirippād, Pūmalli-mana, Chalasseri post, Malabar district.

Foll. 77*b*—78*b* are left blank.

आश्वलायनगृह्यमन्त्रव्याख्या.
ĀŚVALĀYANAGṚHYAMANTRAVYĀKHYĀ.

A commentary on the Mantras contained in the Gṛhyaprayōga in accordance with the school of Āśvalāyana: by Haradattācārya.

Contains the Adhyāyas two to four complete.

Beginning:

अथाष्टकायाः पिण्डपितृयज्ञप्रकृतित्वात् पिण्डपितृयज्ञमन्त्रा आकृष्य व्याख्यायन्ते । तत्रैकोल्मुकं प्राग्दक्षिणा प्रणयेद्ये रूपाणि प्रतिमुञ्चमाना इत्यनया वामदे . . . . . : रभिधेयः । ये असुराः रूपाणि शरीराणि पितृणामिति वाक्यशेषः । प्रतिमुञ्चमानाः प्रतिपूर्वो मुचिः परिग्रहार्थः । परिगृह्णन्तः स्वयमसुरास्तन्तः स्वधया स्वधेत्यन्ननामानि ।

* * * *

Colophon:

इति हरदत्तविरचिते गृह्यमन्त्रव्याख्याने द्वितीयोऽध्यायः ॥

End:

अथोदङ्ङावृत्य तत्र प्रदेशे क्षारितमसृगादि ताभ्य एव निवेदयति श्वासिनीः सर्पा इत्यन्तं तावत् । अत्र प्रदेशे यद्व उपभोगयोग्यं तद्धरध्वं स्वीकुरुत । शान्तातीयं जपन् । व्याख्यातं शान्तातीयम् ॥

Colophon:

इति हरदत्तविरचितायामाश्वलायनगृह्यमन्त्रव्याख्यायां चतुर्थोऽध्यायः ॥

R. No. **4483.**

Paper. 10⅛ × 9⅛ inches. Foll. 212. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of the Raja of Chirakkal, Malabar district.

Foll. 211 and 212 are left blank.

भारतसङ्ग्रहः.

BHĀRATASAṄGRAHAḤ.

A poem describing the story of the Mahābhārata: by Rāmavarman, sister's son of Kēraḷavarman, and who was the sister's son of Ravivarman. It is said that this work was written at the instance of Kēraḷavarman.

Breaks off in the 25th Sarga.

श्रीमान् गणेशः श्रितपारिजातः श्रेयोऽक्षयं वेदवनद्विपेन्द्रः ।
हरीश्वराजैरपि मान्यमानो विघ्नान्धकारो . . . . . ॥
. . . . . प्रसादात् ।
प्रयान्ति तद्धाम परं विधातुः प्राणेश्वरीं तां शरणं प्रपद्ये ॥
सदाखिलाभिस्सहितः कलाभिः द्वैपायनेन्दुः कृतिरश्मिजालैः ।
हरन् जगन्मोहमहान्धकारमानन्दमस्पृष्टतमादिशेन्नः(?) ॥
येषां नगर्यैलिगिरावुदारा विभाति मेरावमरावतीव ।
तेषां नृपाणां भवति स्म वंशे महाप्रभा श्रीरिव दुग्धसिन्धौ ॥
सम्प्राप्तराज्यं रविवर्मसंज्ञं दातारमस्यास्तनयं समेत्य ।
उदारकल्याणधरालयस्थाः प्रजा विपक्षार्थिगणा ननन्दुः ॥
दधाति शेषश्शिरसा धरित्रीमसौ भुजेनेति जगत्त्रयेण ।
संमान्यमानो विनिधाय भूमिं निजानुजे स त्रिदिवं प्रपेदे ॥
गुणाकरः केरलवर्मनामा स तेन दत्तं प्रतिपद्य राज्यम् ।
शश्वत्प्रजारञ्जनजागरूको निर्मूलयामास मदं रिपूणाम् ॥
चतुर्विधान्नेन जनान्प्रतोष्य धर्मान्महादानमुखान् स कृत्वा ।
प्रादर्शयद्धाम्नि शिवेश्वराख्ये कामप्रदं जीवितमम्बिकायाः ॥
जगन्निवासं हृदये दधानो मुदा कदाचिन्निजभागिनेयम् ।
स रामवर्माणमुवाच काव्यं विधीयतां भारतसङ्ग्रहाख्यम् ॥

* * * *

तस्मात्तपत्यां तपनात्मजायां जातः कुरुर्भूमिपतिर्महीयान् ।
संरक्षिताशेषजनस्तपोभिश्चक्रे कुरुक्षेत्रमशेषपुण्यम् ॥
तस्मादभीश्वानभवत्सुतोऽस्य जज्ञे परीक्षिज्जनमेजयाख्यः ।
तस्यात्मजोऽभूद्धृतराष्ट्रनामा पुत्रस्ततोऽमुष्य ररक्ष भूमिम् ॥
तस्यात्मजश्शात्रव . . . . . जज्ञ हस्ती ।
कृत्वा पुरं हस्तिननामधेयं प्रपालयामास चिरं धरित्रीम् ॥

* * * *

घृताचीसंज्ञायास्सुरचलदृशो दर्शनवशात्
भरद्वाजाज्जातश्चलितमनसो यो मुनिवशात् ।
प्रवेश्य श्रीमत्स्वं सदनमथ दारात्मजयुतं
स तं द्रोणं भीष्मो गुणनिलयमानर्च विधिना ॥

Colophon :

इति श्रीरामवर्मकृतौ भारतसङ्ग्रहे प्रथमस्सर्गस्समाप्तः ॥

End :

अजातारिं शक्रात्मजमपि समारोप्य जगतां
समस्तानामीशः श्रितसुखसुधांशूदयगिरिः ।
रथं स्वं श्रीमन्तं कुपितमथ यान्तं मधुरिपुः
वितन्वन् सारथ्यं पवनतनयं सोऽनुगतवान् ॥

Colophon :

इति श्रीरामवर्मकृतौ भारतसङ्ग्रहे चतुर्विंश[ति]: सर्गस्समाप्तः ॥

भागीरथीं प्राप्य समीरसूनुर्व्यासं मुनीन्द्रैस्सहितं जलान्ते ।
निषण्णमालोकयति स्म तं च द्रौणिं धृताङ्कं कृशचीरयुक्तम् ॥
पार्थान् सकृष्णान् कुपितान् सशस्त्रान् द्रौणिस्समेतानवलोक्य धृत्वा ।
करेण सव्येन जवादिषीकां समादधे ब्राह्ममुदारमस्त्रम् ॥

* * * *

मुनिनाश्वासितास्तेन कथंचिद्धैर्यमाश्रिताः ।
दारैः पौरैश्च सहिता गङ्गां पाण्डुसुता ययुः ॥
स्नात्वा ते जह्नुकन्यायां पुरस्कृतयुयुत्सवः ।
स्वर्गतायाम्बिकेशा(या)य विधिवत्सलिलं ददुः ॥
गान्धारकन्यापृथयोर्जलदा[नं] यथाविधि ।
चक्रुः कालेऽखिलास्ते.

R. No. **4484.**

Paper. $10\frac{1}{8} \times 9\frac{1}{2}$ inches. Foll. 78. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Kaimukku-mana, Pudukkadu post, Cochin State.

Fol. 77*b* gives the name of the owner of the original MS. Fol. 78 is left blank.

आश्वलायनश्रौतसूत्रसिद्धान्तिभाष्यम्.

ĀŚVALĀYANAŚRAUTASŪTRASIDDHĀNTIBHĀṢYAM.

Same work as that described under R. Nos. 1695(*a*) and 3939 ante, wherein see for the beginning. By Viṣṇugūḍhōpādhyāya.

Contains the Adhyāyas 7—12 complete.

End:

सर्वे वा ष(ड्हाभि)ङ्वाः स्युः -इति गवामयनमुक्त्वा पुनस्सर्वे वा षडहा इति वचनादयं विकल्पो न गवामयने नातिदिष्टेषु । सर्व[त्र]-ग्रहणादुभयोरपि पक्षयोः षडहाभिङ्वा एवेति । अथ वा सर्वग्रहणं दाशरात्रिकस्य षडहस्याभिङ्वार्थम् ॥

Colophon:

इत्याश्वलायनसूत्रव्याख्यायां सिद्धान्तिकृतभाष्ये एकादशोऽध्याय-स्समाप्तः ॥

गवामय—व्याख्यातम् । गवामयनग्रहणं सर्वप्रकारार्थम् । सर्व-प्रकारेण गवामयनेनेति । इतरथा एतेनेति वाच्यं स्यात् । सर्वेऽभिङ्वा-ख्विवृत्पञ्चदशाः ।

* * * *

इतरथा ज्योतिष्टोमः पृष्ठशमनीय इत्याहऽविधानात् ज्योतिष्टोमस्य पृष्ठ-शमनीयत्वे सहस्रदक्षिणात्वमेव स्यात् । तन्मा भूत् । द्वादशशतदक्षिणात्वं वा कथं स्यादित्येतदर्थमारभ्यते ॥

Colophon:

इत्याश्वलायनसूत्रव्याख्यायां द्वादशोऽध्यायस्समाप्तः ॥

R. No. **4485.**

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches Foll 68. Lines, 21 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdiri, Kaimukku-mana, Puluikkadu post, Cochin State.

Fol. 68*b* is left blank.

आश्वलायनश्रौतसूत्रसिद्धान्तिभाष्यम्.

ĀŚVALĀYANAŚRAUTASŪTRASIDDHĀNTIBHĀṢYAM.

Same work as that described under R. Nos. 1695(*a*) and 3939 ante. By Viṣṇugūḍhōpādhyāya.

Contains the Adhyāyas two to four complete and the fifth incomplete.

R. No. 4486.

Paper. 10⅝ × 9½ inches. Foll. 188. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Kudala post, Ganjam district.

Fol. 188*b* is left blank.

Bound in two volumes.

नैषधचरितटीका—हर्षहृदया.

NAIṢADHACARITAṬĪKĀ : HARṢAHṚDAYĀ.

A commentary on Śrīharṣa's Naiṣadhacarita, which work has been described under No. 11543 of the D C S. M.SS., Vol. XX: by Gōpīnātha Ratha.

Contains the Sargas 1–11 complete.

Beginning:

अर(व)क्कहरसंयोगस्फुरद्वामविलोचनाम् ।
बालेन्दुशिरसं वन्दे जगन्मातरमम्बिकाम् ॥
निर्व्याजभाजे तनवेऽर्धमर्धं प्रसह्य वै . वजिनाङ्कितोऽपि ।
अर्धार्धसन्धावित एकदेहौ गौरीगिरीशौ शिवमावहेताम् ॥
जीयान्नलः सकलराजकमौलिरत्नं
यत्कीर्तनं सकलमङ्गलमातनोति ।
यत्कीर्तिमौक्तिकगणाभरणा . हर्ष-
श्रीहर्षशुद्धकविता परितो भ्रमन्ती ॥
श्रीहर्षसूक्तिसरसीपरिशीलनेऽत्र
वाणी ममातिविरसापि रसावहास्तु ।
(सं)सर्गमेव मिलितं मलयोद्भवेन
वारि स्फुटं परिमलाश्रयतां प्रयाति ॥
सितज्योत्स्नामषश्य।(धाश)मिततमसः श्रीधरसुधां(धी।
सुधांशोरादाय प्रगुणवचसां सारममृतम् ।
नवामेतां वापीमिव कवि(वरो हर्ष)हृदया
भिधां गोपीनाथो नलचरितटीकां वितनुते ॥
अस्यां प्रविश्य सुधियः परिशोधयन्तु
सन्देहतापगदितं चरितं नलस्य ।

वैमानिका दिवि दिवाकरसन्निधान-
जन्मानमुष्णमहिमानमिव द्युनद्याम ॥

नलचरितमिदं महाकाव्यं चिकीर्षुः श्रीहर्षमहाकविः पुण्यश्लोक-नलनृपतिनामकीर्तनेन सकलमङ्गलपूर्तिरिति प्रथमनिर्दिष्टदेवतानमस्करणं च समुल्लङ्घ्य वस्तुनिर्देशाख्यं बिन्दुरूपं महाकाव्यरूपमाह—निपीयेति । सितच्छत्रितं श्वेतच्छत्रीकृतं कीर्तिमण्डलं येन शुक्लत्वात्, पृथिवीमण्डल-सदृशत्वात् जनतापरहितत्वाच्च कीर्तिमण्डलस्य सितच्छत्रत्वम् ।

* * * *

Colophon :

इति श्रीकविराजश्रीगोपीनाथरथकृतायां हर्षहृदयाभिधायां नलचरित-टीकायां प्रथमस्सर्गः ॥

End :

शृङ्गार एवामृतमाह्लादकत्वात् । तेन शीतांशुश्चन्द्रस्तारभूतस्तस्मिन्न-नैषधानां नरेशानां निषेधो यत्र ॥

Colophon :

इति श्रीगोपीनाथरथविरचितायां हर्षहृदयाख्यायामेकादशस्सर्गः समाप्तः ॥

R. No. **4487.**

Paper. $10\frac{5}{8} \times 9\frac{1}{8}$ inches. Foll. 192. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Tekkattu-mana, Kumaranallur post, Malabar district.

Foll. 191*b* and 192 are left blank.

महाग्निसर्वस्वम्.

MAHĀGNISARVASVAM.

A commentary on the Kalpasūtras of Bōdhāyana, dealing with the procedure to be observed in connexion with Śrauta sacrifices: by Vāsudēva Dīkṣita, son of Annapūrṇā and Mahādēva.

It is stated that the commentator Vāsudēvadīkṣita, author of the Adhvaramīmāṁsākutūhalavṛtti, was patronised by the well-known Pandit Ānandarāya, who was the prime minister of the three kings, viz., Sāhaji, Śarabhōji and Tulajā of the Cōḷa Kingdom.

Complete in 20 Adhyāyas.

Beginning :

बोधायनं प्रणम्याग्नेः कल्पसूत्रं यथामति ।
द्वैधकर्मान्तसूत्राभ्यां सह व्याख्यास्यते तराम् ॥

अग्नेरनारभ्याधीतत्वादनारभ्याधीतानां च प्रकृतिगामित्वाद्दीक्षादि-सम्बन्धाद्दर्शपूर्णमासयोश्च दीक्षाद्यभावाज्ज्योतिष्टोमाङ्गताध्यवसीयते । दीक्षादिभिर्ज्योतिष्टोमाङ्गं प्रसिद्धं तत्सम्बन्धोऽग्नौ भवति । श्रूयते— दीक्षित उरूय बिभ(भ्र)त्तनूपसदमग्निं चिनोतीत्यादि ।

* * * *

Colophon :

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मसा(षोडशा)ररथचक्राकाराद्यनेक-गुणविराजमानमहाग्निविलसत्प्रौढानेकमहाध्वर्यु(र)स्य श्री(साहजी)शरभतुलजा-ख्यचोलमहीपालत्रयामात्यधुरन्धरस्य पदवाक्यप्रमाणपारावा(रपा)रीणस्य श्रीम-दानन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपोष्येण बाल्य एव तद्दयानिर्वर्तितसाग्नि-चित्यानेकाध्वरेण तदध्वर्युणा महादेववाजपेययाजिसुतेनान्नपूर्णागर्भजातेन वासु-देवदीक्षितविदुषा विरचिते महाग्निसर्वस्वे प्रथमोऽध्यायः ॥

End :

चित्तूरग्रामाधिवासी कृतमखमहितः साग्निचित्सर्वपृष्ठा-
प्तोर्यामा(ख्या)नुमाख्या(यी)महितमखकृतः केशवार्यस्य पुत्रः ।
सुब्रह्मण्याख्ययज्वाविशदमदधुना रामवर्माख्यमाठ
श्रीभूपालेन पोष्यस्सुमखिकृतमिदं त्वाग्निसर्वस्वमध्यम् ॥

Colophon :

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मसाररथचक्राकाराद्यनेकगुणविराज-मानमहाग्निविलसत्प्रौढानेकमहाध्वर्यु(र)स्य

* * * *

वासुदेवदीक्षितविदुषा विरचिते महाग्निसर्वस्वे एकोनविंशोऽध्यायः ॥

अथ यूपैकादशिनीप्रयोगो निरूप्यते.

प्रायेण सोमक्रतुषु एकयूपेन यूपैकादशिनी निरूप्यते.

* * * *

स्वाहेत्यभितोवपाहोमयो[illegible]तिवपाहोमं प्रसक्त्यभावेन तदङ्ग(ग)ति-स्स्पष्टेपि(ति) स्पष्टं चैतत भाष्ये । एवमेकादशानुबन्ध्या इति व्याख्येयम् ॥

Colophon :

समाप्तोऽयं) महाग्निसर्वस्वः(म ॥

R. No. 4488.

Paper. 10⅝ × 9½ inches. Foll. 56. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924-25 from a MS. of Maṅgāttammaṅgār, Vaḍakkuttirumāḷigai, Alwartirunagari, Tinnevelly district.

Fol. 56*b* is left blank.

सङ्कल्पसूर्योदयव्याख्या.

SAṄKALPASŪRYŌDAYAVYĀKHYĀ.

Same work as that described under R. No. 3150 *ante*, wherein see for the end. By Bhāṣyanārāyaṇa who was the younger brother of Śrīnivāsācārya of Śrīvatsagōtra and disciple of Accivōṅkaṭācārya.

Contains the first Act complete.

Beginning:

इह खलु श्रीरङ्ग(राजदिव्याज्ञा)लब्धवेदान्ताचार्या . . . . . भक्तितदितरविषयविरक्तिभूषितो भगवद्विषयबहुप्रबन्धकर्ता तदितरमतनिरसनकर्ता च . . . . दुर्लभवृत्तिः सर्वतन्त्रसङ्कट . . . . विशङ्क . . . . . श्रीमान् वेङ्कटनाथो नाम कवितार्किकसिंहः तापत्रयहेतुभूतभवा . . . . . जन . . . . . परमकारुणिकतया

* * * *

नान्दित्वरूपेण प्रतिपाद्य कथावस्तु सूचयन् श्लोकद्वयं निबध्नाति— (यद्भक्तीत्यादि) ।

* * * *

Colophon:

इति यतिवरचरणसरोरुहभृङ्गायमाणाच्च(च्चि)वेङ्कटगुरुकृपालब्धश्रीभाष्यान्वयेन श्रीवत्सकुलतिलकश्रीनिवासदेशिकावरजेन श्रीभाष्यनारायणसूरिणा विरचिते सङ्कल्पसूर्योदयव्याख्याने प्रथमोऽङ्कः ॥

R. No. 4489.

Paper. 10⅝ × 9½ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924-25 from a MS. of the Zamindar of Chellapalli, Kistna district.

विजृम्भितराजयोगसूत्रभाष्यम्.

VIJṚMBHITARĀJAYŌGASŪTRABHĀṢYAM.

Foll. 1*a*—12*b*.

Slightly different from the work described under R. No. 2546(*j*) ante. By Śaṅkarācārya.

Complete in five Adhyāyas.

Beginning:

हठयोगलक्षणं विस्तरेण निशम्य प्राकृतः सद्गुरुमेवमवादीदिति राज योगं वद कृपयेति । स तु तं विनयसद्वचनं गुरुर्भक्ताग्रगण्यं शिष्यं शृणु सावधानेनेत्यादरेणेदमाह । राजयोगो राजोपयुक्तो योगस्तथोच्यते, योगानां राजेति वा राजयोगः पूर्वोक्तयोगा देहप्रयासकराः । अयं तु निरायासेन मोक्षरूपपुरुषार्थप्रदः । हठवदस्याष्टाङ्गानि सन्ति ।

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशङ्करभगवत्पादाचार्यविरचिते विजृम्भितराजयोगसूत्रभाष्ये प्रथमोऽध्यायः ॥

End:

पापा(टना)स्फोटनदलनदशा(धलधला)यमानतेजो(जा) भूत्वा तत्समीप-विश्वव्योमव्याप्तिपरिपूर्णचन्द्रमण्डलनिष्ठसान्द्रामृतनिष्यन्दबिन्दुसन्दोहपानपरि-तृप्तसदानन्दरूपनिश्चयं प्राप्य निस्संशयस्त(यत)च्चाकाशो(रो) भूत्वा सदा-नन्दावधूतकृपालेशान्मुक्तोऽस्मीति भावितव्यः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीशङ्करभगवत्पादाचार्यविरचिते विजृम्भितराजयोगसूत्रभाष्ये पञ्चमोऽध्यायस्समाप्तः ॥

Foll. 13*a*—14*b* contain a portion of the Layayōga or Manōvṛttilaya.

R. No. 4490.

Paper. 10⅝ × 9½ **inches.** **Foll.** 94. **Lines,** 20 **in a page.** **Dēvanāgarī.** Good.

Transcribed in 1924–25 from a MS. of the Zamindar of Chellapalli, Kistna district.

कल्याणचम्पूप्रबन्धः.

KALYĀṆACAMPŪPRABANDHAḤ.

A treatise in prose and verse describing the story that led to the marriage of Pārvatī with Śiva: by Pāpayārādhya of Vēmayārādhya family.

Contains the Stabakas one to five complete.

Beginning :

जयन्ति जगतां मातुः स्तनकुङ्कुमबिन्दवः ।
मुकुन्दाश्लेषसङ्क्रान्तकौस्तुभश्रीविडम्बिनः ॥

अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥

श्रियं दिशतु केलिकाभल(व)नदर्पणान्तस्स्थली-
निजप्रतिकृतेर्मुहुर्विनिमयं स्वभागे दधत् ।
परस्परमयात्मतां परिकलय्य यद्भासते
ज्वलत्परतरं महस्समरगं सनारीनरम् ॥
दोषज्ञास्सुधियो विरुद्धकलनादन्यज्ञतां संशये
त्वास्माकीनचिकीर्षिते गुणकणाभावात्तदर्थोऽन्वितः ।
सत्वे(त्ये)वं प्रकटीकरोमि वचसां पारम्परीं तत्कृपा-
लोकातीन सुधायते रसवशाल्लोहो यथा रुग्मताम् ॥ (?)

* * * *

कल्याणचम्पूघटनापटीयसीं मतिं ममाराधयमर्थवत्तया ।
सुधीषु यद्या भयमालभन्ते चकार मां पात्रमपूर्ववृत्त्या ॥
यत् कल्याणकथासुधामधुरिमा जिह्वा रसज्ञाभिधां
लब्ध्या योगबलादपि त्रिजगतां निश्चित्य वैपश्चितीम् ।
कल्याणीं गतिमैहिकीं वितनुते चामुष्मिकीं सन्ततं
कल्याणाद्रिधनुर्धरो विजयतां कल्याणचम्पूमुखे ॥

* * * *

आदि(धि)तृषार्ता धन्याध्वन्या इव घस्रे(स्र)करोत्प्रमर्दितास्तमिस्रा इव करेणुरेणूकृताः पद्मा इवाश्रान्तमातरिश्वोद्धूतारम्भाः स्तम्भा इव सभास्तारा रहितालापविस्तरा दुस्तरपरिदेवनां भजन्तश्चुक्रुशुः ।

* * * *

अनन्तगुणकल्याणकथामयसुधारसः ।
कल्याणचम्पूप्रथमस्तबकस्तनुतां यशः ॥

Colophon:

इति कल्याणचम्पूप्रथमस्तबकः ॥

End:

सप्तास्सप्त च सप्तसप्तिमहसा दीप्ताः प्रमोदामृतैः
तृप्ताश्शैलविभुं प्रपद्य किमिदं का स्यादनेहःक्षपा ।
देवीमानय मानयेश्वरप(व)रं पाणिग्रहः प्रस्तुतः
कन्यादानविधिश्च सत्वरमिति व्याजह्रुरुच्चावचम् ॥

ततो हिमहा(वा)न(म)न्दप्रमोदलहरिकासमुत्थापनेन सत्वरविसृत्वरान्तस्सञ्चारचुञ्चुरनुगतगुणाभिनयानूनया मेनया सह जगत्पतेरात्मभूप्रतिपादनेन कृतार्थीकर्तुमात्मानं

* * * *

दुन्दुभिध्वानैराहूतैर्वरसन्निधानमयासीत् ।

* * * *

नित्यानन्दे निगमतुरगे स्वात्मवस्तुन्यखण्डे
यद्बह्वीलाविलसितमिदं कल्पितं द्वित्ववृत्त्या ।
तत्तत्सर्वं वियति विपिने वृक्षवाट्यां रसाले
पुष्प गन्धः फलमिति कथां कल्पयेद्विद्वदग्रे ॥

Colophon:

इति श्रीपापयाराध्यविरचिते कल्याणचम्पूप्रबन्धे पञ्चमः स्तबकस्समाप्तः ॥

दिग्वधूकर्णकल्हारचूलींकेलीं तनोतु सा ।
वेमाराध्यकुलीना या पापयाराध्यभारती ॥

R. No. **4491.**

Paper. 10⅝ × 9½ inches. Foll. 130. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kūṭalūr-mana, Nareri, Tritala, Malabar district.

शब्दकौमुदीव्याख्या.
ŚABDAKAUMUDĪVYĀKHYĀ.

Similar to the work described under R. No. 4462 ante. The commentator, whose name is not given, quotes from Śābdikarakṣā, Bhāṣyaratnāvalī and Nārāyaṇaṭīkā and criticises unfavourably Manōramā, Śabdakaustubha, etc.

Breaks off in the Paribhāṣāprakaraṇa.

Beginning:

यस्य किल मूर्तिभदाः पाणिनिवररुचिपतञ्जलयः ।
तस्मै नमः परस्मै धाम्ने श्रीचोक्कनाथमखिनाम्ने ॥
साम्राज्यस्याधीमो मायामार्गारल भुजगमायूरे(?) ।
यद्दलितारिश्रौत्रं ववन्दिरे रूपमिन्द्रका देवाः ॥
भाष्यपरिश्रमशंसी टीका व्याख्यानशब्दकौमुद्याः(?) ।
भट्टोजिकृतिषु किंचिद्व्याकुलयिष्ये यथार्थबोधाय ॥
मद्वचनव्याकुलितो भट्टोजिसुधीशिखामणेर्ग्रन्थः ।
दास्यति रसं बुधानां दुग्धाम्बुधिरिव गिरिक्षुभितः ॥
अन्तर्दृशा विमलया पदशास्त्राम्भोधिपारदृश्वा यः ।
एकोऽपि स यदि शृणुयादिमां कृतिं स्यान्मम श्रमस्सफलः ॥
अविदित्वा पातञ्जलमनवेक्ष्य निबन्धनानि चान्यानि ।
ग्रन्थे जडैः कृतास्मिन् निन्दा निन्दा न नुतिरपि नुतिर्न ॥
अवन्ति ते हन्त मदन्तरन्धतां स्तुवन्ति ये मे निशमय्य भारतीम् ।
ब्रुवन्ति दोषानिह ये दुरुत्तरा भवन्ति नूनं गुरवस्त एव मे ॥

अथ ग्रन्थकारस्स्वाचरितं ग्रन्थपरिसमाप्तये गुरुदेवतानमस्काररूपं मङ्गलं शिष्यशिक्षायै निबध्नन् प्रेक्षावत्प्रवृत्तये विषयं निर्दिशति—सोमास्कन्दमित्यादि । उमास्कन्दाभ्यां सहितं शिवं सुखरूपं ब्रह्म ।

* * * *

वैदिकशब्दोपयोगिव्याकरणप्रणेतृत्वलक्षणमतिशयितं सामर्थ्यं प्रतिपाद्यते । गुरूनिति । नल्लपेरुमालदीक्षितप्रभृतीनित्यर्थः ।

End:

सुप्तिङन्तं पदम् । सौत्रत्वान्निर्देशस्य ङमुट् न कृतः । द्वन्द्वान्ते श्रूयमाणस्य प्रत्येकं सम्बन्ध इत्याह—सुबन्तं तिङन्तं चेति ॥

फणिग्रामणिवाग्गुम्भप्राणनाड(य) यदुक्तये ।
कलये शब्दकौमुद्यः कवये गुरवे नमः ॥

Colophon:

इति संज्ञाप्रकरणं समाप्तम् ॥

इको गुणवृद्धी—इति वृद्धिरादैच् अदेङ्गुणः इत्यतः पुनर्गुणवृद्धि ग्रहणमनुवर्तते । तेन यत्र गुण इति गुणविधिः, वृद्धिरिति वृद्धिविधिरित्यर्थलाभादाह—स्वसंज्ञयेति ।

* * * *

किं चादसोऽसेरित्युकारः अमुममुनेत्यादावेव स्यात् । अमुमुयङ् इत्यद्रे रेफस्य न स्यात् ।

R. No. **4492.**

Paper. 10⅝ × 9½ inches. Foll. 76. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of the Raja of Punnathur, Pudukkadu post, Malabar district.

प्रयोगपद्धतिः (रत्नावलिः).

PRAYÔGAPADDHATIḤ (RATNĀVALIḤ).

This treatise is written after consulting a large number of Tantric works. The subjects dealt with herein can be made out from the headings given below:—

१. भूपरीक्षा.
२. भूपरिग्रहः.
३. गर्भन्यासविधानम्.
४. देवालयविधिः.
५. प्रतिमालक्षणम्.
६. दारुशिलामृण्मयप्रतिमादि.
७. अङ्कुरार्पणम्.
८. प्रतिष्ठामण्टपलक्षणम्.
९. स्नपनादिः.
१०. उत्सवप्रायश्चित्तादिः.
११. जीर्णोद्धारः.
१२. ब्रह्मकूर्चादिः.
१३. पवित्रारोहणादिः.

Complete.

Beginning:

नमोऽनन्तागमज्ञानज्ञेयरूपाय वेधसे ।
तथापि वाङ्मनोऽतीततत्त्वाय परमात्मने ॥

यो वेदवृक्षं बहुमूलशाखं नानाफलार्थिद्विजसङ्घसेव्यम् ।
पूर्वश्रवानुश्रवभेदभिन्नमारोपयन्तं पुरुषं प्रपद्ये ॥

सनत्कुमारोत्तरगार्गीयपरमपाराशर्यपद्मोद्भवनलकूबरपुष्करसौमन्तकवैहायसानन्ताख्यहैरण्यगर्भीयनारदीयपरमपुरुषकापिलाद्यानि तन्त्राणि निरीक्ष्य मधुकरैर्मध्विव यथाशक्ति सारमुद्धृत्य परीक्षादीनां क्रियाणां रत्नावलिर्नाम प्रयोगपद्धतिः क्रियते । तत्र सर्वासां क्रियाणामाचार्यकालमूलत्वात् पूर्वमाचार्यः(र्यं) श्रद्धास्तिक्ययुतसर्वमन्त्रार्थकोविदं प्रतिष्ठाकर्मकुशलमूहापोहनिपुणं यथावदुक्तकारिणं प्रतिषिद्धासेविनं चतुष्टयस्नानविदमुपसङ्गम्य प्रियं दत्वा स्वकामं निवेद्यामन्त्र्य व्रतमानीय कालं निरूप्य भूपरीक्षादिषु योजयेत् ।

End:

तस्य जन्मर्क्षवामयोश्शिष्यसकाशयोर्ज्ञात्वा सर्वेषामानुकूल्यं ज्ञात्वा सामान्यशब्दपूर्वं दक्षिणापूर्वमशक्तस्याज्ञापूर्वं मन्त्रं दद्यात् । सा(शा)क्तषण्मन्त्र . . न्येषां दिक्तर्पणं नास्ति । अन्यत्सर्वं समानम् ॥

Colophon:

इति रत्नावलीपद्धतिस्समाप्ता ॥

R. No. 4493.

Paper. 10⅝ × 9½ inches. Foll. 96. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Nārāyaṇa Nambūdirippāḍ, Kaimukku-mana, Pudukkadu post, Cochin State.

Fol. 96*a* gives the name of the owner of the original MS. Fol. 96*b* is left blank.

शारीरकशास्त्रसङ्ग्रहः.

ŚĀRĪRAKAŚĀSTRASAṄGRAHAḤ.

Same work as that described under R. Nos. 2905 and 3383 ante, wherein see for the beginning. By Kṛṣṇānubhūtiyati, disciple of Ānandānubhūti. This work is also called Śāstrasaṅgraha.

Breaks off in the third Pāda of the III Adhyāya, but contains one additional stanza in the beginning.

Beginning:

गीर्वाणेन्द्रसरस्वत्या पादाब्जं हृदि बिभ्रतः ।
श्रीधरस्य मुदे भूयात् सूत्रभाष्यार्थसङ्ग्रहः ॥

End:

चतुर्थेन व्यवहारदशायां कर्मफलदातृत्वं शाखाग्रचन्द्रन्यायेनोपलक्षणत्वाय प्रतिपादितमित्येव तत्त्वम्पदार्थौ शोधिताविति स्थितम् ॥ इति ।

Colophon:

कृष्णानुभूतियतिभिः रचिते शास्त्रसङ्ग्रहे ।
द्वितीयपादस्सम्पूर्णः तृतीयाध्यायसंश्रितः ॥

इति कृष्णानुभूतियतिविरचिते शास्त्रसङ्ग्रहे तृतीयाध्यायस्य द्वितीयः पादः ॥

विज्ञेयस्य ब्रह्मणस्तत्त्वमुक्तं विज्ञानानां तत्त्वमत्र ब्रुवाणः ।
वेदान्तेषु प्रोक्तविद्यैक्यमादौ वक्तुं तावत् सूत्रकारः प्रवृत्तः ॥
तृतीयपादस्य प्रथमाधिकर(ण)माह—सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात।

विद्यानां प्रतिवेदान्तमनेकत्वमथैकता ।
सङ्ख्यागुणादिभेदेन विद्यानेकत्वमापतेत् ॥
फलसंयोगरूपाख्या पुंप्रयत्नाविशेषत ।
विद्यैकत्वमनूद्यत्वात्सङ्ख्याया न विधेयता ॥

R. No. 4494.

Paper. 10⅝ × 9½ inches. Foll. 16. Lines, 20 in a page. Dēvanāgari. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Hariharārājaguru, Chochinajagannathapuram, Kudala post, Ganjam district.

(*a*) रत्नदीपिका.

RATNADĪPIKĀ.

Foll. 1*a*—13*a*. Fol. 13*b* is left blank.

Similar to the work described under R. No. 2942 ante. By Caṇḍēśvara.

Deals with the following subjects :—

१. वज्राणां शुभाशुभकथनम्.
२. मुक्तालक्षणकथनम्.
३. माणिक्यरत्नकथनम्.
३. नीलरत्नगुणागुणकथनम्.
५. मरकतलक्षणकथनम्.
६. गोमेदलक्षणम्.
७. मणिगुणकथनम्.
८, ९ उपरत्नलक्षणकथनम्.
१०. रत्नधारणफलश्रुतिः.

Breaks off in the tenth Jyōtis.

Beginning :

भक्तेभ्यो भुवनाधिपत्यवरदं देवैर्महेन्द्रादिभिः
सिद्धैश्चारणगुह्यकैर्मुनिगणैः प्रोदि(द्भु)ष्टपादाम्बुजम् ।
संसारभ्रमभीरुणा त(तु) मनसा ध्यायन्ति यं योगिनं
तं वन्दे शशिखण्डमण्डितजटाजूटं भवं धूर्जटिम् ॥
. . . तु य . पुरीष . . . दत्वा रत्नधेनुदिदृक्षया ।
चक्रे चण्डेश्वरः श्रीमान् विचित्रां रत्नदीपिकाम् ॥
नवरत्नेषु धातूनामुत्पत्तिगुणजातिभिः ।
गुणान् निरीक्षते तेषु शोधनं चात्र कथ्यते ॥

तत्रादौ रत्नानां गुणानाह —

व्यासागस्त्यवराहादिमुनयो रत्नसागरे ।
निर्मथ्य ज्ञानशैलेन नवरत्नसुधा(हृता) ॥

* * * *

Colophon :

इति श्रीरत्नदीपिकायां वज्राणां शुभाशुभकथनं नाम प्रथमज्योतिः ॥

End :

क्षयपीता(पित्ता)म्लवातघ्नं विषघ्नं पाचनं लघु ।
विद्रुमं निर्मलं स्निग्धं सर्वदोषरुजापहम् ॥

Colophon :

इति श्रीरत्नदीपिकायामुपरत्नलक्षणकथनं नाम नवमो(मं) ज्योतिः ॥

निर्दोषं यदि वज्रकं खलु भवेत् विप्रः परं सिद्धिदो
मृत्युः क्षत्रिय उत्तमः क्षयतशं दन्ते(?) च वैश्यस्तथा ।

शूद्रो हन्ति रुजाकरं खलु तथा वीर्यं च सर्वं क्रमा-
द्विप्रक्षत्रियवैश्यशूद्रविषये योषा(?) नरैः पण्डितैः ॥

* * * *

इत्येवं नव कीर्तितानि मुनिभी रत्नानि सर्वग्रह-
प्रीत्यै व्यासवराहनारदमुखैः सर्वज्ञभावं गतैः ।

(*b*) पञ्चसायकम्.
PAÑCASĀYAKAM.

Foll. 14*a*—15*b*. Fol. 16 is left blank.

Same work as that described under R. No. 2812 ante, wherein see for the beginning. By Kaviśēkhara alias Jyōtirīśa.

Contains the fifth chapter complete, but wants the beginning.

End :

प्रसारितोरुद्वितयस्य योगाद् दृढापि नारी श्लथतामुपैति ।
संलग्नजानुद्वयमध्ययोगात् श्लथापि सङ्कोचमलं युवत्याः ॥

* * * *

रजकी मालिनी धात्री योगिनी परिवेशिनी ।
नटी गोपालिनी चेटी नापिती दूतिकास्तथा ॥

Colophon :

इति श्रीकविशेखरविरचिते पञ्चसायके सुरतबन्धभेदो नाम पञ्चमः सायकः ॥

R. No. **4495.**

Paper. 10⅝ × 9½ inches. Foll. 118. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of the Zamindar of Challapalli, Kistna district.

Fol. 118*b* is left blank.

श्यामारहस्यम्.
ŚYĀMĀRAHASYAM.

A treatise on the worship of Śyāmā, a manifestation of Śakti; the work has been written after consulting a number of Tantric works, such as Phētkārītantra, Kālikākulasarvasva, Kālītantra, Yāmala, etc.: by Pūrṇānandaparamahaṁsa.

Contains the Paricchēdas 1—18 complete.

Beginning:

देवीं दानव[दैत्य]कोटिदर्पनिवहान् संहारयन्तीं शिवां
ब्रह्मानन्तमहेशमौलिमणिभासंशोभिताङ्घ्रिद्वयाम् ।
नत्वा श्रीगुरुदेवताङ्घ्रिसरसीजातामृताप्लावितः
पूर्णानन्दगिरिस्तनोति मतिमान् श्यामारहस्याभिधान्(म्) ॥
स्वतन्त्रं परतन्त्रं च फेत्कारीतन्त्रमेव च ।
कालिकाकुलसर्वस्वं कालीतन्त्रं च यामलम् ॥
कालिकाकुलसद्भावं तथा चोत्तरतन्त्रकम् ।
गुरूणां च मतं ज्ञात्वा साधकानां मतं तथा ॥
शुद्धबुद्धिश्च(स्व)भावार्थं वक्ष्यामि मोक्षकारिणीम् ।
महाविद्यां महागोप्यां पुरुषार्थप्रसाधिनीम् ॥
तत्रादौ द्वाविंशत्यक्षरीं विवृणोमि । तदुक्तं कुलार्णवे—
क्रोधीशं बिन्दुयुक्तान्ते त्रिमूर्त्यग्निसमन्वितम् ।
त्रिर्लिखेत्परतो देवीहुङ्कारद्वयमेव च ॥

* * * *

Colophon:

इति श्रीपूर्णानन्दपरमहंसविरचिते श्यामारहस्ये न्यासानुविवरणं नाम प्रथमः परिच्छेदः ॥

End:

कपिलांश्च गजान् दत्वा यत्फलं लभते नरः ।
तत्फलात् कोटिगुणितं कालिकानां(याः) प्रपूजने ॥
कालिकां निन्दयेद्यस्तु कुलशास्त्रपरायणः ।
स याति नरके घोरे सत्यमेव न संशयः ॥

Colophon:

इति श्रीमहामहोपाध्यायपरिव्राजकपरमहंसश्रीपूर्णानन्दनाथविरचिते श्यामारहस्ये अष्टादशः परिच्छेदः ॥

R. No. **4496.**

Paper. 10⅝ × 9½ inches. **Foll.** 114. **Lines,** 20 in a page. **Grantha. Good.**

Transcribed in 1924–25 from a MS. of the Raja of Punnattur, Kottapudi post, Malabar district.

विष्णुसंहिताव्याख्या—तत्त्वप्रदीपिका.

VIṢṆUSAṀHITĀVYĀKHYĀ: TATTVAPRADĪPIKĀ.

A commentary on the Viṣṇusaṁhitā, which work has been described under No. 5365 of the D.C.S. MSS., Vol. XI: by Nāgasvāmin.

Ccmplete.

Beginning:

हृदये जृम्भतां नित्यममह(स्तान्त)स्तिमिरं महः ।
अभिप्रेतार्थसिद्ध्यर्थं देवैरपि यदर्चितम् ॥

* * * *

उद्धृत्य पञ्चरात्रेभ्यस्सारं येनेदमीरितम् ।
भुक्तिमुक्तिप्रदं तन्त्रं तस्मै सुमतये नमः ॥
गुरून् प्रणम्य सर्वज्ञान् तत्प्रसादाद्विरच्यते ।
तन्त्रस्यास्य मया व्याख्या नाम्ना तत्त्वप्रदीपिका ॥

औपमन्यवस्सिद्धं वृष्टा (पृष्टवान्) । उपमन्योर्गोत्रे जात औपमन्यवः । कीदृशं श्रीशैलशिखर आसीनं सिद्धं साधितपुरुषार्थः(म्।) तन्त्रपारगः(गं) तन्त्रं शास्त्रं तस्य पारं गतः । कस्मान्मम ज्ञानमुपलब्धुं शक्यत इति मत्वा पृष्टवान् ।

* * * *

Colophon:

इति विष्णुसंहिताव्याख्यायां तत्त्वप्रदीपिकायां प्रथमपटलः समाप्तः ॥

End:

सर्वस्य लक्षणं करोति– तस्मात्सर्वप्रयत्नेन गृहे संस्थाप्य सततमर्चयेत् । स्थापयेत्तत्र गृह एव । स्थापयेच्च, गोपयेच्च, रक्षेच्च । एवं यत्र क्रियते तत्राचञ्चला श्रीर्वर्धते ॥

साक्षाद्भगवता प्रोक्ता सर्वाज्ञानविनाशिनी ।
या विष्णुसंहिता पुण्या धर्मकामार्थमोक्षदा ॥

गुरोरनुग्रहात्तस्या मया व्याख्या विनिर्मिता ।
स्वामिना नागपूर्वेण नाम्ना तत्त्वप्रदीपिका ॥
सेयं विमत्सरैरशान्तैर्विष्णुभक्तैर्दृढव्रतैः ।
शोधनीया प्रयत्नेन समुद्दीक्ष्य महात्मभिः ॥

Colophon:

इति विष्णुसंहिताव्याख्यायां तत्त्वप्रदीपिकायां त्रिंशः पटलः समाप्तः ॥

R. No. **4497.**

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. Foll. 20. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of the Raja of Punnattur, Kottapudi post, Malabar district.

Foll. 19*b*—20*b* are left blank

कुमारोदयप्रबन्धः.

KUMĀRŌDAYAPRABANDHAḤ.

A short Campūkāvya written after the model of Kālidāsa's **Kumārasambhava**, which deals with the incidents that led to the birth of Kumārasvāmin or god Subrahmaṇya.

Incomplete.

Beginning:

श्रीमत्यां दक्षपुत्र्यां पितरि कमितृनिन्दातिरूक्षे प्रकोपा-
दुद्दीप्ते योगवह्नौ हुतवपुषि रुषा प्रस्फुरन्नुद्भटौजाः ।
भीतैर्जातानुतापैस्सपदि सुरगणैस्सान्त्वितश्शान्तमन्युः
कुर्वन् गुर्वीं तपस्यामकृत हिमगिरौ वासमीशश्चिराय ॥
ततस्सतीनां प्रथमा सती सा समाधिवैश्वानरदग्धगात्री ।
मेनापतेस्तस्य बभूव पुत्री मैनाकसौभ्रात्रवती हिमाद्रेः ॥

* * * *

विस्तीर्णभोगि(ग)वक्षस्स्थलक(ठि)नशिलापट्टसङ्कट्टवेग-
त्रुट्यद्भुजावलोकप्रदलितबलभिद्द्वेषिबाहावलेपः ।
आसीदासत्यलोकप्रसृमरभुजभारोद्य(द्व)तो दैत्यभर्ता
सिद्धस्त्रैणीसतीत्वव्रतमथनकलाकारकस्तारकाख्यः ॥

तेन च दानवाधमेन निरुपमतपोविशेषपरितोषितपयोजासनवितीर्ण-
विविधतरवरोत्सेक

* * * *

सरोजसम्भवाय निजामापदमावेदयितुकामास्तत्यलोकं प्रतास्थिरे ।

End :

रहसि रहितशङ्कं कुङ्कुमाकल्पभाजौ
सह(फ)लयति कुचौ था(या)सैव धन्या वधूनाम् ।
प्रणयकलहशान्त्यै कातरे प्राणनाथे
प्रणतिमुपगतेऽस्मिन् कोपवेग . . . ॥

R. No. **4498.**

Paper. 10⅝ × 9½ **inches. Foll.** 20. **Lines,** 20 **in a page. Grantha. Good.**

Transcribed in 1924–25 from a MS. of M.R.Ry. V. N. Nārāyaṇa Nambūdiri, Vaidyamaṭham, Tritala, Malabar district.

न्यायनयाम्बुधिसोपानोपधानम्.

NYĀYANAYĀMBUDHISŌPĀNŌPADHĀNAM.

A short treatise on Nyāyas for beginners : by Rāmabhaṭṭa, pupil of Subrahmaṇya.

Complete.

Beginning :

सञ्चिन्त्य सञ्चिन्त्य पदाम्बुजं हरेस्संस्मृत्य संस्मृत्य गिरो गुरूदिताः ।
सोपानतो न्यायनयाम्बुधौ शिशोस्सुखावगाहाय मयोपधीयते ॥

इह खलु धर्मार्थकाममोक्षाणां चतुर्णां पुरुषा(र्था)नां मध्ये मोक्षस्यैव नित्यत्वात् परमपुरुषार्थत्वम् । अतस्तदुपायभूतं पदार्थतत्त्वज्ञानमिति पदार्थ-तत्त्वं विचार्यते—अभिधेयः पदार्थः । स च षोडशविधः । प्रमाणप्रमेय-संशयप्रयोजनदृष्टान्त.

* * * *

हेत्वाभासच्छलजातिनिग्रहस्थानभेदात् । तत्र प्रमाकरणं प्रमाणम् ।

End :

उत्तरापरिस्फूर्तिरप्रतिभा । परामि(हित)स्यार्थस्य स्वतः प्रतिकूलस्य स्वयमेवाभ्यनुज्ञा मतानुज्ञा इत्यादि सर्वं सुगममिति सिद्धम् ॥

उत्पादको बर्हको यः कामस्य च विकल्प्यते ।
सुब्रह्मण्याभिधानस्स गुरुर्विजयतेतराम् ॥

* * * *

इति श्रीरामभट्टेन न्यायशास्त्रमहार्णवे ।
बालानामवगाहाय सोपानोपहितिः कृता ॥
अनया शिशवः स्वैरमवगाह्याकुतोभयाः ।
न्यायरत्नाकरेऽभीष्टरत्नान्याददतां मुदा ॥

Colophon:

इति श्रीरामभट्टविरचितन्यायनयाम्बुधिसोपानोपधानं समाप्तम् ॥

R. No. **4499.**

Paper. 10⅝ × 9½ inches. **Foll.** 14. **Lines,** 20 in a page. **Grantha.** Good.

Transcribed in 1924–25 from a MS. of Charalayam Raja, Kunnankulam post, Cochin State.

बृहज्जातकम्, सव्याख्यानम्.

BṚHAJJĀTAKAM WITH COMMENTARY.

Same work as that described under R. No. 2806 ante, wherein see for the beginning.

This MS. contains the further portion of the work described under R. No. 3455 ante. This commentary is called Naukā.

Wants the beginning of the 24th Adhyāya and the end in the 26th Adhyāya.

End:

द्रेक्काणरूपाणि परमकारुणिकेन वराहमिहिराचार्येण सम्यक् प्रदर्शितानीत्यवगन्तव्यम् ॥

Colophon:

इति पञ्चविंशस्समाप्तः ॥

अथ चिकीर्षितप्रतिज्ञानेर्व्यूढिमात्मौद्धत्यपरिहारपूर्वकमुपदिशति—

आदित्यदासतनयस्तदवाप्तबोधः
कापिष्ठलस्स पितृलब्धवरप्रसादः ।

आवन्तिको मुनिमतान्यवलोक्य सम्यक्
होरां वराहमिहिरो रचयाञ्चकार ॥

वराहमिहिरोऽहं मुनिमतानि सम्यगवलोक्य रुचिरां होरां चक्रे त्यन्वयः । मुनिमतानि गर्गवसिष्ठपराशरादीनां मतानि सम्यगवलोक्य सम्यक्छब्दोऽर्थ[व]तस्तात्पर्यतश्च ।

* * * *

होरां गणितकशाखाख्यस्कन्धत्रयात्मकस्य ज्योतिश्शास्त्रस्य सारभूतं निषेकादिशवपरिणामान्तकालाधिकरणं नानाविधफलप्रदर्शनपरं जातकशास्त्रं च कृतवानस्मि । कीदृश इत्यत्राह - आदित्यदासतनयः आदित्यदासाख्यस्य कार्तान्तिकोत्तमस्य ।

R. No. **4500.**

Paper. 10⅝ × 9½ inches. Foll. 12. Lines, 20 in a page. **Grantha.** Good.

Transcribed in 1924–25 from a MS. of Maṅgāttammaṅgār, Vaḍakkuttirumāḷigai, Alwartirunagari, Tinnevelly district.

Fol 12 is left blank.

(*a*) तत्त्वसङ्ग्रहः.

TATTVASAṄGRAHAḤ.

Foll. 1*a*—7*a*.

Same work as that described under R. No. 3119(*b*) ante, wherein see for the beginning. By Śrīraṅgarājayajvan, son of Abhayaprada.

Complete.

End:

यच्च भोग्यं तदनियतपरिमाणं, तस्मिन् त्रि(त्र)सरेणूनामणुपरिमाणत्वात् । महीमहीधरप्रभृतीनां महत्परिमाणत्वात् कालस्य च परममहत्त्वाच्च । एवं विश्वं जगत् कोटि(त्रितया)न्तर्गतमिति सिद्धम् ॥

Colophon:

अभयप्रद[न]सूनुना सकलविद्यापारङ्गतेन श्रीरङ्गराजयज्वनाम्ना विरचितोऽयं तत्त्वसङ्ग्रहः ॥

(*b*) तत्त्वसङ्ग्रहसारार्थः.

TATTVASAṄGRAHASĀRĀRTHAḤ.

Foll. 7*b*—11*b*.

A short treatise giving the purport of the Tattvasaṅgraha described under subdivision (*a*) of this number.

Complete.

Beginning:

श्रियः पतिं जगद्योनिं शरणं भक्तवत्सलम् ।
निरस्तहेयं निस्सीमकल्याणं नित्यमाश्रये ॥
प्रबोधादचिदुत्तीर्णां प्रभावात्पुरुषात्मिकाम् ।
पत्नीं भगवतो देवीं प्रपद्ये पद्मवासिनीम् ॥
अपुंस्पर्शाकुला वाणी पुरुषोत्तमसंश्रयात् ।
अव्याकुलीकृता येन तं नमामि यतीश्वरम् ॥
अभयप्रदनामानमस्मद्गुरुमहं भजे ।
यत्कटाक्षादयं जन्तुरपुनर्जन्मतां गतः ॥
अभिरामवर(धी)शमभयप्रदसम्भवम् ।
आश्रयाम्यखिला सम्पद्येनासुद्विषयाकृता(?) ॥
तत्त्वसङ्ग्रहसारार्थः सङ्क्षेपेण प्रदर्श्यते ।
स्पष्टार्थैस्सुग्रहार्थाय पद्यैः कतिपयैर्मया ॥
भोक्तृभोग्यनियन्त्राख्यकोटित्रितयगोचरम् ।
नातिरिक्तमिदं विश्वमित्युक्तं नयकोविदैः ॥
न किञ्चिदपि लोकेऽस्मिन्नास्त्यभोग्यमभोक्तृ च ।
अनियन्तृ च यद्वस्तु प्रतीतिपदवीं गतम् ॥

End:

प्रकृत्यादिविशेषान्तमहत्त्वपरिमाणता ।
तस्माद्विश्वं जगत्कोटित्रितयान्तर्गतं त्विति ॥
तत्त्वसङ्ग्रहतात्पर्यं तत्त्वतः प्रतिपादितम् ।
सम्यक् श्रीकृष्णपुत्रोक्ततत्त्वसङ्ग्रहसङ्गतम् ॥
तात्पर्यं दर्शयामास सौम्यजामातृसंयमी ॥
प्रकृष्टबोधात् प्रकृतेः परत्वं प्रभावभेदात् पुरुषाधिका(रः ?) ।
पत्नी भवन्ती भगवद्विभिन्ना कथं सरोजे कथयाम्यहं त्वाम् ॥

R. No. 4501.

Paper. 10⅞ × 9½ inches. Foll. 46. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. of the Raja of Punnattur, Malabar district.

Foll. 45*b*—46*b* are left blank.

सनन्दसंहिता.

SANANDASAṂHITĀ.

A Saṁhitā of the Pāñcarātrāgama dealing with a variety of subjects connected with the Vaiṣṇava form of worship. The subjects dealt with herein can be made out from the headings of the Paṭalas given below :—

१. उपोद्घातः.	१०. वास्तुविधिः.
२. मन्त्रोद्धारः.	११. प्रासादलक्षणम्.
३. अर्चनाविधिः.	१२. अर्चालक्षणम्.
४. अग्निकार्यम्.	१३. प्रतिमालक्षणम्.
५. दीक्षाविधिः.	१४. द्रव्यशुद्धिः.
६. अभिषेकविधिः.	१५. बिम्बशुद्धिः.
७. मण्टपलक्षणम्.	१६. अधिवासविधिः.
८. सिद्धिसाधनम्.	१७. रत्नन्यासविधिः.
९. गुरुपूजा.	

Wants the beginning of the I Paṭala and breaks off in the XVII Paṭala.

Beginning :

. . . . . कारणं समचिन्तयत् ।
तदा प्रादुरभूत्तेजो दुरीक्षं दिव्यमारुतम् ॥
गम्भीरा चाभवद्वाणी सर्वेन्द्रियसुखावहा ।
अलं ब्रह्मन् विषादेन मां तावद्यष्टुमर्हसि ॥

* * *

निधानं बिलसिद्धं च वश्याकर्षरसायनम् ।
वेतालगुलिकाखण्डमैश्वर्यं चातुलं लभेत् ॥
ऋणादवाप्यते मोक्षं सर्वज्ञश्चापि जायते ।
यं यं प्रार्थयते कामं तं तमाप्नोत्ययत्नतः ॥

Colophon:

इति सनन्दप्रश्ने उपोद्घातपटलः प्रथमः ॥

End:

इति ते सर्वमाख्यातमच्युतस्याधिवासनम् ।
एकाहं(वा) त्र्यहं वापि कुर्यादेवं विचक्षणः ॥

Colophon:

इति सनन्दप्रश्ने अधिवासपटलः षोडशः ॥

ब्रह्मा—

अथातस्सम्प्रवक्ष्यामि रत्नन्यासविधिक्रमम् ।
स्नात्वाचम्य गुरुः प्रातर्मुतिवै(वृत्विग्भि)स्सह तत्परैः ॥
चन्दनस्य रसेनाक्तं गृहीत्वा सूत्रमञ्जसा ।
गर्भागारान्तरे तेन . . . विधिमाचरेत् ॥
* * * *
निष्फला च क्रिया तस्य भवतीह न संशयः ।
स्वस्थानवर्जितास्सर्वा दुःखशोकभयप्रदाः ॥
तस्मात्सर्वप्रयत्नेन.

R. No. **4502.**

Paper. 10⅝ × 9½ inches. Foll. 40. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of M.R.Ry. Kūtalūr Nārāyaṇa Nambūdirippāḍ, Nareri, Tritala, Malabar district.

Fol. 40*b* is left blank.

कौषीतक्युपनिषद्व्याख्या.

KAUṢĪTAKYUPANIṢADVYĀKHYĀ.

A commentary on the Kauṣītakōpaniṣad which work has been described under No. 415 of the D.C.S. MSS., Vol. I, Part III: by Viṣṇuvēdayati.

Complete with the text.

Beginning:

चित्रो ह वै गाङ्गच्यायनिर्यक्ष्यमाण आरुणिं वव्र इति । कौषीतकोपनिषद्व्याख्यायते विष्णुवेदाख्ययतिना । कृतायां व्याख्यायां स्फुरितोऽर्थः किञ्चित्किञ्चिन्मयोच्यते—चित्रो गाङ्गच्यायनिर्यष्टुं प्रवृत्तः परमात्मवित् चित्रो नाम्ना गाङ्गच्यायनिर्गोत्रतः मुक्तिसाधनेन योगेन यष्टुं प्रवृत्त आरुणिं

पुरोहितं वव्रे । स ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेति । स आरुणिः स्वं पुत्रं श्वेतकेतुनामानं प्रेषितवान् त्वमनेन सह गत्वा एनं याजयेति ।

* * * *

य एवं पर्यङ्कविद्यां वेद स ब्रह्मज्ञानं जयति आनन्दभोगं वाप्यश्नुते ॥

Colophon:

इति प्रथमोऽध्यायस्समाप्तः ॥

End:

ततो एवैवं विद्वान् सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद य एवं वेद ॥

ततो विद्वत्प्रशंसा—एवमेतद्ब्रह्मज्ञानं विद्वान् श्रैष्ठ्यं स्वाराज्यमाधिपत्यं च पर्येति य एवं वेदेति ॥

Colophon:

इति कौषीतकोपनिषद्व्याख्यायां चतुर्थोऽध्यायः ॥

समाप्ता चेयं व्याख्या ॥

R. No. **4503.**

Paper. 10⅝ × 9½ inches. Foll. 8. Lines, 20 in a page. Grantha. Good.

Transcribed in 1924–25 from a MS. belonging to Vaḍakkuttirumāḷigai, Alwartirunagari, Tinnevelly district.

Foll. 6*b*—8*b* are left blank.

पराङ्कुशपादुकास्तवः.

PARĀṄKUŚAPĀDUKĀSTAVAḤ.

Stanzas in praise of the holy sandals of Parāṅkuśa who is also known as Nammāḻvār: by Rāmānujācārya, son of Kaustubhācārya of Śrīvatsakula.

Complete.

Beginning:

पराङ्कुशपदद्वन्द्वपादुका लोकपावनी ।
भाति सर्वेषु लोकेषु विघ्नवृन्दविहारिणी ॥
स्वस्त्यस्तु वस्तुनः पाद्योः हंसमुद्राङ्कितात्मनः ।
हस्त्यापत्सखपद्माङ्घ्रिन्यस्तचित्तस्य सद्गुरोः ॥

फुल्लारविन्दनिचयैर्विलसन्ति नद्यः
पूर्वाचलेन्द्रशिखराणि रवेः प्रभाभिः ।
नाथाङ्गसङ्गरतिकेलिरवैश्च कोक्यः
श्रीकारिसूनुचरणावनि सुप्रभातम् ॥

End:

वकुलधवलदाम्नः पादुकादर्शनाद्वै
विविधसकलरोगा . . . किन्यनीकाः ।
शमनभुवनमापुः शङ्किताः कम्पितागा[म]-
भयमिह न हि किंचिच्चित्त नित्यं रमस्व ॥
रामानुजाख्यशठजिन्मणिपादुकायै
हेमाद्रितुल्यतनवे सततं नमोऽस्तु ।
पराङ्कुशपदद्वन्द्वपादुकायाः स्तवोत्तमम् ।
पठन्ति मनुजा ये ते सर्वसिद्धिं भजन्ति ते ॥

Colophon:

इति श्रीवत्सकुलतिलकश्रीकौस्तुभाचार्यकुमाररामानुजार्यविरचितः श्री-पराङ्कुशपादुकास्तवः सम्पूर्णः ॥

R. No. **4504.**

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. Foll. 64. Lines, 29 in a page. Dēvanāgarī. Good.

Transcribed in 1924–25 from a MS. of the Zamindar of Challapalli, Kistna district.

Fol. 64 is left blank.

साङ्ख्यवृत्तिसारः.

SĀṄKHYAVṚTTISĀRAḤ.

Similar to the work described under R. No. 2050(*c*). By Vēdānti Mahādēva, disciple of Svayamprakāśatīrtha. It is stated that the author wrote this work after going through Aniruddhavṛtti.

Complete in six Adhyāyas dealing with the following subjects:—

१. शास्त्रविषयनिरूपणम्.
२. प्रकृतिप्रधानसृष्टिनिरूपणम्.
३. वैराग्यनिरूपणम्.
४. आख्यायिकानिरूपणम्.
५. परमतनिरासनम्.
६. तन्त्राध्यायः.

Beginning:

दृष्ट्वानिरुद्धवृत्तिं बुद्ध्वा साङ्ख्यीय(सु)मतसिद्धान्तम् ।
विरचयति वृत्तिसारं वेदान्त्यादिर्महादेवः ॥

अथ जगदुद्धिधीर्षुर्महामुनिः कपिलः फलसौन्दर्यज्ञानस्य फलेच्छाद्वारा साधनप्रवृत्तौ कारणत्वं पश्यन् फलसौन्दर्यमाह—अथ त्रिविधदुःखात्यन्तनिवृत्तिर्मोक्षः । अथशब्दो मङ्गलार्थः । त्रिविधदुःखस्याध्यात्मिकाधिभौतिकाधिदैविकरूपस्यात्यन्तनिवृत्तिः पुनर्दुःखजातीयविशिष्टात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः ।

* * * *

Colophon:

इति स्वयम्प्रकाशतीर्थाङ्घ्रिलब्धवेदान्तिसत्पदेन महादेवेनोन्नीते साङ्ख्यवृत्तिसारे शास्त्रविषयनिरूपकः प्रथमोऽध्यायः ॥

End:

यावत् स्थूलशरीरे सूक्ष्मशरीरमस्ति, तावत्प्रकृतिपुरुषयोः स्वस्वामिसम्बन्ध इति स्वमतमाह—यद्वा तद्वा तदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषार्थः । यत् तत् इत्यव्यये हेतौ यतस्ततः स्वस्वामिभावोऽस्तु प्रकृतिपुरुषयोः । तस्य तु बन्धहेतुत्वात् तदुच्छित्तिः पुरुषार्थ इति मम मतम् । वीप्साध्यायसमाप्त्यर्थो ॥

Colophon:

इति वेदान्तिमहादेवकृते साङ्ख्यप्रवचनसूत्रवृत्तिसारे तन्त्राध्यायः षष्ठः ॥

R. No. **4505.**

Paper. $10\frac{3}{8} \times 9\frac{1}{2}$ inches. Foll. 8. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1924–25 from a MS. of this Library.

अगस्त्यसूत्रम्.

AGASTYASŪTRAM.

Same work as that described under R. No. 89 ante.
Complete.

R. No. 4506.

Paper. 12¼ × 7⅞ inches. Foll. 44. Lines, 16 in a page. Dēvanāgarī. Good.

Purchased in 1924–25 from M.R.Ry. V. Veṅkaṭarāmaśarma Śāstri, Trivandrum, Travancore State.

भगवदज्जुकम्.

BHAGAVADAJJUKAM.

Same work as that described under No. 12571 of the D.C.S. MSS., Vol. XXI.

Complete.

R. No. 4507.

Paper. 11¼ × 5½ inches. Foll. 88. Lines, 12 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1924–25 from M.R.Ry. G. K. Sami Ayyaṅgār, Annavāśal street, Mannargudi, Tanjore.

गीतगोविन्दम्, वनमालिसञ्जीविनीव्याख्यासहितम्.

GĪTAGŌVINDAM WITH THE COMMENTARY VANAMĀLI-SAÑJĪVINĪ.

A commentary on Jayadēva's Gītagōvinda which work has been described under No. 11937 of the D.C.S. MSS., Vol. XX: by Vanamālibhaṭṭāraka, son of Śivadāsa. It is stated that the commentator wrote this commentary at Benares and completed it on Tuesday, the 11th day of the dark fortnight of the lunar month Vaiśākha (?)

Wants the first leaf in the beginning; otherwise complete.

Beginning:

महामङ्गलमाचरति । श्रीवृषभानुजासहचरी श्रीराधानाम्नी वल्लभामित्याहेत्थं कथमिति ? । हे राधे ! नन्दनन्दनाकाङ्क्षितसाधिके ! यमुनाकूले कलिन्दतनयातटे नक्तं रात्रौ राधामाधवयोः चैत्रवैशाखयोः केलयः क्रीडाप्रकारा यत्र जयन्ति, तद्रहोगृहमेकान्तकुञ्जकेलिमन्दिरम् ।

* * * *

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैः (. . .)
राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः ॥

* * * *

Colophon:

इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमस्सर्गः ॥

उद्भटचुम्बनं कामसर्वस्वोक्तम् । तल्लक्षणम्—

कान्तं भुजाभ्यामालिङ्ग्य प्रेयसी प्रणयान्विता ।

सशब्दं चुम्बति मुखं यत्तदुद्भटमुच्यते ॥ इति ।

मन्यन्ति टीकाकारोक्तिः । (?)

वन्दे युवतियूथस्थं कृष्णं केलिकलानिधिम् ।

कालिन्दीजलसंसिक्तं सर्वाभरणभूषितम् ॥

Colophon:

इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसर्ज्ञाविन्यां श्रीगीतगोविन्दटीकायां व्रजयुवतियूथकेलि-वर्णने सामोददामोदरो नाम प्रथमस्सर्गः ॥

चतुर्थप्रबन्धः ॥

End:

इत्थं केलिततीर्विहृत्य यमुनाकूले समं राधया

तद्रोमावलिमौक्तिकावलियुगे वेणीभ्रमं बिभ्रति ।

तत्राह्लादकुचप्रयोगफलयोर्लिप्साभृतोर्हस्तयो-

र्व्यापाराः पुरुषोत्तमस्य ददतु स्फीतां मुदं सम्पदाम् ॥

श्रीगीतगोविन्दकवित्वमस्तु । स्वटीकायां सर्वसम्मतियोग्यतामाह—साधूनामिति । इह वनमालिसर्ज्ञाविन्यां श्रीगीतगोविन्दटीकायां भक्त्यर्थिनां साधूनां भक्तानां सम्मतिः स्वीकारः स्यादेव । विदुषामपि नानाशृङ्गाररस-ग्रथनश्रमं विचार्यास्यामादरो भवेदेव । ये च भक्तिपाण्डित्यहीना विरलाः परग्रन्थनिन्दापरास्तानर्थये याचे । किं तत्? मत्कृतिं भूयो वारंवारं वीक्ष्येह टीकायामवद्यं वदन्तु टीकाश्रमेषु ज्ञातेषु परनिन्देच्छावासना स्थास्यति चेत् भक्तिमार्गपरिशीलनेन कुतस्सा दुर्वासनेति भावः ।

टीकासप्तकमालोक्य सारं सारं समुद्धृतम् ।

तत्रापि स्खलितं किञ्चित् क्षन्तुमर्हन्ति सूरयः ॥

शिवदासतनूजेन भट्टेन वनमालिना ।

गीतगोविन्दटीकेयं रचिता शुभदास्तु वः ॥

वैशाखे कृष्णपक्षस्यैकादश्यां शुभमङ्गले ।

वाराणस्यां कृता टीका भट्टेन वनमालिना ॥

काश्यां नरोत्तमगृहे मध्ये माधवशार्वयोः ।
रचिता गीतगोविन्दटीका श्रीवनमालिना ॥

Colophon:

इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसश्रीशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीविन्यां श्रीगीतगोविन्दटीकायां सुप्रीतपीताम्बरो नाम द्वादशस्सर्गः ॥

R. No. **4508.**

Paper. 13 × 4⅞ inches. ,Foll. 360. Lines, 14 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1924–25 from M.R.Ry. G. K. Sami Ayyaṅgār, Annavāśal street, Mannargudi, Tanjore district.

साहित्यसारः, सरसामोदव्याख्यासहितः.

SĀHITYASĀRAḤ WITH THE COMMENTARY SARASĀMŌDA.

A work on poetics. This work is printed in the Nirṇayasāgara Press, Bombay. The author Mōḍaka Acyuta, who commented on his own work, was a pupil of Ṣaṣṭi Nārāyaṇa Śāstrin. It is stated that the work was completed on the 10th day of the bright fortnight of the lunar month Śrāvaṇa in the year Khara corresponding to Śaka year 1753 (1831 A.D.).

Complete in 12 Ratnas, the names of which are given below :—

१. धन्वन्तरिरत्नम्.
२. ऐरावतरत्नम्.
३. इन्दिरारत्नम्.
४. दक्षिणावर्तकम्बुरत्नम्.
५. अश्ववररत्नम्.
६. विषरत्नम्.
७. गुणरत्नम्.
८. कौस्तुभरत्नम्.
९. कामधेनुरत्नम्.
१०. रम्भारत्नम्.
११. चन्द्ररत्नम्.
१२. अमृतरत्नम्.

Beginning:

(मू)—

गौरीगौराङ्गरागोरुरञ्जितानन्तविग्रहम् ।
वन्दे कंचिच्चिदानन्दं नान्दितानङ्गवि(नि)ग्रहम् ॥

गुरून् विद्यागुरूंस्तद्वत्सद्गुरून् सम्प्रणौम्यहम् ।
तत्तत्पादारविन्देषु स्वान्तं नीत्वा मिलिन्दताम् ॥
साहित्यसारं शिवयोस्संचिन्त्य सुमनोऽनुगः ।
साहित्यसारं संविच्छ्रीविलासार्थं समुद्धरे ॥
दुनोति नानया पूर्वसुमनोहृदयं गिरा ।
किं त्वच्युतश्चिनोत्येव मधुमक्षिकया यथा ॥
प्राक् प्रबन्धविलोपेन स्वख्यात्यै नायमात्मवत् ।
तन्यते तद्विकासेन स्मरवत्सुदृशां मुदे ॥
अप्रौढानामपि क्षिप्रं साहित्ये प्रौढतासये ।
वक्ष्ये लक्ष्यादि सङ्क्षेपादत्र वेणुक्वणो(णे) यथा ॥
काव्यादि स्वार्थमन्यार्थं चाथ स्वार्थश्चतुर्विध' ।
धर्मादिः कीर्तिसम्पत्तितृप्तिमुक्तिवपुः क्रमात् ॥
वाल्मीक्यादेरभूत्कीर्त्यै धावकादेः श्रियेऽपि च ।
कामाप्त्यै जयदेवादेर्मुद्गलादेस्तु मुक्तये ॥

(व्या)—

साहित्यसारमाप्य स्वं स्वोक्तसाहित्यसारगम् ।
व्यनज्मि सरसामोदं सरसामोदसिद्धये ॥

मङ्गलादीनीत्यादिमहाभाष्यस्मृत्यनुमितश्रुतिप्रमाणकं शिष्टसाम्प्रदायिकं चिकीर्षितग्रन्थानिर्विघ्नतादिफलकं स्वेष्टदेवताप्रणत्यात्मकं मङ्गलं स्वयमनुष्ठायान्तेवास्यनुशासनार्थं ग्रन्थादावपि सङ्ग्रन्थयति—गौरीत्यादिना । गौर्या यः गौरः काश्मीराद्यात्मकोऽङ्गरागः शरीरालेप्यसुगन्धिद्रव्यविशेषः तेनोरु उत्कटं रञ्जितः सरागीकृत अनन्तः निर्गुणत्वेन वस्तुतोऽपरिच्छिन्नोऽपि भक्तानुग्रहार्थं मायैकमयः कर्पूरगौरादिरूपः ।

* * * *

गोक्षीराब्धेः शिवगुरुविबुधसहायोऽच्युतस्समुद्ध्रे ।
हेत्वादिनिर्णयपरं धन्वन्तरिसंज्ञकं प्रथमरत्नम् ॥

Colophon:

इति स्वकृतसाहित्यसारव्याख्यायां सरसामोदसमाख्यायां प्रथमप्रकरणं सम्पूर्णम् ॥

* * * *

(मू)—

धन्वन्तर्यैरावतलक्ष्मीकम्बुश्वविषहरेष्वासैः ।
रत्नैस्सप्तभिरासीत्पूर्णस्साहित्यसारपूर्वार्धः ॥

Colophon:

इति श्रीसाहित्यसारे हरचापाख्यं सप्तमं गुणरत्नं सम्पूर्णम् ॥

(व्या)—अत्रैव पूर्वार्धं परिच्छिनत्ति—धन्वन्तरीति ।

Colophon:

इति सरसामोदे गुणरत्नविवरणं सम्पूर्णम् ॥

इति साहित्यसारपूर्वार्धस्समाप्तोऽयम् ॥

End:

(मू)—

आद्यं शराग्निसङ्ख्याकश्लोकं रत्नं द्वितीयकम् ।
मुनिरामेन्दुपद्यं च तृतीयं वह्निभूमितम् ॥
चतुर्थं चन्द्रभूनेत्रश्लोकं रामर्षिपञ्चमम् ।
षष्ठं वेदाग्निदृक्पद्यं सप्तमं खेन्दुदृङ्मितम् ॥
अष्टमं रसदृग्रामं नवमं खाग्निसंमितम् ।
दशमं शास्त्रदृक्पद्यं मितमेकादशं रसैः ॥
द्वादशं द्वादशश्लोक्या युतमेवं सुमेलनात् ।
साहित्यसारः सानङ्गानङ्गशत्यन्वितोऽभवत् ॥
श्रीनारायणगुर्वङ्घ्रिपद्मयुग्मं नमाम्यहम् ।
यदेकं(क)कृपयाहं सच्छास्त्रसौरभ्यसंस्कृतः ॥
अद्वैतसच्चिदानन्देन्द्रपादाम्बुरुहद्वयम् ।
प्रणमामि न मे येन भाति क्वापि क्वचिद् द्वयम् ॥
गोक्षीराब्धेश्शिवगुरुविबुधसहायोऽच्युतस्समुद्ध्रे ।
मुख्यरसार्णवात्मकममृताख्यं द्वादशं रत्नम् ॥

(व्या)—अथ श्रीमत्सद्गुरुपादपद्मद्वयं प्रणमति—अद्वैतेति । इहेन्द्रपदादग्रे सरस्वतीपदं द्रष्टव्यम् । येनोक्तपादपद्मप्रणामेनेत्यर्थः । क्वापि देशे क्वचिदपि काल इति यावत् । द्वयं द्वैतम् । भाति सत्यत्वेन परिस्फुरतीत्यर्थः । उपनिगमयति—गोक्षीरेति ।

श्रीगुर्वीशप्रसादेन सह तज्ज्ञैश्शिवङ्करः ।
ग्रन्थस्साहित्यसारोऽयं भूयादाचन्द्रतारकम् ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणक्षीरार्णवविहरणश्रीमदद्वैतविद्येन्दिरारमण-षष्ट्युपनामकश्रीमन्नारायणशास्त्रिगुरुवरचरणारविन्दराजहंसायमानमानसेन मोडकोपनाम्नाच्युतशर्मणा विद्यार्थिना विरचितः स्वकृतसाहित्यसारस्वारस्यवलितसरसामोदाख्यव्याख्यानस्य द्वादशः प्रकाशः सम्पूर्णः ॥

शाकेऽग्निबाणमुनिभूमित(१७९३)वर्षे खरसमाह्वयेऽपि बत ।
श्रावणासितदशमज्ये पूर्णोऽभूत्पश्चवटिकायाम् ॥
साहित्यसारसरसामोदोऽयं मीनलग्न एव निशि ।
हरिहरगुरुवरकृपया चिराय सर्वेष्टदो भवतु ॥

शाके १७८२ रौद्रनामसंवत्सरे आश्विनशुद्धद्वितीयाभौमवासरे समाप्तः॥
इति साहित्यसार उत्तरार्धस्समाप्तः ॥

R. No. **4509.**

Paper. 12½ × 6¾ inches. Foll. 2⁹. Lines, 14 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1924–25 from M.R.Ry. G. K. Sāmi Ayyaṅgār, Annavāśal street, Mannargudi, Tanjore district.

छन्दःकौस्तुभम्, सभाष्यम्.

CHANDAḤKAUSTUBHAM WITH BHĀṢYA.

A work on Sanskrit prosody: by Rādhādāmōdara, pupil of Nayanānanda. It is followed by a commentary by Vidyābhūṣaṇa who was a pupil of Rādhādāmōdara, author of the original.

Complete in nine Prabhās.

Beginning:

(मू)—

छन्दोभिर्विततार्ङ्गैः कवयो यस्यानुकीर्तयन्ति गुणान् ।
स जयति गोकुलयनिताजितान्तरः श्यामसुन्दरो भगवान् ॥
नित्यं निवसतु हृदये चैतन्यात्मा मुरारिर्नः ।
निरवद्यो निर्वृतिमान् गजपतिरनुकम्पया यस्य ॥

लीलां विष्णोर्गातुकामोऽतिचित्रां छन्दांस्याख्यद्योऽभिरूपाह्वयानि ।
श्रीमान् विद्यावारिधिर्विश्ववन्द्यः पायात्सोऽस्मान् पिङ्गलो नागराजः॥

छन्दोलक्षणहीनं सभासु काव्यं पठन्ति ये मनुजाः ।
कुर्वन्तोऽपि स्वेन स्वशिरश्छेदं न ते विद्युः ॥
वर्णमात्राविभेदेन छन्दो द्विविधमीरितम् ।
लक्ष्यलक्षणरूपं तत् प्रायस्सङ्गृह्यते मया ॥
मयरसतभजनसंज्ञाश्छन्दस्यष्टौ गणास्त्रिवर्णाः स्युः ।
भूम्यम्बुवह्निवायुव्योमार्कसुधांशुनाकदेवास्ते ॥

(व्या)—

अर्चितनयनानन्दो राधादामोदरो गुरुर्जीयात् ।
विवृणोमि यस्य कृपया छन्दःकौस्तुभमहं मितवाक् ॥

अथ श्रीनयनानन्दपदारविन्दसेवासान्द्रितनिखिलशास्त्रार्थश्छन्दोविवृद्धवद्यः(द्धवर्यः) श्रीराधादामोदराभिधः कान्यकुब्जविप्रवंशावतंसो महत्तमः कविश्छन्दःकौस्तुभं नाम छन्दश्शास्त्रं प्रणयन् सर्वच्छन्दःप्रगेयचरितं श्रीकृष्णं प्रणमति—छन्दोभिरिति । स श्यामसुन्दरो जयति स्वोत्कर्षमाविर्भावयितुं जयहेतुः । भगवानिति । ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चापि षण्णां भग इतीरिते(ङ्गने)त्युक्तषड्भगविशिष्टः ।

* * * *

(मू)—

मात्रावृत्तानि पथ्यादिनामान्याहुर्विपश्चितः ॥

Colophon :

इति श्रीछन्दःकौस्तुभे संज्ञानिबन्धः प्रथमप्रभा ॥

(व्या)—एवं वर्णवृत्तसंज्ञां प्रोच्य मात्रावृत्तसंज्ञां दर्शयति—मात्रावृत्तानीति ।

इति श्रीविद्याभूषणविर(चि)ते छन्दःकौस्तुभभाष्ये प्रथमप्रभा ॥

End:

(मू)—

सङ्कीर्णच्छन्दांसि प्रकुर्वतो बहुविधानि चरितानि ।
विष्णोर्नवप्रभोऽयं स्याच्छन्दःकौस्तुभः प्रीत्यै ॥

द्विजकुलतिलकः श्रीमान् राधादामोदरो हरेः प्रेष्ठः ।
स्वर्णैस्सूत्रैर्ग्रथितं छन्दःकौस्तुभमिमं व्यतनोत् ॥

(व्या)—

एतानि प्राकृतपिङ्गलानुसारीणि दुर्गेश्वरभट्टेन विरचितानि बोध्यानि ।

अथ स्वनामनिर्देशपूर्वकग्रन्थमुपसंहरति—द्विजेति । श्रीमान् राधादामोदरः छन्दःकौस्तुभमिमं व्यतनोदकरोदित्यर्थः । कीदृशमित्याह—स्वर्णैरिति । स्वर्णानि चाक्षराणि यानि सूत्राणि लक्षणानि तैर्ग्रथितं निर्मितं मणिपक्ष(क्षे)कनकजे(ही)रकगुम्फितम् ।

(मू) –

वेदर्तुपक्षसङ्ख्याताश्छन्दसां व्यक्तयोऽत्र याः ।
लिखितास्सन्ति तास्सन्तः कलयेत्तु(यन्तु) कृपाकुलाः ॥

Colophon:

इति छन्दःकौस्तुभे मात्राप्रस्तारो नाम नवमी प्रभा ॥

(व्या)—अथैतद्ग्रन्थोक्तानि छन्दांसि परिगणयति—वेदेति । अङ्कानां वामगत्या स्थापनात् चतुष्षष्ट्युत्तरं शतद्वयमिह छन्दांसि भवन्ति वर्णच्छन्दांसि गुणपक्षपक्षसङ्ख्यानि (२२३), मात्राच्छन्दांसि चन्द्राब्धिसङ्ख्यानि (४१), उभयानि तु वेदर्तुपक्षसङ्ख्यानीति । (२६४) ।

श्रीराधादामोदरशिष्यो विद्या(सु)भूषणो नाम्ना ।
छन्दःकौस्तुभशास्त्रे भाष्यमिमं सम्प्रति व्यदधात् ॥

Colophon :

इति श्रीराधादामोदरशिष्यविद्याभूषणविरचिता छन्दःकौस्तुभभाष्ये मात्राप्रस्तारवर्णना नाम नवमी प्रभा ॥

मूलश्लोकसङ्ख्या २५०, टीकाश्लोकसङ्ख्या ७५०, मिलित्वा १,०००.

R. No. **4510.**

Paper. 13½ × 4½ inches. Foll. 72. Lines, 12 in a page. Dēvanāgarī and Grantha. Slightly injured.

Purchased in 1924-25 from M.R.Ry. G. K. Sāmi Ayyaṅgār, Annavāsal street, Mannargudi, Tanjore district.

(*a*) व्युत्पत्तिवादव्याख्यानम्.
VYUTPATTIVĀDAVYĀKHYĀNAM.

Foll. 1*a*—27*b*.

A commentary on Gadādharabhaṭṭa's Vyutpattivāda, which work has been described under No. 4290 of the D.C.S. MSS., Vol. VIII: by Aśvattha, son and pupil of Anna and Lakṣmī.

Incomplete.

Beginning:

यस्य लीलावशादेव जगज्जन्मादयो मताः ।
तन्नौमि परमं धाम रामाख्यं कामितप्रदम् ॥
विद्यानिधिशिष्यगणो यदनुग्रहलेशतः ।
तं नौमि पितरं चैवमीप्सितार्थाय देशिकम् ॥
अण्णाख्यविदुषः पुत्रो लक्ष्मीदेव्यास्तु गर्भजः ।
व्युत्पत्तिवादव्याख्यानं कुर्वेऽश्वत्थो यथामति ॥

पदानुपस्थितस्य प्रत्यक्षादिनोपस्थितस्य समवायेन पदन वोपस्थितस्य शाब्दबोध(धे भान)वारणाय विषयतासम्बन्धेन शाब्दबोधं प्रति विषयतासम्बन्धेन पदनिरूपितवृत्तिज्ञानजन्योपस्थितेः कारणत्वमवश्यं वाच्यम् । तच्च न सम्भवति; पदादनुपस्थितस्यापि अभेदादिसंसर्गस्य भानात् । न च प्रकारतासम्बन्धस्य कार्यतावच्छेदकत्वान्न दोष इति वाच्यम्; विशेष्यतया अपदार्थस्यापि भानापत्तेः । अत एव न वैपरीत्यमपि; प्रकारतया अपदार्थस्यापि भानप्रसङ्गात् । यद्यपि विशेष्यत्वप्रकारत्वान्यतरसम्बन्धस्य कार्यतावच्छेदकत्वेन न तद्दोषप्रसक्तिः, तथापि अन्यतरत्वस्य बहुतरपदार्थघटितत्वेन गौरवमित्याशयेनाह—शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गस्संसर्गमर्यादया भासत इति । अत्र सप्तम्या निरूपितत्वमर्थः तस्य भासधात्वर्थे विषयत्वे आश्रयतासम्बन्धेन अन्वयः । आख्यातस्याश्रयत्वमर्थः । तस्य च प्रथमान्तपदार्थे संसर्गेऽन्वयः । संसर्गमर्यादयेत्यस्य सांसर्गिकविषयतयेत्यर्थः ।

End:

तस्मादभेदसंसर्गकबोधं . . . . पदजन्याभेदोपस्थितिदशायामभेदप्रकारकबोधोदयेन शक्तिभ्रमादिस्थले अभेदप्रकारकबोधा.

(*b*) तत्त्वचिन्तामणिदीधितिप्रकाशिका.
TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 28*a*—71*b* Fol. 72 is left blank.

Same work as that described under No. 4042 of the D.C.S. MSS., Vol. VIII. By Gadādharabhaṭṭa.

Contains the Bādhagrantha only.

Wants the beginning ; otherwise complete.

R. No. **4511.**

Palm-leaf. 16½ × 1¼ inches. Foll. 29. Lines, 6 in a page. Grantha. Good.

Purchased in 1924–25 from M.R.Ry. G. K. Sāmi Ayyaṅgār, Annavāśal street, Mannargudi, Tanjore district.

अनङ्गजीवनम्.
ANAṄGAJĪVANAM.

Same work as that described under No. 12429 of the D.C S. MSS., Vol. XXI. By Varadakavi, son of Śrīnivāsācārya of Ātrēyagōtra.

Complete.

R. No. **4512.**

Palm-leaf. 16⅜ × 1⅛ inches. Foll. 60. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1924–25 from M.R.Ry. G. K. Sāmi Ayyaṅgār, Annavāśal street, Mannargudi, Tanjore district.

श्रुतप्रकाशिकासङ्ग्रहः.
ŚRUTAPRAKĀŚIKĀSAṄGRAHAḤ.

A summary of Sudarśanasūri's Śrutaprakāśikā, which work has been described under No. 4963 of the D.C.S. MSS., Vol. X—see under R. No. 1600 ante.

Wants the beginning and breaks off in the third Pāda of the first Adhyāya and in disorder.

R. No. **4513.**

Palm-leaf. 17⅛ × 1⅜ inches. Foll. 30. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1924–25 from M.R.Ry. G. K. Sāmi Ayyaṅgār, Annavāśal street, Mannargudi, Tanjore district.

(*a*) मद्रकन्यापरिणयचम्पूः.

MADRAKANYĀPARIṆAYACAMPŪḤ.

Foll. 1*a*—15*b*.

Same text as that described under No. 12334 of the D.C.S. MSS., Vol. XXI. By Gaṅgādhara, son of Dattātrēya of Udaya family.

Contains the first Ullāsa complete and a small portion in the second Ullāsa.

(*b*) मद्रकन्यापरिणयचम्पूव्याख्यानम्.

MADRAKANYĀPARIṆAYACAMPŪVYĀKHYĀNAM.

Foll. 17*a*—26*b*. Fol. 16 gives a portion of this work.

A commentary on Gaṅgādhara's Madrakanyāpariṇayacampu described under subdivision (*a*) of this number.

Contains the first Ullāsa complete; but wants the beginning.

Beginning:

संव्यानमुत्तरीयं च । शालीनमधृष्टम् । सम्मदस्सन्तोषः । स्फुटं प्रव्यक्तमुल्बणम् । पाणिन्धयश्शिशुः । दासेरा भक्तकाः । पक्ष्मलयन्तु निबिडयन्तु । संवर्गणः सम्बन्धः । पाटच्चराः चोराः । निश्रेणिस्त्वधिरोहिणी । आरट्टघोटी आरट्टदेशोत्पन्ना घोटी । लुण्टनमपहरणम् । आढौकते प्राप्नोति ।

End:

रसः शृङ्गारादिः जलं च निर्वर्तितमुत्पादितम् । सरस्वती वाणी नदी च अमृतमयं जलमयम् । मुक्तामयः विमुक्तरोग इति । गदाकरं रोगकरं जठरं करकस्य हस्तकलशस्य अन्यत्र करस्य कोदरस्य ईषन्मध्यस्य अवकाशे अगस्त्यकरचुलकितम् । आभूरसातलं भूमिमारभ्य रसातलपर्यन्तम् ॥

इति प्रथमोल्लासः ॥

Foll. 27—30 contain a portion of Kriyāmālā.

R. No. **4514.**

Palm-leaf. 17 × 1½ inches. Foll. 51. Lines, 12 in a page. Grantha. Fair.

Purchased in 1924–25 from M.R.Ry. G. K. Sāmi Ayyaṅgār, No. 30, Annavasal street, Mannārgudi, Tanjore district.

अभिज्ञानशाकुन्तलव्याख्यानम्—कुमारगिरिराजीयम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM: KUMĀRAGIRI-RĀJĪYAM.

Same work as that described under R. No. 295(*b*) ante. By Kāṭaya-vēmabhūpāla.

Complete.

R. No. **4515.**

Palm-leaf. 17¾ × 1⅝ inches. Foll. 100. Lines, 13 in a page. Grantha. Slightly injured.

Purchased in 1924-25 from M.R.Ry. G. K. Sāmi Ayyaṅgār, No. 30, Annavāsal street, Mannārgudi, Tanjore district.

मालतीमाधवव्याख्या.

MĀLATĪMĀDHAVAVYĀKHYĀ.

Same work as that described under No. 29 of M. Seshagiri Sastri's Report No. II. By Tripurāri.

Breaks off in the tenth Act.

The scribe adds—

नीलकण्ठेन लिखितमिदम् ॥

R. No. **4516.**

Palm-leaf. 16½ × 1⅝ inches. Foll. 103. Lines, 7 in a page. Telugu. Much injured.

Presented in 1924-25 by the Raja of Venkatagiri, Nellore district.

सङ्गीतसूर्योदयः.

SAṄGĪTASŪRYŌDAYAḤ.

A treatise describing the origin and varieties of Tāla, and all the details connected with singing (including musical notes, tunes, modes, etc.) and dancing: by Lakṣmīnārāyaṇa, son of Bhaṇḍāri Viṭṭhalēśvara. The author was in the court of Śrīkṛṣṇadēvarāya of Vizayanagar. For particulars regarding the genealogy of the author and king Kṛṣṇadēvarāya, see the extracts given below.

Complete in five Adhyāyas dealing with the following subjects:—

१. तालाध्याय.
२. नृत्ताध्याय.
३. स्वरगीताध्याय.
४. रागजात्याद्यध्याय.
५. प्रबन्धाध्याय.

Beginning :

वन्दे देवं तुरगवदनं चन्द्रबिम्बान्तरस्थं
राकाचन्द्रस्फुरदुरुकलासाम्यसङ्क्रान्तकान्त्यै ।
कीर्त्यै सङ्गीतविद्याविलसितपदवीन्यासमावक्तुकामो
लक्ष्मीनारायणोऽहं सुघटजनमनःपद्मसम्फुल्लकान्तिम् ॥
विद्वद्यापनमुन्नतोन्नतकलं यत्याश्रयं मुक्तिदं
सन्मार्गैकनिबद्धवृत्तिमतुलं कान्तं प्रियाङ्गान्वितम् ।
नानारूपविभिन्नजातिविविधप्रस्तारचित्रद्रवं
विष्णुं ज्ञानघनं भजामि करणैर्जात्यङ्गनावल्लभम् ॥
कर्णाटाह्वयदेशसौख्यजननी श्रीतुङ्गभद्रावृता
मातङ्गोन्नतमाल्यवत्क्षितिधरश्रीहेमकूटान्विता ।
पम्पाधीश्वरविट्ठलेश्वरकृपादृष्टिप्रभामण्डिता
श्रीविद्यानगरी विभाति धरणीधम्मिल्लमाणिक्यवत् ॥
तस्यां काञ्चनमण्टपे परिलसन्माणिक्यहीरावली-
प्रान्तप्रोतविशुद्धमौक्तिकमणिश्रेणीरवैरञ्जितम् ।
आरुह्य द्विरदादि(रि)पीठमतुलां(लं) क्ष्मामीश्वरस्यात्मजो
निस्तन्द्रः प्रशशास तुर्वसुकुलोत्तंसो नृसिंहो नृपः ॥
कीर्त्तिस्फूर्तिभिरह्नयपि प्रतिकलं ज्योत्स्नां परं जृम्भयन्
(सद्वर्त्मन्यभि)कामितेन सकलान् संप्रीणयन् प्राणिनः ।
नित्याभिश्च कलाभिरुत्सुकतरं धिन्वन् बुधानां व्रजान्
तस्माद्दुग्धपयोनिधेरिव विधुः श्रीकृष्णरायोऽजनि ॥

बाल्येऽसौ सकलकलाकलापयुक्तं
सप्रा(त्रा)णं सपदि विजित्य गङ्गराजम् ।
भङ्क्त्वा तच्छिवनसमुद्रमुत्कटं द्रा-
गावासं व्यतनुत निर्भरं शिवानाम् ॥

दुर्गं जित्वाथ सोऽसावुदयगिरिवरं तत्तदा(त्र रा)हुत्तराजं
बन्दीकृत्याशु हत्वा युधि नगरवरे कोण्डवीट्कोण्डपत्यौ(ल्ल्यौ) ।
जीवग्राहं गृहीत्वा गजपतितनयं पोट्टदुर्नृपट्टणाग्रे
विश्वश्लाघ्यप्रतापो बिरुदयुतजयस्तम्भमुच्चैर्निं(र्न्यं)खानीत् ॥

सोऽयं कृष्णनरेश्वरो गजपतिं जित्वा तदीयश्रिया
साकं तस्य सुतामुदूह्य यवनक्ष्मापं सपादं ततः ।
गोब्बूरुस्थलवासिनं सरभसं जित्वानु विद्राव्य तं
हस्त्यश्वान् स तदीयदुर्गमतुलं राचूरुमादत्तवान् ॥
कृष्णामुत्तीर्य सोऽयं यवनजनपदं वह्निसात्कृत्य सर्वं
फेरोजाबादसिंबाद्युरुन(स)गरसमाख्यानि दुर्गाणि जित्वा ।
भङ्क्त्वोच्चैः पारशीकं कलुबरिगपुरीं द्राक् ससादार्दमानः
कान्ता व्याकृष्टवान् दोर्बलघनमहिमा त्रीन् सुरत्राणपुत्रान् ॥
तस्य श्रीकृष्णरायस्य कृपाक्षीराब्धिचन्द्रमाः ।
लक्ष्मीनारायणो नाम वर्धते सरसाग्रणीः ॥
यो भारद्वाजगोत्रे समजनि श्रुतवित् केशवामात्यवर्यः
तद्देवी गौरमाम्बा तदमलजठरे विट्ठलाख्यो वरेण्यः ।
तद्भार्या रुक्मिणीति प्रचुरतरगुणा तत्सुधापूरगर्भे
लक्ष्मीनारायणोऽयं जयति भुवि(यतः) स्यादपत्यं सुलक्ष्मा ॥
सोऽयं श्रीलक्ष्मणार्यो भरतर(म)तमतङ्गादिमार्गेण सर्वान्
कृत्वावेलान् प्रबन्धान् बुधजनकविसङ्गीतविद्याधिकानाम् ।
मौलीनाकम्पयंस्तानिव दिवि विबुधान् नारदः किन्नरादीन्
भूमौ श्रीकृष्णरायक्षितिपतिकृपया वर्धते सर्ववन्द्यः ।
सदाभिनवशब्दादिभरताचार्यनामकम् ।
बिरुदं धरणीचक्रे धत्ते चक्रमिवाच्युतः ॥

* * * *

श्रीमत्कृष्णनरेश्वरस्य कृपया स्वर्णाञ्चितां पालकीं
मुक्तागुच्छशतानुबद्धवलयं मुक्तातपत्रद्वयम् ।
शश्वन्मत्तमतङ्गजान्मलहरीवाद्यं निजान्तःपुर-
स्थाने नाव्यरसाधिपत्यमसकृल्लक्ष्मीपतिः प्राप्तवान् ॥

* * * *

स्वामिना कृष्णरायेण संसारानन्दचित्तवान् ।
लक्ष्मीनारायणो वक्ति कार्यसाधनकारणम् ॥

सङ्गीतागमलक्ष्यलक्ष्मनिपुणैश्श्रीविष्णुभट्टारकै-
र्ज्ञात्वा दत्तिलकोहलादिभरतग्रन्थान् सुटीकान्वितान् ।
भूमौ कीर्तिशरीररक्षणधिया ग्रन्थः कृतोऽयं मया
(सङ्गीतग्रह) योग्यताधिकतरः सङ्गीतसूर्योदयः ॥
ग्रन्थेऽस्मिन् वक्ष्यमाणानां वस्तूनां यः पृथक् पृथक् ।
उद्देशः कल्प्यते शीघ्रं वस्तुग्रहणसाधकः ॥
तत्रादौ प्रोच्यते तालाध्यायो वस्तु (स्वर)क्रमः ।
तालशब्दस्य निष्पत्तिस्तदङ्गानि ततः परम् ॥

* * *

Colophon:

इति सङ्गीतसूर्योदये तालाध्यायः प्रथमः ॥

अथ नृत्ताध्यायः—

अश्वत्थपदपङ्कजयुग्मं भुक्तिमुक्तिसुखदं सुरसेव्यम् ।
आङ्गिकाद्यभिनयैरिह साङ्गैर्यं नुमस्सुरसबुद्धिविधृत्यै ॥
श्रीमल्लक्ष्मणभूसुरस्य विलसत्कीर्त्यैङ्गनानर्तकी-
नाट्यं नूतनमेव कर्तुमपटीक्षेपं प्रविष्टं ततः ।
आवेगात्परतो दिशो दशपदिं गत्वा स्थिता मण्डले
रोदस्योरचिरेण तानभिनयत्यर्थान् समग्रान् सुधीः ॥
तालालाने नर्तकाख्यं मदेभं भावाख्याभिश्शृङ्खलाभिर्निबन्धुम् ।
तत्त्वादीनां सम्प्रदायांशुकेन तत्तद्वृत्तं लक्षणं यः करोति ॥
नृत्ताध्याये द्वितीयेऽस्मिन् नृत्तस्य जननं ततः ।
तद्भेदास्तत्स्वयं तत्र ताण्डवं च शिरः करः ॥

* * * *

Colophon:

इति श्रीमद्विप्रकुलवर्यभण्डारुविट्ठलेश्वरनन्दनसूक्ष्मभर(लिखि)ताचार्यराय-
ब(भ)यकारतोडरमल्लाभिनवभरताचार्यश्रीलक्ष्मीनारायणविरचिते सङ्गीतसूर्योदये
नृत्ताध्यायो द्वितीयः ।

End:

उद्दिष्टदशभेदानां झाङ्करीलक्ष्म वर्णयेत् ।
तत्र भाषोदितगुणैर्विशेषो दृश्यते पृथक् ॥
इति दशविधा झाङ्करी ॥

Colophon :

इति श्रीविप्रकुलवर्यभण्डारि(रु)विट्ठलेश्वरनन्दनसूक्ष्माभिनवभरताये(लिखि
ताचार्यरायभयकार)तोडरमल्लाभिनवभरताचार्यश्रीलक्ष्मीनारायणविरचिते सङ्गीत-
सूर्योदये प्रबन्धाध्यायः पञ्चमः ॥

R No. **4517.**

Śrītāla. 12¾ × 1⅝ inches. Foll. 210. Lines, 9 in a page. Nandinagarī. Good.

Presented in 1924–25 by the Raja of Venkatagiri, Nellore district

(*a*) तुङ्गभद्राखण्डः (स्कान्द).

TUṄGABHADRĀKHAṆḌAḤ (SKĀNDA).

Foll. 2*a*—101*a*. Foll. 1, 81*b* and 101*b* are left blank.

Same work as that described under No 2298 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyayas 1—52.

(*b*) कालिकाखण्डः(स्कान्द)

KĀLIKĀKHAṆḌAḤ (SKĀNDA).

Foll. 102*a*—168*b*.

Same work as that described under No. 2290 of the D.C.S. MSS., Vol. IV, Part I, wherein see for the end.

Breaks off in the 47th Adhyaya.

Beginning :

सनत्कुमारः —

नमः कृत्वातिशयसे(यशसे)सेनान्ये शक्तिपाणये ।
व्यासं हत(रं) निबोध त्वं स्कन्दजन्मोत्तमोत्तमम् ॥
मन्दरस्य गिरेः शृङ्गे सुवर्णद्रुमभूषिते ।
हेमगर्भमयं श्रीमन्! ब्रह्मन्! देवस्य शूलिनः ॥

* * * *

इति तौ परस्परमनिन्दितौ सुचिरं तत्र कथाभि(भी)रेमतुः ।
भवनं निजं विविशतुः स्वयं मुदितौ सुरेन्द्रभवनोपमम् ॥

Colophon :

इति श्रीस्कान्दपुराणे कालिकाखण्डे देवीप्रसादनं नाम द्वितीयो-ऽध्यायः ॥

(*c*) केदारखण्डः.

KĒDĀRAKHAṆḌAḤ.

Foll. 169*a*—209*a*. Foll. 209*b*—210*b* are left blank.

Breaks off in the XVI Adhyāya.

This forms a portion of the Sanatkumārasaṁhitā of the Skāndapurāṇa and deals with the Dharma prevailing in the Kaliyuga and importance of devotion to God Viṣṇu.

Beginning :

सूत उवाच—

अथ धर्मान् प्रवक्ष्यामि कलिकालस्य सुव्रत ।
यथोक्तं वैनतेयस्य स्वयं वै चक्रपाणिना ॥
क्षीरार्णवे सुखासीनं पर्यङ्के फणिकल्पिते ।
सम्पूज्यमानं श्रीभूम्या(भ्यां) पादसंवहनादिभिः ॥
मूर्तिमद्भिर्गदाशङ्खचक्रासिभिरुपासितम् ।
विष्वक्सेनप्रभृतिभिः परिषद्भिश्च सेवितम् ॥

* * * *

स्त्रीपुंजातिद्वयं शिष्टमुपसारे कलेः खलु ।
कलेस्तु चरम पादे श्रुतिस्मृतियुता द्विजाः ॥
पुण्याः कचन तिष्ठन्ति विलीनास्तत्र तत्र हि ॥

श्रीभगवानुवाच—

तदा खलु मया सर्वं ध्वंसितं कल्किमूर्तिना ।
चराचरा त्मकं विश्वं खगेन्द्र कलुषावृतम् ॥

Colophon :

इति श्रीस्कान्दे महापुराणे सनत्कुमारसंहितायां केदारखण्डे भगवद्गरुडसंवादे पाषण्डशास्त्रप्रपञ्चकथनं नाम प्रथमोऽध्यायः ॥

End :

सूतः—

इति सन्दिश्य तान् विप्रान् लोकानां रक्षणाय च ।
स्रष्टुं समुपचक्राम क्षत्रियान् बाहुवृन्दतः ॥

Colophon :

इति श्रीस्कान्दे महापुराणे सनत्कुमारसंहितायां केदारखण्ड पञ्चदशोऽध्यायः ॥

सूतः—

भूयो मानुषसर्गाय चिन्तयित्वा पितामहः ।
सङ्कल्पादेव बाहुभ्यस्स्रष्टुं तत्र मनो दधे ॥

R. No. **4518.**

Śrītāla. 13¾ × 2 inches. Foll. 113. Lines, 12 in a page. Grantha. Slightly injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

गौतमधर्मसूत्रवृत्तिः—मिताक्षरा.

GAUTAMADHARMASŪTRAVṚTTIḤ : MITĀKṢARĀ.

Same work as that described under R. No. 86 ante. By Haradattācārya.

Breaks off in the XXVIII Adhyāya.

R. No. **4519.**

Palm-leaf. 17 × 1¼ inches. Foll. 55. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

कृष्णयजुर्वेदसंहितापदपाठः.

KṚṢṆAYAJURVĒDASAMHITĀPADAPĀṬAḤ.

Same work as that described under No. 90 of the D.C.S. MSS., Vol. I, Part II.

Contains the Prapāṭhakas one to five complete and the sixth incomplete in the first Kāṇḍa and the first Prapāṭhaka complete and the second incomplete in the second Kāṇḍa.

R. No. **4520.**

Palm-leaf. 17 × 1⅜ inches. Foll. 36. Lines, 8 in a page. Grantha. Injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

(*a*) मेघसन्देशः.

MĒGHASANDĒŚAḤ.

Foll. 1*a*—6*b*.

Same work as that described under No. 11869 of the D.C.S. MSS., Vol. XX. By Kālidāsa.

Contains the Pūrvamēgha portion only.

(*b*) मेघसन्देशव्याख्या.
MĒGHASANDĒŚAVYĀKHYĀ.

Foll. *7a*—*36a*. Fol. *36b* is left blank.

Slightly different from the work described under No. 11878 of the D.C.S. MSS., Vol. XX.

Contains the Pūrvamēgha complete.

Beginning:

शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब कृतार्थसार्थवाहम् ॥

कश्चिदिति । स्वाधिकारात् स्वनियोगात् । प्रमत्तः अनवहितः; प्रमादोऽनवहि(धान)तेत्यमरः । जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानमित्यपादानत्वात्पञ्चमी । अत एवापराधाद्धेतोः कान्ताविरहेण गुरुणा दुर्भरेण दुस्तरेणेत्यर्थः; गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे—इति शब्दार्णवे ।

End:

अलकायाश्च स्वाधीनपतिकाख्यनायिकात्वं च ध्वन्यते । एकायत्तोऽनुकूलः स्यादिति प्रियोपलालिता नित्यं स्वाधीनपतिका मतेति लक्षणात् ।

उदाहरन्ति च—

लालयन्नलकप्रान्तान् रचयन् पत्रमञ्जरीः ।
एनां विनोदयन् कान्तः छायावदनुवर्तते ॥ इति ॥

Colophon:

इति कालिदासस्य कृतौ पूर्वमेघस्समाप्तः(?) ॥

R. No. **4521.**

Palm-leaf. 19 × 1¼ inches. Foll. 58. Lines, 9 in a page. Grantha. Injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

विष्णुसहस्रनामभाष्यम्—भगवद्गुणदर्पणम्.
VIṢṆUSAHASRANĀMABHĀṢYAM: BHAGAVADGUṆA-DARPAṆAM.

Same work as that described under No. 9073 of the D.C.S. MSS., Vol. XVII. By Śrīraṅganātha.

Incomplete.

R No. **4522.**

Palm-leaf. 16⅝ × 1 inches. Foll. 48. Lines, 7 in a page. Grantha. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

हस्तिगिरिमाहात्म्यम्.

HASTIGIRIMĀHĀTMYAM.

Same work as that described under No. 2600 of the D C.S. MSS., Vol. IV, Part I.

Breaks off in the X V Adhyāya.

R. No. **4523.**

Palm-leaf. 13⅞ × 1¼ inches. Foll. 58. Lines, 8 in a page. Telugu. Injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

भागवतव्याख्या—भागवतचन्द्रिका.

BHĀGAVATAVYĀKHYĀ : BHĀGAVATACANDRIKĀ.

Same work as that described under No. 2232 of the D.C.S. MSS., Vol. IV, Part I : by Vīrarāghava.

Wants the beginning and the end of the Pūrvabhāga of the X Skandha.

The work is available in print.

The leaves are not in order.

R. No. **4524.**

Palm-leaf. 18⅝ × 1½ inches. Foll. 280. Lines, 9 in a page. Telugu. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

रामायणम्.

RĀMĀYAṆAM.

Same work as that described under No. 1806 of the D.C.S. MSS., Vol. IV, Part I.

Contains up to the end of the Kiṣkindhākāṇḍa.

R. No. 4525.

Palm-leaf. $14\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 27. Lines, 10 in a page. Grantha Injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

(*a*) शिशुपालवधः.

ŚIŚUPĀLAVADHAḤ.

Foll. 1*a*—4*b*. Fol. 5 is left blank.

Same work as that described under No. 11719 of the D.C.S. MSS., Vol. XX.

Contains the 5th Sarga only.

(*b*) शिशुपालवधव्याख्या—सर्वङ्कषा.

ŚIŚUPĀLAVADHAVYĀKHYĀ : SARVAṄKAṢĀ.

Foll. 6*a*—27*b*.

Same work as that described under No. 11786 of the D.C.S. MSS., Vol. XX. By Mallinātha.

Contains the commentary on stanzas 1—63 in the 5th Sarga.

R. No. 4526.

Palm-leaf. 14 × $1\frac{1}{4}$ inches. Foll. 96. Lines, 7 in a page. Telugu. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

कुवलयानन्दः.

KUVALAYĀNANDAḤ.

Same work as that described under No. 33 of M. Seshagiri Sastri's Report No. II. By Appayadīkṣita.

Complete.

R. No. 4527.

Palm-leaf. $17\frac{3}{4} \times 1$ inches. Foll. 31. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

वीक्षारण्यमाहात्म्यम्.

VĪKṢĀRAṆYAMĀHĀTMYAM.

A treatise describing the holiness and religious sanctity of the Vaiṣṇava shrine, Vīkṣāraṇya, now called Trivellore, near Madras.

Complete as found in the Mārkaṇḍēyapurāṇa.

Beginning :

अहो महत् त्वया प्रोक्तं विष्णोराराधनं मम ।
फलं तु तद्विशेषश्च देशकालविशेषतः ॥

* * * *

वीक्षारण्ये जगत्पुण्ये स्नात्वा हृत्तापनाशने ।
विजयं च विमानं च दृष्ट्वा येऽर्चन्ति मानवाः ॥
अर्घ्यपुष्पादिभिर्नित्यं शयानं मधुसूदनम् ।
ते यान्ति परमं स्थानं यद्वै पश्यन्ति सूरयः ॥
वीक्षारण्ये तु बहवो मुनयस्सन्ति तापसाः ।
तपस्समाधियोगेन यातास्तद्वैष्णवं पदम्.
अस्य क्षेत्रस्य माहात्म्यं कथयामि पुनस्तव .
तच्छ्रुत्वा सहसा चित्तप्रसादस्ते भविष्यति ॥

* * * *

भक्त्यैतदेव कथयेच्छृणुयाद्यथावत्
सम्प्राप्तुमिच्छति सुखं परमस्य पुंसः ।
भक्तानुरक्षणविचक्षणविक्रमं च
हृत्तापनाशनविगाहनवैभवं च ॥

Colophon :

इति श्रीमार्कण्डेयपुराणे क्षेत्रकाण्डे तीर्थमाहात्म्ये द्विशततमोऽध्यायः ॥

End :

धन्यं यशस्यं सकलप्रशस्यं यच्छालिहोत्रस्य चरित्रमेतत् ।
यस्मिन् गृहे तिष्ठति पुस्तकस्थं तदेव वैकुण्ठपुरोपमं स्यात् ॥

Colophon :

इति श्रीमार्कण्डेयपुराणे क्षेत्रकाण्डे तीर्थमाहात्म्ये एकादशशततमोऽध्यायः ॥

R. No. 4528.

Palm-leaf. 18½ × 1½ inches. Foll. 65. Lines, 11 in a page. Grantha. Slightly injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

मुक्तावलीव्याख्यानम्—दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM: DINAKARABHṬṬĪYAM.

Same work as that described under No. 3955 of the D.C.S. MSS., Vol. VIII. By Mahādēva, son of Bālakṛṣṇa.

Wants the beginning in the Pratyakṣapariccḥēda and the end in Guṇapariccḥēda.

R. No. 4529.

Palm-leaf. 16 × 1½ inches. Foll. 58. Lines, 12 in a page. Grantha. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

तर्कसङ्ग्रहदीपिकाव्याख्या—नारसिंहप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ: NĀRASIṀHA-PRAKĀŚIKĀ.

Same work as that described under No. 4170 of the D.C.S. MSS., Vol. VIII. By Narasiṁha of Ālūri family.

Breaks off in the Anumānapariccḥēda.

R. No. 4530.

Palm-leaf. 14 × 1⅝ inches. Foll. 93. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

कृष्णयजुर्वेदसंहिता.

KṚṢṆAYAJURVĒDASAṀHITĀ.

Same work as that described under No. 71 of the D.C.S. MSS., Vol. I, Part II.

Contains the VI Kāṇḍa incomplete and Kāṇḍa VII complete.

R. No. **4531.**

Palm-leaf. $13\frac{7}{8} \times 1\frac{1}{8}$ inches. Foll. 114. Lines, 10 in a page. Grantha. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

चम्पूरामायणम्.

CAMPŪRĀMĀYAṆAM.

Same work as that described under No. 12256 of the D.C.S. MSS., Vol. XXI. By Bhōja and Lakṣmaṇa.

Breaks off in the Yuddhakāṇḍa.

R. No. **4532.**

Śrītāla. $19\frac{7}{8} \times 1\frac{3}{4}$ inches. Foll. 27. Lines, 14 in a page. Telugu. Fair.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

तत्त्वसङ्ग्रहरामायणम्.

TATTVASAṄGRĀHARĀMĀYAṆAM.

Same work as that described under R. No. 719 ante, wherein see for the end. By Rāmabrahmānandasarasvatī, a disciple of Svayamprakāśānandasarasvatī.

Contains the Bālakāṇḍa complete and breaks off in the course of the Ayōdhyākāṇḍa.

Beginning:

योऽग्रे सर्गादेक एवास पश्चादेकं सन्तं बहुधा यं वदन्ति ।
यस्सर्वज्ञस्तर्वगश्चान्त एकं तं रामाख्यं देवमाद्यं भजेऽहम् ॥
यत्पद्मं भुवनैकधाम (विलसद्) विश्वस्य नाभ्युत्थितं
तत्रेधा(त्क्रीडा)कमलं विधाय विहरन्त्य(त्य)न्येव रामे हि या ।
शक्तिं तं जगतां क्रियाभिरनिशं सङ्क्रीडयन्तीं परां
सेवे तां निजलोकभाग्यनिवहां सीताभिधां ता(का)महम् ॥
गुरुं वाणीं गणेशं च नत्वा व्यासं शिवं शिवाम् ।
वाल्मीकिं नारदादींश्च भजे रामकथाविदः ॥
रामायणे पुराणेषु संहितास्वागमादिषु ।
रामतत्त्वचरित्रादौ विशेषास्तन्ति भूरिशः ॥

तत्तद्विशेषतात्पर्यमवगाहितुमक्षमः ।
यत्र ये ये विशेषाः स्युस्तांस्तान् सङ्गृह्य सारतः ॥
प्रसिद्धार्थस्य सङ्क्षेपैरप्रसिद्धार्थविस्तरैः ।
स्वचित्ततुष्टै प्राचीनैर्मणिभिर्मालिकामिव ॥
श्लोकैर्नानापुराणादिनिष्ठैरेव न कल्पितैः ।
कुर्वे रामायणं तत्त्वसङ्ग्रहाख्यं मनोरमम् ॥

एवं वाल्मीकिसङ्क्षोत्थरामबोधा महात्मनाम् ।
सङ्गं स्तुत्या(त्वा) रामभक्त्या मुनयस्सूतमब्रुवन् ॥

Colophon:

इति श्रीतत्त्वसङ्ग्रहरामायणे बालकाण्डे नानामुनिसमागम(सत्सङ्ग)महिमानुवर्णनं नाम प्रथमस्सर्गः ॥

साकेते लोकनाथः प्रथितगुणगणो लोकसङ्गीतकीर्तिः
श्रीरामस्सीतयास्तेऽखिलमुनिनिकरानन्दसन्दोहमूर्तिः ।
नित्यश्रीर्निर्विकारो निरवधिविभवो नित्यमायानिरासो
मायाकार्यानुसारी मनुज इव सदा भाति देवोऽखिलेशः ॥

Colophon:

इति श्रीतत्त्वसङ्ग्रहरामायणे बालकाण्डे पञ्चत्रिंशस्सर्गः ॥

बालकाण्डस्समाप्तः ॥

R. No. 4533.

Palm-leaf. 15 × 1¼ inches. Foll. 39. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasarathi Ayyaṅgār's Charities, Triplicane, Madras.

(*a*) बदरीवनमाहात्म्यम्.

BADARĪVANAMĀHĀTMYAM.

Foll. 1*a*—27*b*. Fol. 28 is left blank.

Similar to the work described under No. 2477 of the D.C.S. MSS., Vol. IV, Part II.

Contains the Adhyāyas 1—10; as fonnd in the Uttarabhāga of the Sanatkumārasaṁhitā of the Skāndapurāṇa.

Beginning:

वन्दे श्रीनारसिंहं गरुडसुरमुनिं क्रोडकेदारगङ्गा-
मार्कण्डेयाग्नितीर्थद्रविणदभगवत्पाददुर्गागणेशान् ।
घण्टाकर्णोद्भवश्रीनरनगबदरीनाथनारायणाख्यं-
ब्रह्म प्रह्लादयोगीश्वरकमलपदश्रीनृसिंहांश्च भक्त्या ॥
धर्मज्ञानविभक्तीनां मार्गान् श्रुत्वा च विस्तरात् ।
सनत्कुमाराद् देवर्षिः पप्रच्छ पुनरेव च ॥
बदर्याश्रममाहात्म्यं सारात्सारतरं महत् ।
महत्या श्रद्धया भक्त्या नत्वा चैव पुनः पुनः ॥

नारद उवाच—

दयासिन्धो महाविद्वन् सर्वलोकहितेच्छया ।
वक्तुमर्हसि मत्प्रीत्यै बदर्याश्रमवैभवम् ॥

* * * *

Colophon:

इति सनत्कुमारसंहितायामूर्ध्वभागे श्रीबदरीमाहात्म्ये प्रथमोऽध्यायः ॥

End:

बहुभिरिव वचोभिः किं मुने श्रीबदर्या-
मभिमतमखिलं स्याद्या सुराणामवश्यम् ।
अपरिचितमुकुन्दध्यानवर्त्माशया ता-
मपि परमनवद्यश्रीपतेर्यात्रयैव (?) ॥

Colophon:

इति श्रीसनत्कुमारसंहितायामूर्ध्वभागे श्रीबदरिकाश्रममाहात्म्ये दशमो-
ऽध्यायः ॥

(*b*) कृष्णयजुर्वेदसंहिता.

KṚṢṆAYAJURVÉDASAMHITÄ.

Foll. 29*a*—39*a*. Fol. 39*b* is left blank.

Same work as that described under No. 77 of the D.C.S. MSS., Vol. I, Part II.

Contains the third Prasna of the third Kāṇḍa incomplete.

R. No. 4534.

Palm-leaf. 14 × 1 inches. Foll. 51. Lines, 7 in a page. Telugu. Injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

आह्निकम्.

ĀHNIKAM.

Slightly different from the work described under No. 2825 of the D.C.S. MSS., Vol. V.

Wants the beginning and end.

R. No. 4535.

Palm-leaf. 16½ × 1⅜ inches. Foll. 284. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

कादम्बरी.

KĀDAMBARĪ.

Same work as that described under No. 12382 of the D.C.S. MSS., Vol. XXI; but the following additional stanzas are given in the beginning.

Contains the Pūrvabhāga complete.

Beginning:

रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमस्स्पृशे ।
अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः ॥
जयन्ति बाणासुरमौलिलालिता दशास्यचूडामणिचक्रचुम्बिनः ।
सुरासुराधीशशिखान्तशायिनो भवच्छिदस्त्र्यम्बकपादपांसवः ॥

* * * *

सरस्वतीपाणिसरोजसम्पुटप्रमृष्टसो(हो)मश्रमशीकराम्भसः ।
यशोऽशुशुक्लीकृतसप्तविष्टपात्तत्सुतो बाण इति व्यजायत ॥
द्विजेन तेनाक्षतकण्ठकौण्ठ्यया महामनोमोहमलीमसान्धया ।
अलब्धवैदग्ध्यविलासमुग्धया (धिया) निबद्धेयममन्दया(मतिद्वयी)कथा ॥
इत्ययमुपोद्घातः ॥

The scribe adds—

श्रीशेषार्यान्वयवार्धीन्दोः श्रीनिवासार्यस्य पुत्रेण श्रीशैलदासेन लिखिता पूर्वकादम्बरी ॥

Foll. 275*a*—284*b* contain a small portion of the Pūrvabhāga of Kādambarī.

R. No. **4536.**

Palm-leaf. 19 × 1⅜ inches. Foll. 300. Lines, 9 in a page. Grantha. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

भागवतम्.

BHĀGAVATAM.

Same work as that described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

The scribe adds—

अब्देऽस्मिन् विजयाह्वये दिनमणौ कुम्भं गते निर्मले
पक्षे भार्गववासरे शुभदिने षष्ठ्याश्वनीसंयुते ।
श्रीमत्कौशिकवंशवारिधिविधुः श्रीश्रीनिवासात्मजः
श्रीमद्भागवतं लिलेख . . . श्रीचम्पकेशाह्वयः ।

R. No. **4537.**

Palm-leaf. 16⅜ × 1¼ inches. Foll. 111. Lines, 8 in a page. Telugu. Injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

ब्रह्मसूत्रभाष्यम्.

BRAHMAṢŪTRABHĀṢYAM.

Same work as that described under No. 4943 of the D.C.S. MSS., Vol. X. By Bhagavadrāmānujācārya.

Contains from the first Pāda of the second Adhyāya to the end of the fourth Pāda of the fourth Adhyāya, but wants the beginning of the first Pāda of the second Adhyāya.

R. No. 4538.

Palm-leaf. 14⅝ × 1¼ inches. Foll. 33. Lines, 9 in a page. Grantha. Much injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

(*a*) अष्टश्लोकी, सव्याख्या.

AṢṬAŚLŌKĪ WITH COMMENTARY.

Foll. 1*a*—18*b*.

Same work as that described under R. No. 1030(*b*) ante. The commentary is by Śrīvatsāṅkanārāyaṇamuni.

Complete.

(*b*) अभीतिस्तवः, सव्याख्यः.

ABHĪTISTAVAḤ WITH COMMENTARY.

Foll. 19*a*—30*b*.

Same work as that described under No. 9836 of the D.C.S. MSS., Vol. XVIII. The commentary is by Garga Vēṅkaṭācārya.

Incomplete.

Foll. 31*a*—33*b* are left blank.

R. No. 4539.

Palm-leaf. 16 × 1 inches. Foll. 11. Lines, 6 in a page. Grantha. Injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

(*a*) गद्यत्रयम्.

GADYATRAYAM.

Foll. 1*a*—8*a*. Fol. 8*b* is left blank.

Same work as that described under R. No. 174(*n*) ante. By Rāmānujācārya.

Incomplete.

(*b*) नृसिंहस्तुतिः.

NṚSIṀHASTUTIḤ.

Foll. 9*a*—11*a*. Fol. 11*b* is left blank.

Same work as that described under R. No. 324(*l*) ante. The following additional stanza is found both in the beginning and end.

Complete.

श्रीमान् वेङ्कटनाथार्यः (. . .) सदा हृदि ॥
कवितार्किकसिंहाय (. . .) वेदान्तगुरवे नमः ॥

R. No. 4540.

Palm-leaf. 16⅛ × 1⅝ inches. Foll. 15. Lines, 7 in a page. Grantha. Injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

रामायणसारसङ्ग्रहः.

RĀMĀYAṆASĀRASAṄGRAHAḤ.

Same work as that described under No. 1904 of the D.C.S. MSS., Vol. IV, Part I.

Incomplete.

Foll. 10*a*—12*a* contain the Rāmāyaṇaśravaṇapaṭhanaphalanirūpaṇa. Fol. 12*b* is left blank. Foll. 13*a*—15*a* contain the Sāmalakṣaṇa. Fol. 15*b* is left blank.

R. No. 4541.

Palm-leaf. 15⅞ × 1⅝ inches. Foll. 122. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthāsārathi Ayyaṅgār's Charities, Triplicane, Madras.

श्रुतप्रकाशिकाव्याख्या—भावप्रकाशिका.

ŚRUTAPRAKĀŚIKĀVYĀKHYĀ: BHĀVAPRAKĀŚIKĀ.

Same work as that described under R. No. 999 ante, wherein see for the beginning. By Raṅgarāmānujasvāmin.

Contains from the first Pāda of the second Adhyāya (wants the beginning) to the third Pāda (incomplete) of the third Adhyāya.

End:

फलप्रदानहेतुभूतप्रीतिविशेषसम्पादकस्योत्पत्तिसम्भवेन जीवसमवेताङ्गापूर्वकल्पने प्रमाणाभावादिति भावः । विग्रहाद्यभावमिति । आदिशब्देनाङ्गिप्रसादादयो विवक्षिताः । उपबृंहणसिद्धत्वादिति । न तु ध्यानवन्मोक्षसाधनत्वादिति भावः ॥

Colophon:

इति श्रुतप्रकाशिकाव्याख्यायां भावप्रकाशिकायां तृतीयस्याध्यायस्य द्वितीयः पादः ॥

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् । अन्यत्रोक्तस्येति । नानाप्रदेशान्नातगुणानामेकविद्योपकारकत्वेन समुच्चित्योपसङ्ग्रह उपसंहारः ।

* * * *

क्रतुफलेन फलवत्त्वसिद्ध्यर्थं क्रतुसम्बन्धबोधकवाक्यकल्पनापेक्षास्तीति वाच्यम्; उपासनवाक्यशेषस्येव फलसमर्पकतया विपरिणामसम्भवे फलवत्कर्म.

R. No. **4542.**

Śrītāla. 19 × 2 inches. Foll. 35. Lines, 12 in a page. Telugu. Slightly injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

Foll. 1—3 are left blank.

(*a*) सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Foll. 4*a*—26*a*. Fol. 26 is left blank.

Same work as that described under No. 2885 of the D.C.S. MSS., Vol. V. By Kṛṣṇapaṇḍita.

Complete.

Foll. 27*a*—31*a* contain a portion of the Sandhyāmantrabhāṣya.

(*b*) गायत्रीहृदयम्.

GĀYATTRĪHṚDAYAM.

Foll. 31*a*—32*b*. Foll. 33—35 are left blank.

Same work as that described under No. 6222 of the D.C.S. MSS., Vol. XII.

Complete.

R. No. **4543.**

Palm-leaf. 16¼ × 1¼ inches. Foll. 115. Lines, 8 in a page. Telugu. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

शङ्करसंहिता.

ŚAṄKARASAṀHITĀ.

Same work as that described under No. 2287 of the D.C.S. MSS., Vol IV, Part I.

Contains the Adhyāyas 1—50 in the Sambhavakāṇḍa, and Adhyāyas 1—8 complete, 9th incomplete in the Āsurakāṇḍa of the Śivarahasyakhaṇḍa.

R. No. **4544.**

Śrītāla. 15½ × 1¾ inches. Foll. 7. Lines, 10 in a page. Grantha. Fair.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

ब्रह्मसूत्रम्.

BRAHMASŪTRAM.

Same work as that described under R. No. 59(*a*) ante.

Complete.

R. No. **4545.**

Palm-leaf. 15½ × 1¼ inches. Foll. 55. Lines, 7 in a page. Telugu. Much injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

भागवतम्.

BHĀGAVATAM.

Same work as that described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Adhyāyas 1—32 complete and Adhyāya 33 incomplete in the X Skandha.

R. No. **4546.**

Palm-leaf. 17 × 1⅜ inches. Foll. 73. Lines, 8 in a page. Grantha. Injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

Foll. 1*a*—6*a* contain Jyautiṣaviṣaya. Fol. 6*b* is left blank.

(*a*) जातककर्मपद्धतिः, सव्याख्या.

JĀTAKAKARMAPADDHATIḤ WITH COMMENTARY.

Foll. 7*a*—58*b*.

Same work as that described under R. No. 1087 ante. The text is by Śrīpati and the commentary is by Sūryadēvasōmasut.

Contains the Adhyāyas five to eight complete.

(*b*) दायप्रकाशः.

DĀYAPRAKĀŚAḤ.

Foll. 61*a*—73*a*. Foll. 59, 60 and 73*b* are left blank.

Same work as that described under R. No. 371(*a*) ante.

Incomplete and the leaves are in disorder.

R. No. **4547.**

Palm-leaf. 17 × 1¼ inches. Foll. 50. Lines, 8 in a page. Grantha. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

कृष्णयजुर्वेदसंहितापदपाठः.

KṚṢṆAYAJURVĒDASAṀHITĀPADAPĀṬHAḤ.

Foll. 1*a*—45*b*.

Same work as that described under No. 90 of the D.C.S. MSS., Vol. I, Part II.

Breaks off in the VI Praśna of the first Kāṇḍa.

The scribe adds—

विरोध्यब्दे माघमासे परपक्षेऽष्टमीतिथौ ।
लिखितः श्रीनिवासेन ग्रन्थो मल्लानिवासिना ॥

Foll. 46*a*—50*b* contain a portion of Mallināṭha's commentary on the Naiṣadhakāvya. Fol. 32*b* is left blank.

R. No. **4548.**

Palm-leaf. 13 × ⅞ inches. Foll. 160. Lines, 7 in a page. Grantha. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

Same work as that described under No. 4943 of the D.C.S. MSS., Vol. X. By Bhagavadrāmānujācārya.

Contains the first Pāda of the first Adhyāya incomplete.

R. No. **4549.**

Palm-leaf. 17¼ × 1½ inches. Foll. 74. Lines, 9 in a page. Grantha. Much injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

(*a*) क्षमाषोडशी, सव्याख्या.

KṢAMĀṢŌḌAŚĪ WITH COMMENTARY.

Foll. 1*a*—12*b*. Fol. 13 is left blank.

Same work as that described under No. 9934 of the D.C.S. MSS., Vol. XVIII.

Complete.

(*b*) अष्टाध्यायी, सवार्त्तिका.

AṢṬĀDHYĀYĪ WITH VĀRTTIKA.

Foll. 14*a*—18*b*. Foll. 19 and 20 are left blank.

Same work as that described under No. 1252 of the D.C.S. MSS., Vol. III.

Wants the beginning and the end in the IV Adhyāya.

(*c*) सुदर्शनशतकम्, सव्याख्यानम्.

SUDARŚANAŚATAKAM WITH COMMENTARY.

Foll. 21*a*—74*a*. Fol. 74*b* is left blank.

Same work as that described under No. 10656 of the D.C.S. MSS., Vol. XIX.

The text is by Kūranārāyaṇa and the commentary is by Sudarśanācārya.

Complete.

R. No. **4550.**

Palm-leaf. 15½ × 1 inches. Foll. 192. Lines, 10 in a page. Grantha and Telugu. Much injured.

Presented in 1924-25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

(*a*) धर्मप्रवृत्तिः.

DHARMAPRAVṚTTIḤ.

Foll. 7*b*—121*b*. Foll. 1*a*—7*b* contain the Gāyattrījapagaṇanāprakāra and Snānavidhi, etc. Foll. 76*a*—78*a* are left blank.

Same work as that described under No. 2758 of the D.C.S. MSS., Vol. V. By Nārāyaṇa.

Incomplete and in disorder.

Foll. 122*a*—123*b* give the contents of the Prāyaścittakāṇḍa in Parāśaramādhavīya.

(*b*) पराशरमाधवीयम्.

PARĀŚARAMĀDHAVĪYAM.

Foll. 125*a*—192*b*. Fol. 124 is left blank.

Same work as that described under No. 2647 of the D.C.S. MSS., Vol. V.

Contains the Prāyaścittakāṇḍa incomplete. Several leaves are injured and are not in order.

R. No. 4551.

Palm-leaf. 16¾ × 1¼ inches. Foll. 118. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

पूर्वोत्तरमीमांसावादनक्षत्रमालिका.

PŪRVŌTTARAMĪMĀṀSĀVĀDANAKṢATRAMĀLIKĀ.

Same work as that described under R. No. 1788 ante. By Appayadīkṣita.

Complete.

R. No. 4552.

Palm-leaf. 10½ × 2¾ inches. Foll. 81. Lines, 5 in a page. Grantha. Slightly injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

नामलिङ्गानुशासनम्, कर्णाटकव्याख्यासहितम.

NĀMALIṄGĀNUŚĀSANAM WITH KANARESE MEANING.

Same work as that described under R. No. 403 ante.

Contains up to Bhōgivarga in the first Kāṇḍa.

R. No. 4553.

Śrītāla. 9¼ × 1¼ inches. Foll. 116. Lines, 8 in a page. Grantha. Much injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

अष्टाध्यायी, सवार्त्तिका.

AṢṬĀDHYĀYĪ WITH VĀRTTIKĀ.

Same work as that described under No. 1252 of the D.C.S. MSS., Vol. III.

Contains the Adhyāyas one to seven complete.

R. No. **4554.**

Śrītāla. 8¾ × 1¾ inches. Foll. 153. Lines, 16 in a page. Grantha. Slightly injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

Foll. 140*b*—153*b* are left blank.

स्मृतिरत्नाकरः.

SMṚTIRATNĀKARAḤ.

Foll. 1*a*—140*a*.

Same work as that described under No. 2805 of the D.C.S. MSS., Vol. V. By Vaidikasārvabhauma alias Vēṅkaṭavarada, also known as Sarasvatīvallabha.

Incomplete.

R. No. **4555.**

Palm-leaf. 10 × 1¼ inches. Foll. 73. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

Foll. 56*b*—73*b* are left blank.

चरमश्लोकतात्पर्यदीपिका.

CARAMAŚLŌKATĀTPARYADĪPIKĀ.

Foll. 1*a*—56*a*.

Similar to the work described under R. No. 3665(*b*) ante.

Wants the beginning and end.

Beginning:

ननु द्वयोक्तायाः प्रपत्तेश्शरण्याभिमतिप्रकाशकः चरमश्लोकः । द्वयोक्तस्वीकारैकङ्कर्य्यापेक्षिताङ्गविरोधिनिवृत्तिप्रतिपादकतया द्वयविवरणरूपत्वा-दवश्यज्ञातव्ये रहस्यत्रये मूलमन्त्रानन्तरं मन्त्रत्वसाधर्म्यात् द्वयार्थस्यैव

जिज्ञासिततयावसरसङ्गत्या वा द्वयस्य व्याख्यानन्तरं व्याख्यायत इत्युक्तम् । न हि सर्वधर्मानिति श्लोको भगवदभिमतप्रपत्तिविधायकः, येन तद्गता शरण्यामि(भिम)ततानेन प्रकाश्येत ।

End:

अत एव स्वतन्त्रचरमश्लोकव्याख्याने बहुवचनार्थप्रदर्शने भक्तियोगो नोक्तः । अवताररहस्यचिन्तनसहकृतायाश्च भक्तेः प्रारब्धनिवृत्तिपूर्वकमोक्षसाधनतया केवलभक्तितः पृथगभिधानम् । एतच्च भक्तौ शक्तानामपि विलम्बाक्षमत्वादेव केषां चित्प्रपत्त्यनुष्ठानमिति शङ्कावारणाय तत्त्वज्ञानमात्ररूपाया अपि पुरुषोत्तमविद्याया भक्तिसाध्यप्रीतिजनकत्वं स सर्वविद् भजतामित्यादिना प्रतिपाद्यत इति भाषितत्वात्प्रशंसार्थमपि तस्या मोक्षसाधनतोक्तेति एतावता तदुक्तिः.

R. No. 4556.

Śrītāla. 10¼ × 2 inches. Foll. 48. Lines, 15 in a page. Telugu. Fair.

Presented in 1924–25 by the Secretary to the Trustees of the Śrī Yōgi Pārthasārathi Ayyaṅgār's Charities, Triplicane, Madras.

महायोगिमाहात्म्यम्.

MAHĀYŌGIMĀHĀTMYAM.

Foll. 3*a*—48*a*. Foll. 1, 2 and 48*b* are left blank.

A treatise describing the greatness of the twelve great sages known as Āḻvārs in the Śrīvaiṣṇava religion. The portion contained herein forms a part of the Bhārgavapurāṇa, one of the eighteen Upapurāṇas and is in the form of a conversation between Nara and Nārāyaṇa.

Complete in 40 Adhyāyas.

Beginning:

शौनकादय ऊचुः—

सर्वधर्मार्थतत्त्वज्ञ सर्वविद्याविशारद ।
तत्त्वार्थविदुषां श्रेष्ठ सूत द्वैपायनप्रिय ॥
यानि धर्माणि लोकेषु चरित्राण्यपि शार्ङ्गिणः ।
तव प्रसादादस्माभिः श्रुतानि वदतां वर ॥

कृतकृत्या वयं स्याम पवित्रीकृतचेतसः ।
योगिनां तु चरित्राणि भगवद्दास्यभोगिनाम् ॥
नोक्तान्यमृतकल्पानि त्वया धर्मोपदेशिना ।
न तृप्तिं यान्ति चेतांसि तस्मात्तानि वदस्व नः ॥

* * * *

Colophon:

इति श्रीमद्भार्गवोपपुराणे उत्तरखण्डे नरनारायणसंवादे महायोगिमाहात्म्ये प्रथमोऽध्यायः ॥

तस्य तद्वचनं श्रुत्वा नारायणमुनिस्तदा ।
प्रीतिसंहृष्टसर्वाङ्गः प्रत्युवाच नरं वचः ॥

श्रीनारायण उवाच —

अथ काले गते तस्मिन्नादौ वैवस्वतान्तरे ।
